# Rigveda Mandala 1

# ઋગ્વેદઃ મણ્ડલં ૧

## Document Information

Text title : Rigveda Mandalam 1

File name : r01.itx

Category : veda, rigveda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : 1. Source: Aufrecht/van Nooten/Holland (Samhita), 2. Final transliteration: Detlef Eichler

Proofread by : Detlef Eichler detlefeichler at googlemail.com

Latest update : July 2, 2013

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# ઋગ્વેદઃ મણ્ડલં ૧

અગ્નિમીળે પુરોહિતં યજ્ઞસ્ય દેવમૃત્વિજમ્ ।
હોતારં રત્નધાતમમ્ ॥ ૧.૦૦૧.૦૧

અગ્નિઃ પૂર્વેભિરૃષિભિરીડ્યો નૂતનૈરુત ।
સ દેવાઁ એહ વક્ષતિ ॥ ૧.૦૦૧.૦૨

અગ્નિના રયિમશ્નવત્પોષમેવ દિવેદિવે ।
યશસં વીરવત્તમમ્ ॥ ૧.૦૦૧.૦૩

અગ્ને યં યજ્ઞમધ્વરં વિશ્વતઃ પરિભૂરસિ ।
સ ઇદ્દેવેષુ ગચ્છતિ ॥ ૧.૦૦૧.૦૪

અગ્નિર્હોતા કવિક્રતુઃ સત્યશ્ચિત્રશ્રવસ્તમઃ ।
દેવો દેવેભિરા ગમત્ ॥ ૧.૦૦૧.૦૫

યદઙ્ગ દાશુષે ત્વમગ્ને ભદ્રં કરિષ્યસિ ।
તવેત્તત્સત્યમઙ્ગિરઃ ॥ ૧.૦૦૧.૦૬

ઉપ ત્વાગ્ને દિવેદિવે દોષાવસ્તર્ધિયા વયમ્ ।
નમો ભરન્ત એમસિ ॥ ૧.૦૦૧.૦૭

રાજન્તમધ્વરાણાં ગોપામૃતસ્ય દીદિવિમ્ ।
વર્ધમાનં સ્વે દમે ॥ ૧.૦૦૧.૦૮

સ નઃ પિતેવ સૂનવેઽગ્ને સૂપાયનો ભવ ।
સચસ્વા નઃ સ્વસ્તયે ॥ ૧.૦૦૧.૦૯

વાયવા યાહિ દર્શતેમે સોમા અરંકૃતાઃ ।
તેષાં પાહિ શ્રુધી હવમ્ ॥ ૧.૦૦૨.૦૧

વાય ઉક્થેભિર્જરન્તે ત્વામચ્છા જરિતારઃ ।
સુતસોમા અહર્વિદઃ ॥ ૧.૦૦૨.૦૨

વાયો તવ પ્રપૃઞ્ચતી ધેના જિગાતિ દાશુષે ।
ઉરૂચી સોમપીતયે ॥ ૧.૦૦૨.૦૩
ઇન્દ્રવાયૂ ઇમે સુતા ઉપ પ્રયોભિરા ગતમ્ ।
ઇન્દવો વામુશન્તિ હિ ॥ ૧.૦૦૨.૦૪
વાયવિન્દ્રશ્ચ ચેતથઃ સુતાનાં વાજિનીવસૂ ।
તાવા યાતમુપ દ્રવત્ ॥ ૧.૦૦૨.૦૫
વાયવિન્દ્રશ્ચ સુન્વત આ યાતમુપ નિષ્કૃતમ્ ।
મક્ષ્વિ૧ત્થા ધિયા નરા ॥ ૧.૦૦૨.૦૬
મિત્રં હુવે પૂતદક્ષં વરુણં ચ રિશાદસમ્ ।
ધિયં ઘૃતાચીં સાધન્તા ॥ ૧.૦૦૨.૦૭
ઋતેન મિત્રાવરુણાવૃતાવૃધાવૃતસ્પૃશા ।
ક્રતું બૃહન્તમાશાથે ॥ ૧.૦૦૨.૦૮
કવી નો મિત્રાવરુણા તુવિજાતા ઉરુક્ષયા ।
દક્ષં દધાતે અપસમ્ ॥ ૧.૦૦૨.૦૯
અશ્વિના યજ્વરીરિષો દ્રવત્પાણી શુભસ્પતી ।
પુરુભુજા ચનસ્યતમ્ ॥ ૧.૦૦૩.૦૧
અશ્વિના પુરુદંસસા નરા શવીરયા ધિયા ।
ધિષ્ણ્યા વનતં ગિરઃ ॥ ૧.૦૦૩.૦૨
દસ્રા યુવાકવઃ સુતા નાસત્યા વૃક્તબર્હિષઃ ।
આ યાતં રુદ્રવર્તની ॥ ૧.૦૦૩.૦૩
ઇન્દ્રા યાહિ ચિત્રભાનો સુતા ઇમે ત્વાયવઃ ।
અણ્વીભિસ્તના પૂતાસઃ ॥ ૧.૦૦૩.૦૪
ઇન્દ્રા યાહિ ધિયેષિતો વિપ્રજૂતઃ સુતાવતઃ ।
ઉપ બ્રહ્માણિ વાઘતઃ ॥ ૧.૦૦૩.૦૫
ઇન્દ્રા યાહિ તૂતુજાન ઉપ બ્રહ્માણિ હરિવઃ ।
સુતે દધિષ્વ નશ્ચનઃ ॥ ૧.૦૦૩.૦૬
ઓમાસશ્ચર્ષણીધૃતો વિશ્વે દેવાસ આ ગત ।

દાશ્વાંસો દાશુષઃ સુતમ્ ॥ ૧.૦૦૩.૦૭
વિશ્વે દેવાસો અપ્તુરઃ સુતમા ગન્ત તૂર્ણયઃ ।
ઉસ્રા ઇવ સ્વસરાણિ ॥ ૧.૦૦૩.૦૮
વિશ્વે દેવાસો અસ્રિધ એહિમાયાસો અદ્રુહઃ ।
મેધં જુષન્ત વહ્નયઃ ॥ ૧.૦૦૩.૦૯
પાવકા નઃ સરસ્વતી વાજેભિર્વાજિનીવતી ।
યજ્ઞં વષ્ટુ ધિયાવસુઃ ॥ ૧.૦૦૩.૧૦
ચોદયિત્રી સૂનૃતાનાં ચેતન્તી સુમતીનામ્ ।
યજ્ઞં દધે સરસ્વતી ॥ ૧.૦૦૩.૧૧
મહો અર્ણઃ સરસ્વતી પ્ર ચેતયતિ કેતુના ।
ધિયો વિશ્વા વિ રાજતિ ॥ ૧.૦૦૩.૧૨

સુરૂપકૃત્નુમૂતયે સુદુઘામિવ ગોદુહે ।
જુહૂમસિ દ્યવિદ્યવિ ॥ ૧.૦૦૪.૦૧
ઉપ નઃ સવના ગહિ સોમસ્ય સોમપાઃ પિબ ।
ગોદા ઇદ્રેવતો મદઃ ॥ ૧.૦૦૪.૦૨
અથા તે અન્તમાનાં વિદ્યામ સુમતીનામ્ ।
મા નો અતિ ખ્ય આ ગહિ ॥ ૧.૦૦૪.૦૩
પરેહિ વિગ્રમસ્તૃતમિન્દ્રં પૃચ્છા વિપશ્ચિતમ્ ।
યસ્તે સખિભ્ય આ વરમ્ ॥ ૧.૦૦૪.૦૪
ઉત બ્રુવન્તુ નો નિદો નિરન્યતશ્ચિદારત ।
દધાના ઇન્દ્ર ઇદ્દુવઃ ॥ ૧.૦૦૪.૦૫
ઉત નઃ સુભગાઁ અરિર્વોચેયુર્દસ્મ કૃષ્ટયઃ ।
સ્યામેદિન્દ્રસ્ય શર્મણિ ॥ ૧.૦૦૪.૦૬
એમાશુમાશવે ભર યજ્ઞશ્રિયં નૃમાદનમ્ ।
પતયન્મન્દયત્સખમ્ ॥ ૧.૦૦૪.૦૭
અસ્ય પીત્વા શતક્રતો ઘનો વૃત્રાણામભવઃ ।
પ્રાવો વાજેષુ વાજિનમ્ ॥ ૧.૦૦૪.૦૮

તં ત્વા વાજેષુ વાજિનં વાજયામઃ શતક્રતો ।
ધનાનામિન્દ્ર સાતયે ॥ ૧.૦૦૪.૦૯

યો રાયોઽવનિર્મહાન્સુપારઃ સુન્વતઃ સખા ।
તસ્મા ઇન્દ્રાય ગાયત ॥ ૧.૦૦૪.૧૦

આ ત્વેતા નિ ષીદતેન્દ્રમભિ પ્ર ગાયત ।
સખાયઃ સ્તોમવાહસઃ ॥ ૧.૦૦૫.૦૧

પુરૂતમં પુરૂણામીશાનં વાર્યાણામ્ ।
ઇન્દ્રં સોમે સચા સુતે ॥ ૧.૦૦૫.૦૨

સ ઘા નો યોગ આ ભુવત્સ રાયે સ પુરંધ્યામ્ ।
ગમદ્વાજેભિરા સ નઃ ॥ ૧.૦૦૫.૦૩

યસ્ય સંસ્થે ન વૃણ્વતે હરી સમત્સુ શત્રવઃ ।
તસ્મા ઇન્દ્રાય ગાયત ॥ ૧.૦૦૫.૦૪

સુતપાવ્ને સુતા ઇમે શુચયો યન્તિ વીતયે ।
સોમાસો દધ્યાશિરઃ ॥ ૧.૦૦૫.૦૫

ત્વં સુતસ્ય પીતયે સદ્યો વૃદ્ધો અજાયથાઃ ।
ઇન્દ્ર જ્યૈષ્ઠ્યાય સુક્રતો ॥ ૧.૦૦૫.૦૬

આ ત્વા વિશન્ત્વાશવઃ સોમાસ ઇન્દ્ર ગિર્વણઃ ।
શં તે સન્તુ પ્રચેતસે ॥ ૧.૦૦૫.૦૭

ત્વાં સ્તોમા અવીવૃધન્ત્વામુક્થા શતક્રતો ।
ત્વાં વર્ધન્તુ નો ગિરઃ ॥ ૧.૦૦૫.૦૮

અક્ષિતોતિઃ સનેદિમં વાજમિન્દ્રઃ સહસ્રિણમ્ ।
યસ્મિન્વિશ્વાનિ પૌંસ્યા ॥ ૧.૦૦૫.૦૯

મા નો મર્તા અભિ દ્રુહન્તનૂનામિન્દ્ર ગિર્વણઃ ।
ઈશાનો યવયા વધમ્ ॥ ૧.૦૦૫.૧૦

યુઞ્જન્તિ બ્રધ્નમરુષં ચરન્તં પરિ તસ્થુષઃ ।
રોચન્તે રોચના દિવિ ॥ ૧.૦૦૬.૦૧

યુઞ્જન્ત્યસ્ય કામ્યા હરી વિપક્ષસા રથે ।

શોણા ધૃષ્ણૂ નૃવાહસા ॥ ૧.૦૦૬.૦૨

કેતું કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે ।

સમુષદ્ભિરજાયથાઃ ॥ ૧.૦૦૬.૦૩

આદહ સ્વધામનુ પુનર્ગર્ભત્વમેરિરે ।

દધાના નામ યજ્ઞિયમ્ ॥ ૧.૦૦૬.૦૪

વીળુ ચિદારુજત્નુભિર્ગુહા ચિદિન્દ્ર વહ્નિભિઃ ।

અવિન્દ ઉસ્રિયા અનુ ॥ ૧.૦૦૬.૦૫

દેવયન્તો યથા મતિમચ્છા વિદદ્વસું ગિરઃ ।

મહામનૂષત શ્રુતમ્ ॥ ૧.૦૦૬.૦૬

ઇન્દ્રેણ સં હિ દૃક્ષસે સંજગ્માનો અબિભ્યુષા ।

મન્દૂ સમાનવર્ચસા ॥ ૧.૦૦૬.૦૭

અનવદ્યૈરભિદ્યુભિર્મખઃ સહસ્વદર્ચતિ ।

ગણૈરિન્દ્રસ્ય કામ્યૈઃ ॥ ૧.૦૦૬.૦૮

અતઃ પરિજ્મન્ના ગહિ દિવો વા રોચનાદધિ ।

સમસ્મિન્નૃઞ્જતે ગિરઃ ॥ ૧.૦૦૬.૦૯

ઇતો વા સાતિમીમહે દિવો વા પાર્થિવાદધિ ।

ઇન્દ્રં મહો વા રજસઃ ॥ ૧.૦૦૬.૧૦

ઇન્દ્રમિદ્ગાથિનો બૃહદિન્દ્રમર્કેભિરર્કિણઃ ।

ઇન્દ્રં વાણીરનૂષત ॥ ૧.૦૦૭.૦૧

ઇન્દ્ર ઇદ્ધર્યોઃ સચા સમ્મિશ્લ આ વચોયુજા ।

ઇન્દ્રો વજ્રી હિરણ્યયઃ ॥ ૧.૦૦૭.૦૨

ઇન્દ્રો દીર્ઘાય ચક્ષસ આ સૂર્યં રોહયદ્દિવિ ।

વિ ગોભિરદ્રિમૈરયત્ ॥ ૧.૦૦૭.૦૩

ઇન્દ્ર વાજેષુ નોઽવ સહસ્રપ્રધનેષુ ચ ।

ઉગ્ર ઉગ્રાભિરૂતિભિઃ ॥ ૧.૦૦૭.૦૪

ઇન્દ્રં વયં મહાધન ઇન્દ્રમર્ભે હવામહે ।

યુજં વૃત્રેષુ વજ્રિણમ્ ॥ ૧.૦૦૭.૦૫

સ નો વૃષન્નમું ચરું સત્રાદાવન્નપા વૃધિ ।
અસ્મભ્યમપ્રતિષ્કુતઃ ॥ ૧.૦૦૭.૦૬
તુઞ્જેતુઞ્જે ય ઉત્તરે સ્તોમા ઇન્દ્રસ્ય વજ્રિણઃ ।
ન વિન્ધે અસ્ય સુષ્ટુતિમ્ ॥ ૧.૦૦૭.૦૭
વૃષા યૂથેવ વંસગઃ કૃષ્ટીરિયર્ત્યોજસા ।
ઈશાનો અપ્રતિષ્કુતઃ ॥ ૧.૦૦૭.૦૮
ય એકશ્ચર્ષણીનાં વસૂનામિરજ્યતિ ।
ઇન્દ્રઃ પઞ્ચ ક્ષિતીનામ્ ॥ ૧.૦૦૭.૦૯
ઇન્દ્રં વો વિશ્વતસ્પરિ હવામહે જનેભ્યઃ ।
અસ્માકમસ્તુ કેવલઃ ॥ ૧.૦૦૭.૧૦
એન્દ્ર સાનસિં રયિં સજિત્વાનં સદાસહમ્ ।
વર્ષિષ્ઠમૂતયે ભર ॥ ૧.૦૦૮.૦૧
નિ યેન મુષ્ટિહત્યયા નિ વૃત્રા રુણધામહૈ ।
ત્વોતાસો ન્યર્વતા ॥ ૧.૦૦૮.૦૨
ઇન્દ્ર ત્વોતાસ આ વયં વજ્રં ઘના દદીમહિ ।
જયેમ સં યુધિ સ્પૃધઃ ॥ ૧.૦૦૮.૦૩
વયં શૂરેભિરસ્તૃભિરિન્દ્ર ત્વયા યુજા વયમ્ ।
સાસહ્યામ પૃતન્યતઃ ॥ ૧.૦૦૮.૦૪
મહાઁ ઇન્દ્રઃ પરશ્ચ નુ મહિત્વમસ્તુ વજ્રિણે ।
દ્યૌર્ન પ્રથિના શવઃ ॥ ૧.૦૦૮.૦૫
સમોહે વા ય આશત નરસ્તોકસ્ય સનિતૌ ।
વિપ્રાસો વા ધિયાયવઃ ॥ ૧.૦૦૮.૦૬
યઃ કુક્ષિઃ સોમપાતમઃ સમુદ્ર ઇવ પિન્વતે ।
ઉર્વીરાપો ન કાકુદઃ ॥ ૧.૦૦૮.૦૭
એવા હ્યસ્ય સૂનૃતા વિરપ્શી ગોમતી મહી ।
પક્વા શાખા ન દાશુષે ॥ ૧.૦૦૮.૦૮
એવા હિ તે વિભૂતય ઊતય ઇન્દ્ર માવતે ।

સધશ્ચિત્સન્તિ દાશુષે ॥ ૧.૦૦૮.૦૯
એવા હ્યસ્ય કામ્યા સ્તોમ ઉક્થં ચ શંસ્યા ।
ઇન્દ્રાય સોમપીતયે ॥ ૧.૦૦૮.૧૦
ઇન્દ્રેહિ મત્સ્યન્ધસો વિશ્વેભિઃ સોમપર્વભિઃ ।
મહાઁ અભિષ્ટિરોજસા ॥ ૧.૦૦૯.૦૧
એમેનં સૃજતા સુતે મન્દિમિન્દ્રાય મન્દિને ।
ચક્રિં વિશ્વાનિ ચક્રયે ॥ ૧.૦૦૯.૦૨
મત્સ્વા સુશિપ્ર મન્દિભિઃ સ્તોમેભિર્વિશ્વચર્ષણે ।
સચૈષુ સવનેષ્વા ॥ ૧.૦૦૯.૦૩
અસૃગ્રમિન્દ્ર તે ગિરઃ પ્રતિ ત્વામુદહાસત ।
અજોષા વૃષભં પતિમ્ ॥ ૧.૦૦૯.૦૪
સં ચોદય ચિત્રમર્વાગ્રાધ ઇન્દ્ર વરેણ્યમ્ ।
અસદિત્તે વિભુ પ્રભુ ॥ ૧.૦૦૯.૦૫
અસ્માન્સુ તત્ર ચોદયેન્દ્ર રાયે રભસ્વતઃ ।
તુવિદ્યુમ્ન યશસ્વતઃ ॥ ૧.૦૦૯.૦૬
સં ગોમદિન્દ્ર વાજવદસ્મે પૃથુ શ્રવો બૃહત્ ।
વિશ્વાયુર્ધેહ્યક્ષિતમ્ ॥ ૧.૦૦૯.૦૭
અસ્મે ધેહિ શ્રવો બૃહદ્દ્યુમ્નં સહસ્રસાતમમ્ ।
ઇન્દ્ર તા રથિનીરિષઃ ॥ ૧.૦૦૯.૦૮
વસોરિન્દ્રં વસુપતિં ગીર્ભિર્ગૃણન્ત ઋગ્મિયમ્ ।
હોમ ગન્તારમૂતયે ॥ ૧.૦૦૯.૦૯
સુતેસુતે ન્યોકસે બૃહદ્બૃહત એદરિઃ ।
ઇન્દ્રાય શૂષમર્ચતિ ॥ ૧.૦૦૯.૧૦
ગાયન્તિ ત્વા ગાયત્રિણોઽર્ચન્ત્યર્કમર્કિણઃ ।
બ્રહ્માણસ્ત્વા શતક્રત ઉદ્વંશમિવ યેમિરે ॥ ૧.૦૧૦.૦૧
યત્સાનોઃ સાનુમારુહદ્ભૂર્યસ્પષ્ટ કર્ત્વમ્ ।
તદિન્દ્રો અર્થં ચેતતિ યૂથેન વૃષ્ણિરેજતિ ॥ ૧.૦૧૦.૦૨

યુક્ષ્વા હિ કેશિના હરી વૃષણા કક્ષ્યપ્રા ।
અથા ન ઇન્દ્ર સોમપા ગિરામુપશ્રુતિં ચર ॥ ૧.૦૧૦.૦૩
એહિ સ્તોમાઁ અભિ સ્વરાભિ ગૃણીહ્યા રુવ ।
બ્રહ્મ ચ નો વસો સચેન્દ્ર યજ્ઞં ચ વર્ધય ॥ ૧.૦૧૦.૦૪
ઉક્થમિન્દ્રાય શંસ્યં વર્ધનં પુરુનિષ્ષિધે ।
શક્રો યથા સુતેષુ ણો રારણત્સખ્યેષુ ચ ॥ ૧.૦૧૦.૦૫
તમિત્સખિત્વ ઈમહે તં રાયે તં સુવીર્યે ।
સ શક્ર ઉત નઃ શકદિન્દ્રો વસુ દયમાનઃ ॥ ૧.૦૧૦.૦૬
સુવિવૃતં સુનિરજમિન્દ્ર ત્વાદાતમિદ્યશઃ ।
ગવામપ વ્રજં વૃધિ કૃણુષ્વ રાધો અદ્રિવઃ ॥ ૧.૦૧૦.૦૭
નહિ ત્વા રોદસી ઉભે ઋઘાયમાણમિન્વતઃ ।
જેષઃ સ્વર્વતીરપઃ સં ગા અસ્મભ્યં ધૂનુહિ ॥ ૧.૦૧૦.૦૮
આશ્રુત્કર્ણ શ્રુધી હવં નૂ ચિદ્દધિષ્વ મે ગિરઃ ।
ઇન્દ્ર સ્તોમમિમં મમ કૃષ્વા યુજશ્ચિદન્તરમ્ ॥ ૧.૦૧૦.૦૯
વિદ્મા હિ ત્વા વૃષન્તમં વાજેષુ હવનશ્રુતમ્ ।
વૃષન્તમસ્ય હૂમહ ઊતિં સહસ્રસાતમામ્ ॥ ૧.૦૧૦.૧૦
આ તૂ ન ઇન્દ્ર કૌશિક મન્દસાનઃ સુતં પિબ ।
નવ્યમાયુઃ પ્ર સૂ તિર કૃધી સહસ્રસામૃષિમ્ ॥ ૧.૦૧૦.૧૧
પરિ ત્વા ગિર્વણો ગિર ઇમા ભવન્તુ વિશ્વતઃ ।
વૃદ્ધાયુમનુ વૃદ્ધયો જુષ્ટા ભવન્તુ જુષ્ટયઃ ॥ ૧.૦૧૦.૧૨
ઇન્દ્રં વિશ્વા અવીવૃધન્સમુદ્રવ્યચસં ગિરઃ ।
રથીતમં રથીનાં વાજાનાં સત્પતિં પતિમ્ ॥ ૧.૦૧૧.૦૧
સખ્યે ત ઇન્દ્ર વાજિનો મા ભેમ શવસસ્પતે ।
ત્વામભિ પ્ર ણોનુમો જેતારમપરાજિતમ્ ॥ ૧.૦૧૧.૦૨
પૂર્વીરિન્દ્રસ્ય રાતયો ન વિ દસ્યન્ત્યૂતયઃ ।
યદી વાજસ્ય ગોમતઃ સ્તોતૃભ્યો મંહતે મઘમ્ ॥ ૧.૦૧૧.૦૩
પુરાં ભિન્દુર્યુવા કવિરમિતૌજા અજાયત ।

ઇન્દ્રો વિશ્વસ્ય કર્મણો ધર્તા વજ્રી પુરુષ્ટુતઃ ॥ ૧.૦૧૧.૦૪

ત્વં વલસ્ય ગોમતોઽપાવરદ્રિવો બિલમ્ ।

ત્વાં દેવા અબિભ્યુષસ્તુજ્યમાનાસ આવિષુઃ ॥ ૧.૦૧૧.૦૫

તવાહં શૂર રાતિભિઃ પ્રત્યાયં સિન્ધુમાવદન્ ।

ઉપાતિષ્ઠન્ત ગિર્વણો વિદુષ્ટે તસ્ય કારવઃ ॥ ૧.૦૧૧.૦૬

માયાભિરિન્દ્ર માયિનં ત્વં શુષ્ણમવાતિરઃ ।

વિદુષ્ટે તસ્ય મેધિરાસ્તેષાં શ્રવાંસ્યુત્તિર ॥ ૧.૦૧૧.૦૭

ઇન્દ્રમીશાનમોજસાભિ સ્તોમા અનૂષત ।

સહસ્રં યસ્ય રાતય ઉત વા સન્તિ ભૂયસીઃ ॥ ૧.૦૧૧.૦૮

અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।

અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ ૧.૦૧૨.૦૧

અગ્નિમગ્નિં હવીમભિઃ સદા હવન્ત વિશ્પતિમ્ ।

હવ્યવાહં પુરુપ્રિયમ્ ॥ ૧.૦૧૨.૦૨

અગ્ને દેવાઁ ઇહા વહ જજ્ઞાનો વૃક્તબર્હિષે ।

અસિ હોતા ન ઈડ્યઃ ॥ ૧.૦૧૨.૦૩

તાઁ ઉશતો વિ બોધય યદગ્ને યાસિ દૂત્યમ્ ।

દેવૈરા સત્સિ બર્હિષિ ॥ ૧.૦૧૨.૦૪

ઘૃતાહવન દીદિવઃ પ્રતિ ષ્મ રિષતો દહ ।

અગ્ને ત્વં રક્ષસ્વિનઃ ॥ ૧.૦૧૨.૦૫

અગ્નિનાગ્નિઃ સમિધ્યતે કવિર્ગૃહપતિર્યુવા ।

હવ્યવાડ્જુહ્વાસ્યઃ ॥ ૧.૦૧૨.૦૬

કવિમગ્નિમુપ સ્તુહિ સત્યધર્માણમધ્વરે ।

દેવમમીવચાતનમ્ ॥ ૧.૦૧૨.૦૭

યસ્ત્વામગ્ને હવિષ્પતિર્દૂતં દેવ સપર્યતિ ।

તસ્ય સ્મ પ્રાવિતા ભવ ॥ ૧.૦૧૨.૦૮

યો અગ્નિં દેવવીતયે હવિષ્માઁ આવિવાસતિ ।

તસ્મૈ પાવક મૃળય ॥ ૧.૦૧૨.૦૯

સ નઃ પાવક દીદિવોઽગ્ને દેવાઁ ઇહા વહ ।
ઉપ યજ્ઞં હવિશ્ચ નઃ ॥ ૧.૦૧૨.૧૦
સ નઃ સ્તવાન આ ભર ગાયત્રેણ નવીયસા ।
રયિં વીરવતીમિષમ્ ॥ ૧.૦૧૨.૧૧
અગ્ને શુક્રેણ શોચિષા વિશ્વાભિર્દેવહૂતિભિઃ ।
ઇમં સ્તોમં જુષસ્વ નઃ ॥ ૧.૦૧૨.૧૨
સુસમિદ્ધો ન આ વહ દેવાઁ અગ્ને હવિષ્મતે ।
હોતઃ પાવક યક્ષિ ચ ॥ ૧.૦૧૩.૦૧
મધુમન્તં તનૂનપાદ્યજ્ઞં દેવેષુ નઃ કવે ।
અદ્યા કૃણુહિ વીતયે ॥ ૧.૦૧૩.૦૨
નરાશંસમિહ પ્રિયમસ્મિન્યજ્ઞ ઉપ હ્વયે ।
મધુજિહ્વં હવિષ્કૃતમ્ ॥ ૧.૦૧૩.૦૩
અગ્ને સુખતમે રથે દેવાઁ ઈળિત આ વહ ।
અસિ હોતા મનુર્હિતઃ ॥ ૧.૦૧૩.૦૪
સ્તૃણીત બર્હિરાનુષગ્ઘૃતપૃષ્ઠં મનીષિણઃ ।
યત્રામૃતસ્ય ચક્ષણમ્ ॥ ૧.૦૧૩.૦૫
વિ શ્રયન્તામૃતાવૃધો દ્વારો દેવીરસશ્ચતઃ ।
અદ્યા નૂનં ચ યષ્ટવે ॥ ૧.૦૧૩.૦૬
નક્તોષાસા સુપેશસાસ્મિન્યજ્ઞ ઉપ હ્વયે ।
ઇદં નો બર્હિરાસદે ॥ ૧.૦૧૩.૦૭
તા સુજિહ્વા ઉપ હ્વયે હોતારા દૈવ્યા કવી ।
યજ્ઞં નો યક્ષતામિમમ્ ॥ ૧.૦૧૩.૦૮
ઇળા સરસ્વતી મહી તિસ્રો દેવીર્મયોભુવઃ ।
બર્હિઃ સીદન્ત્વસ્રિધઃ ॥ ૧.૦૧૩.૦૯
ઇહ ત્વષ્ટારમગ્રિયં વિશ્વરૂપમુપ હ્વયે ।
અસ્માકમસ્તુ કેવલઃ ॥ ૧.૦૧૩.૧૦
અવ સૃજા વનસ્પતે દેવ દેવેભ્યો હવિઃ ।

પ્ર દાતુરસ્તુ ચેતનમ્ ॥ ૧.૦૧૩.૧૧

સ્વાહા યજ્ઞં કૃણોતનેન્દ્રાય યજ્વનો ગૃહે ।

તત્ર દેવાઁ ઉપ હ્વયે ॥ ૧.૦૧૩.૧૨

ઐભિરગ્ને દુવો ગિરો વિશ્વેભિઃ સોમપીતયે ।

દેવેભિર્યાહિ યક્ષિ ચ ॥ ૧.૦૧૪.૦૧

આ ત્વા કણ્વા અહૂષત ગૃણન્તિ વિપ્ર તે ધિયઃ ।

દેવેભિરગ્ન આ ગહિ ॥ ૧.૦૧૪.૦૨

ઇન્દ્રવાયૂ બૃહસ્પતિં મિત્રાગ્નિં પૂષણં ભગમ્ ।

આદિત્યાન્મારુતં ગણમ્ ॥ ૧.૦૧૪.૦૩

પ્ર વો ભ્રિયન્ત ઇન્દવો મત્સરા માદયિષ્ણવઃ ।

દ્રપ્સા મધ્વશ્ચમૂષદઃ ॥ ૧.૦૧૪.૦૪

ઈળતે ત્વામવસ્યવઃ કણ્વાસો વૃક્તબર્હિષઃ ।

હવિષ્મન્તો અરંકૃતઃ ॥ ૧.૦૧૪.૦૫

ઘૃતપૃષ્ઠા મનોયુજો યે ત્વા વહન્તિ વહ્નયઃ ।

આ દેવાન્સોમપીતયે ॥ ૧.૦૧૪.૦૬

તાન્યજત્રાઁ ઋતાવૃધોઽગ્ને પત્નીવતસ્કૃધિ ।

મધ્વઃ સુજિહ્વ પાયય ॥ ૧.૦૧૪.૦૭

યે યજત્રા ય ઈડ્યાસ્તે તે પિબન્તુ જિહ્વયા ।

મધોરગ્ને વષટ્કૃતિ ॥ ૧.૦૧૪.૦૮

આકીં સૂર્યસ્ય રોચનાદ્વિશ્વાન્દેવાઁ ઉષર્બુધઃ ।

વિપ્રો હોતેહ વક્ષતિ ॥ ૧.૦૧૪.૦૯

વિશ્વેભિઃ સોમ્યં મધ્વગ્ન ઇન્દ્રેણ વાયુના ।

પિબા મિત્રસ્ય ધામભિઃ ॥ ૧.૦૧૪.૧૦

ત્વં હોતા મનુર્હિતોઽગ્ને યજ્ઞેષુ સીદસિ ।

સેમં નો અધ્વરં યજ ॥ ૧.૦૧૪.૧૧

યુક્ષ્વા હ્યરુષી રથે હરિતો દેવ રોહિતઃ ।

તાભિર્દેવાઁ ઇહા વહ ॥ ૧.૦૧૪.૧૨

ઇન્દ્ર સોમં પિબ ઋતુના ત્વા વિશન્ત્વિન્દવઃ ।
મત્સરાસસ્તદોકસઃ ॥ ૧.૦૧૫.૦૧
મરુતઃ પિબત ઋતુના પોત્રાદ્યજ્ઞં પુનીતન ।
યૂયં હિ ષ્ઠા સુદાનવઃ ॥ ૧.૦૧૫.૦૨
અભિ યજ્ઞં ગૃણીહિ નો ગ્નાવો નેષ્ટઃ પિબ ઋતુના ।
ત્વં હિ રત્નધા અસિ ॥ ૧.૦૧૫.૦૩
અગ્ને દેવાઁ ઇહા વહ સાદયા યોનિષુ ત્રિષુ ।
પરિ ભૂષ પિબ ઋતુના ॥ ૧.૦૧૫.૦૪
બ્રાહ્મણાદિન્દ્ર રાધસઃ પિબા સોમમૃતૂઁરનુ ।
તવેદ્ધિ સખ્યમસ્તૃતમ્ ॥ ૧.૦૧૫.૦૫
યુવં દક્ષં ધૃતવ્રત મિત્રાવરુણ દૂળભમ્ ।
ઋતુના યજ્ઞમાશાથે ॥ ૧.૦૧૫.૦૬
દ્રવિણોદા દ્રવિણસો ગ્રાવહસ્તાસો અધ્વરે ।
યજ્ઞેષુ દેવમીળતે ॥ ૧.૦૧૫.૦૭
દ્રવિણોદા દદાતુ નો વસૂનિ યાનિ શૃણ્વિરે ।
દેવેષુ તા વનામહે ॥ ૧.૦૧૫.૦૮
દ્રવિણોદાઃ પિપીષતિ જુહોત પ્ર ચ તિષ્ઠત ।
નેષ્ટ્રાદૃતુભિરિષ્યત ॥ ૧.૦૧૫.૦૯
યત્ત્વા તુરીયમૃતુભિર્દ્રવિણોદો યજામહે ।
અધ સ્મા નો દદિર્ભવ ॥ ૧.૦૧૫.૧૦
અશ્વિના પિબતં મધુ દીદ્યગ્ની શુચિવ્રતા ।
ઋતુના યજ્ઞવાહસા ॥ ૧.૦૧૫.૧૧
ગાર્હપત્યેન સન્ત્ય ઋતુના યજ્ઞનીરસિ ।
દેવાન્દેવયતે યજ ॥ ૧.૦૧૫.૧૨
આ ત્વા વહન્તુ હરયો વૃષણં સોમપીતયે ।
ઇન્દ્ર ત્વા સૂરચક્ષસઃ ॥ ૧.૦૧૬.૦૧
ઇમા ધાના ઘૃતસ્નુવો હરી ઇહોપ વક્ષતઃ ।

ઇન્દ્રં સુખતમે રથે ॥ ૧.૦૧૬.૦૨
ઇન્દ્રં પ્રાતર્હવામહ ઇન્દ્રં પ્રયત્યધ્વરે ।
ઇન્દ્રં સોમસ્ય પીતયે ॥ ૧.૦૧૬.૦૩
ઉપ નઃ સુતમા ગહિ હરિભિરિન્દ્ર કેશિભિઃ ।
સુતે હિ ત્વા હવામહે ॥ ૧.૦૧૬.૦૪
સેમં નઃ સ્તોમમા ગહ્યુપેદં સવનં સુતમ્ ।
ગૌરો ન તૃષિતઃ પિબ ॥ ૧.૦૧૬.૦૫
ઇમે સોમાસ ઇન્દવઃ સુતાસો અધિ બર્હિષિ ।
તાઁ ઇન્દ્ર સહસે પિબ ॥ ૧.૦૧૬.૦૬
અયં તે સ્તોમો અગ્રિયો હૃદિસ્પૃગસ્તુ શંતમઃ ।
અથા સોમં સુતં પિબ ॥ ૧.૦૧૬.૦૭
વિશ્વમિત્સવનં સુતમિન્દ્રો મદાય ગચ્છતિ ।
વૃત્રહા સોમપીતયે ॥ ૧.૦૧૬.૦૮
સેમં નઃ કામમા પૃણ ગોભિરશ્વૈઃ શતક્રતો ।
સ્તવામ ત્વા સ્વાધ્યઃ ॥ ૧.૦૧૬.૦૯

ઇન્દ્રાવરુણયોરહં સમ્રાજોરવ આ વૃણે ।
તા નો મૃળાત ઈદૃશે ॥ ૧.૦૧૭.૦૧
ગન્તારા હિ સ્થોऽવસે હવં વિપ્રસ્ય માવતઃ ।
ધર્તારા ચર્ષણીનામ્ ॥ ૧.૦૧૭.૦૨
અનુકામં તર્પયેથામિન્દ્રાવરુણ રાય આ ।
તા વાં નેદિષ્ઠમીમહે ॥ ૧.૦૧૭.૦૩
યુવાકુ હિ શચીનાં યુવાકુ સુમતીનામ્ ।
ભૂયામ વાજદાવ્નામ્ ॥ ૧.૦૧૭.૦૪
ઇન્દ્રઃ સહસ્રદાવ્નાં વરુણઃ શંસ્યાનામ્ ।
ક્રતુર્ભવત્યુક્થ્યઃ ॥ ૧.૦૧૭.૦૫
તયોરિદવસા વયં સનેમ નિ ચ ધીમહિ ।
સ્યાદુત પ્રરેચનમ્ ॥ ૧.૦૧૭.૦૬

ઇન્દ્રાવરુણ વામહં હુવે ચિત્રાય રાધસે ।
અસ્માન્સુ જિગ્યુષસ્કૃતમ્ ॥ ૧.૦૧૭.૦૭
ઇન્દ્રાવરુણ નૂ નુ વાં સિષાસન્તીષુ ધીષ્વા ।
અસ્મભ્યં શર્મ યચ્છતમ્ ॥ ૧.૦૧૭.૦૮
પ્ર વામશ્નોતુ સુષ્ટુતિરિન્દ્રાવરુણ યાં હુવે ।
યામૃધાથે સધસ્તુતિમ્ ॥ ૧.૦૧૭.૦૯

સોમાનં સ્વરણં કૃણુહિ બ્રહ્મણસ્પતે ।
કક્ષીવન્તં ય ઔશિજઃ ॥ ૧.૦૧૮.૦૧
યો રેવાન્યો અમીવહા વસુવિત્પુષ્ટિવર્ધનઃ ।
સ નઃ સિષક્તુ યસ્તુરઃ ॥ ૧.૦૧૮.૦૨
મા નઃ શંસો અરરુષો ધૂર્તિઃ પ્રણઙ્મર્ત્યસ્ય ।
રક્ષા ણો બ્રહ્મણસ્પતે ॥ ૧.૦૧૮.૦૩
સ ઘા વીરો ન રિષ્યતિ યમિન્દ્રો બ્રહ્મણસ્પતિઃ ।
સોમો હિનોતિ મર્ત્યમ્ ॥ ૧.૦૧૮.૦૪
ત્વં તં બ્રહ્મણસ્પતે સોમ ઇન્દ્રશ્ચ મર્ત્યમ્ ।
દક્ષિણા પાત્વંહસઃ ॥ ૧.૦૧૮.૦૫
સદસસ્પતિમદ્ભુતં પ્રિયમિન્દ્રસ્ય કામ્યમ્ ।
સનિં મેધામયાસિષમ્ ॥ ૧.૦૧૮.૦૬
યસ્માદૃતે ન સિધ્યતિ યજ્ઞો વિપશ્ચિતશ્ચન ।
સ ધીનાં યોગમિન્વતિ ॥ ૧.૦૧૮.૦૭
આદૃધ્નોતિ હવિષ્કૃતિં પ્રાઞ્ચં કૃણોત્યધ્વરમ્ ।
હોત્રા દેવેષુ ગચ્છતિ ॥ ૧.૦૧૮.૦૮
નરાશંસં સુધૃષ્ટમમપશ્યં સપ્રથસ્તમમ્ ।
દિવો ન સદ્મમખસમ્ ॥ ૧.૦૧૮.૦૯

પ્રતિ ત્યં ચારુમધ્વરં ગોપીથાય પ્ર હૂયસે ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૧
નહિ દેવો ન મર્ત્યો મહસ્તવ ક્રતું પરઃ ।

મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૨
યે મહો રજસો વિદુર્વિશ્વે દેવાસો અદ્રુહઃ ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૩
ય ઉગ્રા અર્કમાનૃચુરનાધૃષ્ટાસ ઓજસા ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૪
યે શુભ્રા ઘોરવર્પસઃ સુક્ષત્રાસો રિશાદસઃ ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૫
યે નાકસ્યાધિ રોચને દિવિ દેવાસ આસતે ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૬
ય ઈઙ્ખયન્તિ પર્વતાન્તિરઃ સમુદ્રમર્ણવમ્ ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૭
આ યે તન્વન્તિ રશ્મિભિસ્તિરઃ સમુદ્રમોજસા ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૮
અભિ ત્વા પૂર્વપીતયે સૃજામિ સોમ્યં મધુ ।
મરુદ્ભિરગ્ન આ ગહિ ॥ ૧.૦૧૯.૦૯

અયં દેવાય જન્મને સ્તોમો વિપ્રેભિરાસયા ।
અકારિ રત્નધાતમઃ ॥ ૧.૦૨૦.૦૧
ય ઇન્દ્રાય વચોયુજા તતક્ષુર્મનસા હરી ।
શમીભિર્યજ્ઞમાશત ॥ ૧.૦૨૦.૦૨
તક્ષન્નાસત્યાભ્યાં પરિજ્માનં સુખં રથમ્ ।
તક્ષન્ધેનું સબર્દુઘામ્ ॥ ૧.૦૨૦.૦૩
યુવાના પિતરા પુનઃ સત્યમન્ત્રા ઋજૂયવઃ ।
ઋભવો વિષ્ટ્યક્રત ॥ ૧.૦૨૦.૦૪
સં વો મદાસો અગ્મતેન્દ્રેણ ચ મરુત્વતા ।
આદિત્યેભિશ્ચ રાજભિઃ ॥ ૧.૦૨૦.૦૫
ઉત ત્યં ચમસં નવં ત્વષ્ટુર્દેવસ્ય નિષ્કૃતમ્ ।
અકર્ત ચતુરઃ પુનઃ ॥ ૧.૦૨૦.૦૬

તે નો રત્નાનિ ધત્તન ત્રિરા સાપ્તાનિ સુન્વતે ।
એકમેકં સુશસ્તિભિઃ ॥ ૧.૦૨૦.૦૭
અધારયન્ત વહ્નયોઽભજન્ત સુકૃત્યયા ।
ભાગં દેવેષુ યજ્ઞિયમ્ ॥ ૧.૦૨૦.૦૮
ઇહેન્દ્રાગ્ની ઉપ હ્વયે તયોરિત્સ્તોમમુશ્મસિ ।
તા સોમં સોમપાતમા ॥ ૧.૦૨૧.૦૧
તા યજ્ઞેષુ પ્ર શંસતેન્દ્રાગ્ની શુમ્ભતા નરઃ ।
તા ગાયત્રેષુ ગાયત ॥ ૧.૦૨૧.૦૨
તા મિત્રસ્ય પ્રશસ્તય ઇન્દ્રાગ્ની તા હવામહે ।
સોમપા સોમપીતયે ॥ ૧.૦૨૧.૦૩
ઉગ્રા સન્તા હવામહ ઉપેદં સવનં સુતમ્ ।
ઇન્દ્રાગ્ની એહ ગચ્છતામ્ ॥ ૧.૦૨૧.૦૪
તા મહાન્તા સદસ્પતી ઇન્દ્રાગ્ની રક્ષ ઉબ્જતમ્ ।
અપ્રજાઃ સન્ત્વત્રિણઃ ॥ ૧.૦૨૧.૦૫
તેન સત્યેન જાગૃતમધિ પ્રચેતુને પદે ।
ઇન્દ્રાગ્ની શર્મ યચ્છતમ્ ॥ ૧.૦૨૧.૦૬
પ્રાતર્યુજા વિ બોધયાશ્વિનાવેહ ગચ્છતામ્ ।
અસ્ય સોમસ્ય પીતયે ॥ ૧.૦૨૨.૦૧
યા સુરથા રથીતમોભા દેવા દિવિસ્પૃશા ।
અશ્વિના તા હવામહે ॥ ૧.૦૨૨.૦૨
યા વાં કશા મધુમત્યશ્વિના સૂનૃતાવતી ।
તયા યજ્ઞં મિમિક્ષતમ્ ॥ ૧.૦૨૨.૦૩
નહિ વામસ્તિ દૂરકે યત્રા રથેન ગચ્છથઃ ।
અશ્વિના સોમિનો ગૃહમ્ ॥ ૧.૦૨૨.૦૪
હિરણ્યપાણિમૂતયે સવિતારમુપ હ્વયે ।
સ ચેત્તા દેવતા પદમ્ ॥ ૧.૦૨૨.૦૫
અપાં નપાતમવસે સવિતારમુપ સ્તુહિ ।

તસ્ય વ્રતાન્યુશ્મસિ ॥ ૧.૦૨૨.૦૬
વિભક્તારં હવામહે વસોશ્ચિત્રસ્ય રાધસઃ ।
સવિતારં નૃચક્ષસમ્ ॥ ૧.૦૨૨.૦૭
સખાય આ નિ ષીદત સવિતા સ્તોમ્યો નુ નઃ ।
દાતા રાધાંસિ શુમ્ભતિ ॥ ૧.૦૨૨.૦૮
અગ્ને પત્નીરિહા વહ દેવાનામુશતીરુપ ।
ત્વષ્ટારં સોમપીતયે ॥ ૧.૦૨૨.૦૯
આ ગ્ના અગ્ન ઇહાવસે હોત્રાં યવિષ્ઠ ભારતીમ્ ।
વરૂત્રીં ધિષણાં વહ ॥ ૧.૦૨૨.૧૦
અભિ નો દેવીરવસા મહઃ શર્મણા નૃપત્નીઃ ।
અચ્છિન્નપત્રાઃ સચન્તામ્ ॥ ૧.૦૨૨.૧૧
ઇહેન્દ્રાણીમુપ હ્વયે વરુણાનીં સ્વસ્તયે ।
અગ્નાયીં સોમપીતયે ॥ ૧.૦૨૨.૧૨
મહી દ્યૌઃ પૃથિવી ચ ન ઇમં યજ્ઞં મિમિક્ષતામ્ ।
પિપૃતાં નો ભરીમભિઃ ॥ ૧.૦૨૨.૧૩
તયોરિદ્ઘૃતવત્પયો વિપ્રા રિહન્તિ ધીતિભિઃ ।
ગન્ધર્વસ્ય ધ્રુવે પદે ॥ ૧.૦૨૨.૧૪
સ્યોના પૃથિવિ ભવાનૃક્ષરા નિવેશની ।
યચ્છા નઃ શર્મ સપ્રથઃ ॥ ૧.૦૨૨.૧૫
અતો દેવા અવન્તુ નો યતો વિષ્ણુર્વિચક્રમે ।
પૃથિવ્યાઃ સપ્ત ધામભિઃ ॥ ૧.૦૨૨.૧૬
ઇદં વિષ્ણુર્વિ ચક્રમે ત્રેધા નિ દધે પદમ્ ।
સમૂળ્હમસ્ય પાંસુરે ॥ ૧.૦૨૨.૧૭
ત્રીણિ પદા વિ ચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ ।
અતો ધર્માણિ ધારયન્ ॥ ૧.૦૨૨.૧૮
વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે ।
ઇન્દ્રસ્ય યુજ્યઃ સખા ॥ ૧.૦૨૨.૧૯

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૧.૦૨૨.૨૦
તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્પરમં પદમ્ ॥ ૧.૦૨૨.૨૧
તીવ્રાઃ સોમાસ આ ગહ્યાશીર્વન્તઃ સુતા ઇમે ।
વાયો તાન્પ્રસ્થિતાન્પિબ ॥ ૧.૦૨૩.૦૧
ઉભા દેવા દિવિસ્પૃશેન્દ્રવાયૂ હવામહે ।
અસ્ય સોમસ્ય પીતયે ॥ ૧.૦૨૩.૦૨
ઇન્દ્રવાયૂ મનોજુવા વિપ્રા હવન્ત ઊતયે ।
સહસ્રાક્ષા ધિયસ્પતી ॥ ૧.૦૨૩.૦૩
મિત્રં વયં હવામહે વરુણં સોમપીતયે ।
જજ્ઞાના પૂતદક્ષસા ॥ ૧.૦૨૩.૦૪
ઋતેન યાવૃતાવૃધાવૃતસ્ય જ્યોતિષસ્પતી ।
તા મિત્રાવરુણા હુવે ॥ ૧.૦૨૩.૦૫
વરુણઃ પ્રાવિતા ભુવન્મિત્રો વિશ્વાભિરૂતિભિઃ ।
કરતાં નઃ સુરાધસઃ ॥ ૧.૦૨૩.૦૬
મરુત્વન્તં હવામહ ઇન્દ્રમા સોમપીતયે ।
સજૂર્ગણેન તૃમ્પતુ ॥ ૧.૦૨૩.૦૭
ઇન્દ્રજ્યેષ્ઠા મરુદ્ગણા દેવાસઃ પૂષરાતયઃ ।
વિશ્વે મમ શ્રુતા હવમ્ ॥ ૧.૦૨૩.૦૮
હત વૃત્રં સુદાનવ ઇન્દ્રેણ સહસા યુજા ।
મા નો દુઃશંસ ઈશત ॥ ૧.૦૨૩.૦૯
વિશ્વાન્દેવાન્હવામહે મરુતઃ સોમપીતયે ।
ઉગ્રા હિ પૃશ્નિમાતરઃ ॥ ૧.૦૨૩.૧૦
જયતામિવ તન્યતુર્મરુતામેતિ ધૃષ્ણુયા ।
યચ્છુભં યાથના નરઃ ॥ ૧.૦૨૩.૧૧
હસ્કારાદ્વિદ્યુતસ્પર્યતો જાતા અવન્તુ નઃ ।

મરુતો મૃળયન્તુ નઃ ॥ ૧.૦૨૩.૧૨

આ પૂષઞ્ચિત્રબર્હિષમાઘૃણે ધરુણં દિવઃ ।

આજા નષ્ટં યથા પશુમ્ ॥ ૧.૦૨૩.૧૩

પૂષા રાજાનમાઘૃણિરપગૂળ્હં ગુહા હિતમ્ ।

અવિન્દચ્ચિત્રબર્હિષમ્ ॥ ૧.૦૨૩.૧૪

ઉતો સ મહ્યમિન્દુભિઃ ષડ્યુક્તાઁ અનુસેષિધત્ ।

ગોભિર્યવં ન ચર્કૃષત્ ॥ ૧.૦૨૩.૧૫

અમ્બયો યન્ત્યધ્વભિર્જામયો અધ્વરીયતામ્ ।

પૃઞ્ચતીર્મધુના પયઃ ॥ ૧.૦૨૩.૧૬

અમૂર્યા ઉપ સૂર્યે યાભિર્વા સૂર્યઃ સહ ।

તા નો હિન્વન્ત્વધ્વરમ્ ॥ ૧.૦૨૩.૧૭

અપો દેવીરુપ હ્વયે યત્ર ગાવઃ પિબન્તિ નઃ ।

સિન્ધુભ્યઃ કર્ત્વં હવિઃ ॥ ૧.૦૨૩.૧૮

અપ્સ્વ૧ન્તરમૃતમપ્સુ ભેષજમપામુત પ્રશસ્તયે ।

દેવા ભવત વાજિનઃ ॥ ૧.૦૨૩.૧૯

અપ્સુ મે સોમો અબ્રવીદન્તર્વિશ્વાનિ ભેષજા ।

અગ્નિં ચ વિશ્વશમ્ભુવમાપશ્ચ વિશ્વભેષજીઃ ॥ ૧.૦૨૩.૨૦

આપઃ પૃણીત ભેષજં વરૂથં તન્વે૩ મમ ।

જ્યોક્ચ સૂર્યં દૃશે ॥ ૧.૦૨૩.૨૧

ઇદમાપઃ પ્ર વહત યત્કિં ચ દુરિતં મયિ ।

યદ્વાહમભિદુદ્રોહ યદ્વા શેપ ઉતાનૃતમ્ ॥ ૧.૦૨૩.૨૨

આપો અદ્યાન્વચારિષં રસેન સમગસ્મહિ ।

પયસ્વાનગ્ન આ ગહિ તં મા સં સૃજ વર્ચસા ॥ ૧.૦૨૩.૨૩

સં માગ્ને વર્ચસા સૃજ સં પ્રજયા સમાયુષા ।

વિદ્યુર્મે અસ્ય દેવા ઇન્દ્રો વિદ્યાત્સહ ઋષિભિઃ ॥ ૧.૦૨૩.૨૪

કસ્ય નૂનં કતમસ્યામૃતાનાં મનામહે ચારુ દેવસ્ય નામ ।

કો નો મહ્યા અદિતયે પુનર્દાત્પિતરં ચ દૃશેયં માતરં ચ ॥ ૧.૦૨૪.૦૧

અગ્નેર્વયં પ્રથમસ્યામૃતાનાં મનામહે ચારુ દેવસ્ય નામ ।
સ નો મહ્યા અદિતયે પુનર્દાત્પિતરં ચ દૃશેયં માતરં ચ ॥ ૧.૦૨૪.૦૨
અભિ ત્વા દેવ સવિતરીશાનં વાર્યાણામ્ ।
સદાવન્ભાગમીમહે ॥ ૧.૦૨૪.૦૩
યશ્ચિદ્ધિ ત ઇત્થા ભગઃ શશમાનઃ પુરા નિદઃ ।
અદ્વેષો હસ્તયોર્દધે ॥ ૧.૦૨૪.૦૪
ભગભક્તસ્ય તે વયમુદશેમ તવાવસા ।
મૂર્ધાનં રાય આરભે ॥ ૧.૦૨૪.૦૫
નહિ તે ક્ષત્રં ન સહો ન મન્યું વયશ્ચનામી પતયન્ત આપુઃ ।
નેમા આપો અનિમિષં ચરન્તીર્ન યે વાતસ્ય પ્રમિનન્ત્યભ્વમ્ ॥ ૧.૦૨૪.૦૬
અબુધ્ને રાજા વરુણો વનસ્યોર્ધ્વં સ્તૂપં દદતે પૂતદક્ષઃ ।
નીચીનાઃ સ્થુરુપરિ બુધ્ન એષામસ્મે અન્તર્નિહિતાઃ કેતવઃ સ્યુઃ ॥ ૧.૦૨૪.૦૭
ઉરું હિ રાજા વરુણશ્ચકાર સૂર્યાય પન્થામન્વેતવા ઉ ।
અપદે પાદા પ્રતિધાતવેઽકરુતાપવક્તા હૃદયાવિધશ્ચિત્ ॥ ૧.૦૨૪.૦૮
શતં તે રાજન્ભિષજઃ સહસ્રમુર્વી ગભીરા સુમતિષ્ટે અસ્તુ ।
બાધસ્વ દૂરે નિરૃતિં પરાચૈઃ કૃતં ચિદેનઃ પ્ર મુમુગ્ધ્યસ્મત્ ॥ ૧.૦૨૪.૦૯
અમી ય ઋક્ષા નિહિતાસ ઉચ્ચા નક્તં દદૃશ્રે કુહ ચિદ્દિવેયુઃ ।
અદબ્ધાનિ વરુણસ્ય વ્રતાનિ વિચાકશચ્ચન્દ્રમા નક્તમેતિ ॥ ૧.૦૨૪.૧૦
તત્ત્વા યામિ બ્રહ્મણા વન્દમાનસ્તદા શાસ્તે યજમાનો હવિર્ભિઃ ।
અહેળમાનો વરુણેહ બોધ્યુરુશંસ મા ન આયુઃ પ્ર મોષીઃ ॥ ૧.૦૨૪.૧૧
તદિન્નક્તં તદ્દિવા મહ્યમાહુસ્તદયં કેતો હૃદ આ વિ ચષ્ટે ।
શુનઃશેપો યમહ્વદ્ગૃભીતઃ સો અસ્માન્રાજા વરુણો મુમોક્તુ ॥ ૧.૦૨૪.૧૨
શુનઃશેપો હ્યહ્વદ્ગૃભીતસ્ત્રિષ્વાદિત્યં દ્રુપદેષુ બદ્ધઃ ।
અવૈનં રાજા વરુણઃ સસૃજ્યાદ્વિદ્વાઁ અદબ્ધો વિ મુમોક્તુ પાશાન્ ॥ ૧.૦૨૪.૧૩
અવ તે હેળો વરુણ નમોભિરવ યજ્ઞેભિરીમહે હવિર્ભિઃ ।
ક્ષયન્નસ્મભ્યમસુર પ્રચેતા રાજન્નેનાંસિ શિશ્રથઃ કૃતાનિ ॥ ૧.૦૨૪.૧૪
ઉદુત્તમં વરુણ પાશમસ્મદવાધમં વિ મધ્યમં શ્રથાય ।

અથા વયમાદિત્ય વ્રતે તવાનાગસો અદિતયે સ્યામ ॥ ૧.૦૨૪.૧૫

યચ્ચિદ્ધિ તે વિશો યથા પ્ર દેવ વરુણ વ્રતમ્ ।
મિનીમસિ દ્યવિદ્યવિ ॥ ૧.૦૨૫.૦૧
મા નો વધાય હત્નવે જિહીળાનસ્ય રીરધઃ ।
મા હૃણાનસ્ય મન્યવે ॥ ૧.૦૨૫.૦૨
વિ મૃળીકાય તે મનો રથીરશ્વં ન સંદિતમ્ ।
ગીર્ભિર્વરુણ સીમહિ ॥ ૧.૦૨૫.૦૩
પરા હિ મે વિમન્યવઃ પતન્તિ વસ્યઇષ્ટયે ।
વયો ન વસતીરુપ ॥ ૧.૦૨૫.૦૪
કદા ક્ષત્રશ્રિયં નરમા વરુણં કરામહે ।
મૃળીકાયોરુચક્ષસમ્ ॥ ૧.૦૨૫.૦૫
તદિત્સમાનમાશાતે વેનન્તા ન પ્ર યુચ્છતઃ ।
ધૃતવ્રતાય દાશુષે ॥ ૧.૦૨૫.૦૬
વેદા યો વીનાં પદમન્તરિક્ષેણ પતતામ્ ।
વેદ નાવઃ સમુદ્રિયઃ ॥ ૧.૦૨૫.૦૭
વેદ માસો ધૃતવ્રતો દ્વાદશ પ્રજાવતઃ ।
વેદા ય ઉપજાયતે ॥ ૧.૦૨૫.૦૮
વેદ વાતસ્ય વર્તનિમુરોરૃષ્વસ્ય બૃહતઃ ।
વેદા યે અધ્યાસતે ॥ ૧.૦૨૫.૦૯
નિ ષસાદ ધૃતવ્રતો વરુણઃ પસ્ત્યાઉસ્વા ।
સામ્રાજ્યાય સુક્રતુઃ ॥ ૧.૦૨૫.૧૦
અતો વિશ્વાન્યદ્ભુતા ચિકિત્વાઁ અભિ પશ્યતિ ।
કૃતાનિ યા ચ કર્ત્વા ॥ ૧.૦૨૫.૧૧
સ નો વિશ્વાહા સુક્રતુરાદિત્યઃ સુપથા કરત્ ।
પ્ર ણ આયૂંષિ તારિષત્ ॥ ૧.૦૨૫.૧૨
બિભ્રદ્દ્રાપિં હિરણ્યયં વરુણો વસ્ત નિર્ણિજમ્ ।
પરિ સ્પશો નિ ષેદિરે ॥ ૧.૦૨૫.૧૩

ન યં દિપ્સન્તિ દિપ્સવો ન દ્રુહ્વાણો જનાનામ્ ।
ન દેવમભિમાતયઃ ॥ ૧.૦૨૫.૧૪
ઉત યો માનુષેષ્વા યશશ્ચક્રે અસામ્યા ।
અસ્માકમુદરેષ્વા ॥ ૧.૦૨૫.૧૫
પરા મે યન્તિ ધીતયો ગાવો ન ગવ્યૂતીરનુ ।
ઇચ્છન્તીરુરુચક્ષસમ્ ॥ ૧.૦૨૫.૧૬
સં નુ વોચાવહૈ પુનર્યતો મે મધ્વાભૃતમ્ ।
હોતેવ ક્ષદસે પ્રિયમ્ ॥ ૧.૦૨૫.૧૭
દર્શં નુ વિશ્વદર્શતં દર્શં રથમધિ ક્ષમિ ।
એતા જુષત મે ગિરઃ ॥ ૧.૦૨૫.૧૮
ઇમં મે વરુણ શ્રુધી હવમદ્યા ચ મૃળય ।
ત્વામવસ્યુરા ચકે ॥ ૧.૦૨૫.૧૯
ત્વં વિશ્વસ્ય મેધિર દિવશ્ચ ગ્મશ્ચ રાજસિ ।
સ યામનિ પ્રતિ શ્રુધિ ॥ ૧.૦૨૫.૨૦
ઉદુત્તમં મુમુગ્ધિ નો વિ પાશં મધ્યમં ચૃત ।
અવાધમાનિ જીવસે ॥ ૧.૦૨૫.૨૧

વસિષ્વા હિ મિયેધ્ય વસ્ત્રાણ્યૂર્જાં પતે ।
સેમં નો અધ્વરં યજ ॥ ૧.૦૨૬.૦૧
નિ નો હોતા વરેણ્યઃ સદા યવિષ્ઠ મન્મભિઃ ।
અગ્ને દિવિત્મતા વચઃ ॥ ૧.૦૨૬.૦૨
આ હિ ષ્મા સૂનવે પિતાપિર્યજત્યાપયે ।
સખા સખ્યે વરેણ્યઃ ॥ ૧.૦૨૬.૦૩
આ નો બર્હી રિશાદસો વરુણો મિત્રો અર્યમા ।
સીદન્તુ મનુષો યથા ॥ ૧.૦૨૬.૦૪
પૂર્વ્ય હોતરસ્ય નો મન્દસ્વ સખ્યસ્ય ચ ।
ઇમા ઉ ષુ શ્રુધી ગિરઃ ॥ ૧.૦૨૬.૦૫
યચ્ચિદ્ધિ શશ્વતા તના દેવંદેવં યજામહે ।

ત્વે ઇધ્દૂયતે હવિઃ ॥ ૧.૦૨૬.૦૬

પ્રિયો નો અસ્તુ વિશ્પતિર્હોતા મન્દ્રો વરેણ્યઃ ।

પ્રિયાઃ સ્વગ્નયો વયમ્ ॥ ૧.૦૨૬.૦૭

સ્વગ્નયો હિ વાર્યં દેવાસો દધિરે ચ નઃ ।

સ્વગ્નયો મનામહે ॥ ૧.૦૨૬.૦૮

અથા ન ઉભયેષામમૃત મર્ત્યાનામ્ ।

મિથઃ સન્તુ પ્રશસ્તયઃ ॥ ૧.૦૨૬.૦૯

વિશ્વેભિરગ્ને અગ્નિભિરિમં યજ્ઞમિદં વચઃ ।

ચનો ધાઃ સહસો યહો ॥ ૧.૦૨૬.૧૦

અશ્વં ન ત્વા વારવન્તં વન્દધ્યા અગ્નિં નમોભિઃ ।

સમ્રાજન્તમધ્વરાણામ્ ॥ ૧.૦૨૭.૦૧

સ ઘા નઃ સૂનુઃ શવસા પૃથુપ્રગામા સુશેવઃ ।

મીઢ્વાઁ અસ્માકં બભૂયાત્ ॥ ૧.૦૨૭.૦૨

સ નો દૂરાચ્ચાસાચ્ચ નિ મર્ત્યાદઘાયોઃ ।

પાહિ સદમિદ્વિશ્વાયુઃ ॥ ૧.૦૨૭.૦૩

ઇમમૂ ષુ ત્વમસ્માકં સનિં ગાયત્રં નવ્યાંસમ્ ।

અગ્ને દેવેષુ પ્ર વોચઃ ॥ ૧.૦૨૭.૦૪

આ નો ભજ પરમેષ્વા વાજેષુ મધ્યમેષુ ।

શિક્ષા વસ્વો અન્તમસ્ય ॥ ૧.૦૨૭.૦૫

વિભક્તાસિ ચિત્રભાનો સિન્ધોરૂર્મા ઉપાક આ ।

સદ્યો દાશુષે ક્ષરસિ ॥ ૧.૦૨૭.૦૬

યમગ્ને પૃત્સુ મર્ત્યમવા વાજેષુ યં જુનાઃ ।

સ યન્તા શશ્વતીરિષઃ ॥ ૧.૦૨૭.૦૭

નકિરસ્ય સહન્ત્ય પર્યેતા કયસ્ય ચિત્ ।

વાજો અસ્તિ શ્રવાય્યઃ ॥ ૧.૦૨૭.૦૮

સ વાજં વિશ્વચર્ષણિરર્વદ્ભિરસ્તુ તરુતા ।

વિપ્રેભિરસ્તુ સનિતા ॥ ૧.૦૨૭.૦૯

જરાબોધ તદ્વિવિડ્ઢિ વિશેવિશે યજ્ઞિયાય ।
સ્તોમં રુદ્રાય દૃશીકમ્ ॥ ૧.૦૨૭.૧૦
સ નો મહાઁ અનિમાનો ધૂમકેતુઃ પુરુશ્ચન્દ્રઃ ।
ધિયે વાજાય હિન્વતુ ॥ ૧.૦૨૭.૧૧
સ રેવાઁ ઇવ વિશ્પતિર્દૈવ્યઃ કેતુઃ શ◌ૃણોતુ નઃ ।
ઉક્થૈરગ્નિર્બૃહદ્ભાનુઃ ॥ ૧.૦૨૭.૧૨
નમો મહદ્ભ્યો નમો અર્ભકેભ્યો નમો યુવભ્યો નમ આશિનેભ્યઃ ।
યજામ દેવાન્યદિ શક્નવામ મા જ્યાયસઃ શંસમા વૃક્ષિ દેવાઃ ॥ ૧.૦૨૭.૧૩

યત્ર ગ્રાવા પૃથુબુધ્ન ઊર્ધ્વો ભવતિ સોતવે ।
ઉલૂખલસુતાનામવેદ્વિન્દ્ર જલ્ગુલઃ ॥ ૧.૦૨૮.૦૧
યત્ર દ્વાવિવ જઘનાધિષવણ્યા કૃતા ।
ઉલૂખલસુતાનામવેદ્વિન્દ્ર જલ્ગુલઃ ॥ ૧.૦૨૮.૦૨
યત્ર નાર્યપચ્યવમુપચ્યવં ચ શિક્ષતે ।
ઉલૂખલસુતાનામવેદ્વિન્દ્ર જલ્ગુલઃ ॥ ૧.૦૨૮.૦૩
યત્ર મન્થાં વિબધ્નતે રશ્મીન્યમિતવા ઇવ ।
ઉલૂખલસુતાનામવેદ્વિન્દ્ર જલ્ગુલઃ ॥ ૧.૦૨૮.૦૪
યચ્ચિદ્ધિ ત્વં ગૃહેગૃહ ઉલૂખલક યુજ્યસે ।
ઇહ દ્યુમત્તમં વદ જયતામિવ દુન્દુભિઃ ॥ ૧.૦૨૮.૦૫
ઉત સ્મ તે વનસ્પતે વાતો વિ વાત્યગ્રમિત્ ।
અથો ઇન્દ્રાય પાતવે સુનુ સોમમુલૂખલ ॥ ૧.૦૨૮.૦૬
આયજી વાજસાતમા તા હ્યુ૧ચ્ચા વિજર્ભૃતઃ ।
હરી ઇવાન્ધાંસિ બપ્સતા ॥ ૧.૦૨૮.૦૭
તા નો અદ્ય વનસ્પતી ઋષ્વાવૃષ્વેભિઃ સોતૃભિઃ ।
ઇન્દ્રાય મધુમત્સુતમ્ ॥ ૧.૦૨૮.૦૮
ઉચ્છિષ્ટં ચમ્વોર્ભર સોમં પવિત્ર આ સૃજ ।
નિ ધેહિ ગોરધિ ત્વચિ ॥ ૧.૦૨૮.૦૯

યચ્ચિદ્ધિ સત્ય સોમપા અનાશસ્તા ઇવ સ્મસિ ।

આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૧
શિપ્રિન્વાજાનાં પતે શચીવસ્તવ દંસના ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૨
નિ ષ્વાપયા મિથૂદૃશા સસ્તામબુધ્યમાને ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૩
સસન્તુ ત્યા અરાતયો બોધન્તુ શૂર રાતયઃ ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૪
સમિન્દ્ર ગર્દભં મૃણ નુવન્તં પાપયામુયા ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૫
પતાતિ કુણ્ડૃણાચ્યા દૂરં વાતો વનાદધિ ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૬
સર્વં પરિક્રોશં જહિ જમ્ભયા કૃકદાશ્વમ્ ।
આ તૂ ન ઇન્દ્ર શંસય ગોષ્વશ્વેષુ શુભ્રિષુ સહસ્રેષુ તુવીમઘ ॥ ૧.૦૨૯.૦૭

આ વ ઇન્દ્રં ક્રિવિં યથા વાજયન્તઃ શતક્રતુમ્ ।
મંહિષ્ઠં સિઞ્ચ ઇન્દુભિઃ ॥ ૧.૦૩૦.૦૧
શતં વા યઃ શુચીનાં સહસ્રં વા સમાશિરામ્ ।
એદુ નિમ્નં ન રીયતે ॥ ૧.૦૩૦.૦૨
સં યન્મદાય શુષ્મિણ એના હ્યસ્યોદરે ।
સમુદ્રો ન વ્યચો દધે ॥ ૧.૦૩૦.૦૩
અયમુ તે સમતસિ કપોત ઇવ ગર્ભધિમ્ ।
વચસ્તચ્ચિન્ન ઓહસે ॥ ૧.૦૩૦.૦૪
સ્તોત્રં રાધાનાં પતે ગિર્વાહો વીર યસ્ય તે ।
વિભૂતિરસ્તુ સૂનૃતા ॥ ૧.૦૩૦.૦૫
ઊર્ધ્વસ્તિષ્ઠા ન ઊતયેઽસ્મિન્વાજે શતક્રતો ।
સમન્યેષુ બ્રવાવહૈ ॥ ૧.૦૩૦.૦૬
યોગેયોગે તવસ્તરં વાજેવાજે હવામહે ।
સખાય ઇન્દ્રમૂતયે ॥ ૧.૦૩૦.૦૭

આ ઘા ગમદ્યદિ શ્રવત્સહસ્રિણીભિરૂતિભિઃ ।
વાજેભિરુપ નો હવમ્ ॥ ૧.૦૩૦.૦૮
અનુ પ્રત્નસ્યૌકસો હુવે તુવિપ્રતિં નરમ્ ।
યં તે પૂર્વં પિતા હુવે ॥ ૧.૦૩૦.૦૯
તં ત્વા વયં વિશ્વવારા શાસ્મહે પુરુહૂત ।
સખે વસો જરિતૃભ્યઃ ॥ ૧.૦૩૦.૧૦
અસ્માકં શિપ્રિણીનાં સોમપાઃ સોમપાવ્નામ્ ।
સખે વજ્રિન્સખીનામ્ ॥ ૧.૦૩૦.૧૧
તથા તદસ્તુ સોમપાઃ સખે વજ્રિન્તથા કૃણુ ।
યથા ત ઉશ્મસીષ્ટયે ॥ ૧.૦૩૦.૧૨
રેવતીર્નઃ સધમાદ ઇન્દ્રે સન્તુ તુવિવાજાઃ ।
ક્ષુમન્તો યાભિર્મદેમ ॥ ૧.૦૩૦.૧૩
આ ઘ ત્વાવાન્ત્મનાપ્તઃ સ્તોતૃભ્યો ધૃષ્ણવિયાનઃ ।
ઋણોરક્ષં ન ચક્ર્યોઃ ॥ ૧.૦૩૦.૧૪
આ યદ્દુવઃ શતક્રતવા કામં જરિતૄણામ્ ।
ઋણોરક્ષં ન શચીભિઃ ॥ ૧.૦૩૦.૧૫
શશ્વદિન્દ્રઃ પોપ્રુથદ્ભિર્જિગાય નાનદદ્ભિઃ શાશ્વસદ્ભિર્ધનાનિ ।
સ નો હિરણ્યરથં દંસનાવાન્સ નઃ સનિતા સનયે સ નોઽદાત્ ॥ ૧.૦૩૦.૧૬
આશ્વિનાવશ્વાવત્યેષા યાતં શવીરયા ।
ગોમદ્દસ્રા હિરણ્યવત્ ॥ ૧.૦૩૦.૧૭
સમાનયોજનો હિ વાં રથો દસ્રાવમર્ત્યઃ ।
સમુદ્રે અશ્વિનેયતે ॥ ૧.૦૩૦.૧૮
ન્યઘ્ન્યસ્ય મૂર્ધનિ ચક્રં રથસ્ય યેમથુઃ ।
પરિ દ્યામન્યદીયતે ॥ ૧.૦૩૦.૧૯
કસ્ત ઉષઃ કધપ્રિયે ભુજે મર્તો અમર્ત્યે ।
કં નક્ષસે વિભાવરિ ॥ ૧.૦૩૦.૨૦
વયં હિ તે અમન્મહ્યાન્તાદા પરાકાત્ ।

અશ્વે ન ચિત્રે અરુષિ ॥ ૧.૦૩૦.૨૧

ત્વં ત્યેભિરા ગહિ વાજેભિર્દુહિતર્દિવઃ ।

અસ્મે રયિં નિ ધારય ॥ ૧.૦૩૦.૨૨

ત્વમગ્ને પ્રથમો અઙ્ગિરા ઋષિર્દેવો દેવાનામભવઃ શિવઃ સખા ।

તવ વ્રતે કવયો વિદ્મનાપસોઽજાયન્ત મરુતો ભ્રાજદૃષ્ટયઃ ॥ ૧.૦૩૧.૦૧

ત્વમગ્ને પ્રથમો અઙ્ગિરસ્તમઃ કવિર્દેવાનાં પરિ ભૂષસિ વ્રતમ્ ।

વિભુર્વિશ્વસ્મૈ ભુવનાય મેધિરો દ્વિમાતા શયુઃ કતિધા ચિદાયવે ॥ ૧.૦૩૧.૦૨

ત્વમગ્ને પ્રથમો માતરિશ્વન આવિર્ભવ સુક્રતૂયા વિવસ્વતે ।

અરેજેતાં રોદસી હોતૃવૂર્યેઽસઘ્નોર્ભારમયજો મહો વસો ॥ ૧.૦૩૧.૦૩

ત્વમગ્ને મનવે દ્યામવાશયઃ પુરૂરવસે સુકૃતે સુકૃત્તરઃ ।

શ્વાત્રેણ યત્પિત્રોર્મુચ્યસે પર્યા ત્વા પૂર્વમનયન્નાપરં પુનઃ ॥ ૧.૦૩૧.૦૪

ત્વમગ્ને વૃષભઃ પુષ્ટિવર્ધન ઉદ્યતસ્રુચે ભવસિ શ્રવાય્યઃ ।

ય આહુતિં પરિ વેદા વષટ્કૃતિમેકાયુરગ્રે વિશ આવિવાસસિ ॥ ૧.૦૩૧.૦૫

ત્વમગ્ને વૃજિનવર્તનિં નરં સક્મન્પિપર્ષિ વિદથે વિચર્ષણે ।

યઃ શૂરસાતા પરિતક્મ્યે ધને દભ્રેભિશ્ચિત્સમૃતા હંસિ ભૂયસઃ ॥ ૧.૦૩૧.૦૬

ત્વં તમગ્ને અમૃતત્વ ઉત્તમે મર્તં દધાસિ શ્રવસે દિવેદિવે ।

યસ્તાતૃષાણ ઉભયાય જન્મને મયઃ કૃણોષિ પ્રય આ ચ સૂરયે ॥ ૧.૦૩૧.૦૭

ત્વં નો અગ્ને સનયે ધનાનાં યશસં કારું કૃણુહિ સ્તવાનઃ ।

ઋધ્યામ કર્માપસા નવેન દેવૈર્દ્યાવાપૃથિવી પ્રાવતં નઃ ॥ ૧.૦૩૧.૦૮

ત્વં નો અગ્ને પિત્રોરુપસ્થ આ દેવો દેવેષ્વનવદ્ય જાગૃવિઃ ।

તનૂકૃદ્બોધિ પ્રમતિશ્ચ કારવે ત્વં કલ્યાણ વસુ વિશ્વમોપિષે ॥ ૧.૦૩૧.૦૯

ત્વમગ્ને પ્રમતિસ્ત્વં પિતાસિ નસ્ત્વં વયસ્કૃત્તવ જામયો વયમ્ ।

સં ત્વા રાયઃ શતિનઃ સં સહસ્રિણઃ સુવીરં યન્તિ વ્રતપામદાભ્ય ॥ ૧.૦૩૧.૧૦

ત્વામગ્ને પ્રથમમાયુમાયવે દેવા અકૃણ્વન્નહુષસ્ય વિશ્પતિમ્ ।

ઇળામકૃણ્વન્મનુષસ્ય શાસનીં પિતુર્યત્પુત્રો મમકસ્ય જાયતે ॥ ૧.૦૩૧.૧૧

ત્વં નો અગ્ને તવ દેવ પાયુભિર્મઘોનો રક્ષ તન્વશ્ચ વન્દ્ય ।

ત્રાતા તોકસ્ય તનયે ગવામસ્યનિમેષં રક્ષમાણસ્તવ વ્રતે ॥ ૧.૦૩૧.૧૨

ત્વમગ્ને યજ્યવે પાયુરન્તરોઽનિષઙ્ગાય ચતુરક્ષ ઇધ્યસે ।
યો રાતહવ્યોઽવૃકાય ધાયસે કીરેશ્ચિન્મન્ત્રં મનસા વનોષિ તમ્ ॥ ૧.૦૩૧.૧૩
ત્વમગ્ન ઉરુશંસાય વાઘતે સ્પાર્હં યદ્રેક્ણઃ પરમં વનોષિ તત્ ।
આધ્રસ્ય ચિત્પ્રમતિરુચ્યસે પિતા પ્ર પાકં શાસ્સિ પ્ર દિશો વિદુષ્ટરઃ ॥ ૧.૦૩૧.૧૪
ત્વમગ્ને પ્રયતદક્ષિણં નરં વર્મેવ સ્યૂતં પરિ પાસિ વિશ્વતઃ ।
સ્વાદુક્ષદ્મા યો વસતૌ સ્યોનકૃજ્જીવયાજં યજતે સોપમા દિવઃ ॥ ૧.૦૩૧.૧૫
ઇમામગ્ને શરણિં મીમૃષો ન ઇમમધ્વાનં યમગામ દૂરાત્ ।
આપિઃ પિતા પ્રમતિઃ સોમ્યાનાં ભૃમિરસ્યૃષિકૃન્મર્ત્યાનામ્ ॥ ૧.૦૩૧.૧૬
મનુષ્વદગ્ને અઙ્ગિરસ્વદઙ્ગિરો યયાતિવત્સદને પૂર્વવચ્છુચે ।
અચ્છ યાહ્યા વહા દૈવ્યં જનમા સાદય બર્હિષિ યક્ષિ ચ પ્રિયમ્ ॥ ૧.૦૩૧.૧૭
એતેનાગ્ને બ્રહ્મણા વાવૃધસ્વ શક્તી વા યત્તે ચકૃમા વિદા વા ।
ઉત પ્ર ણેષ્યભિ વસ્યો અસ્માન્સં નઃ સૃજ સુમત્યા વાજવત્યા ॥ ૧.૦૩૧.૧૮

ઇન્દ્રસ્ય નુ વીર્યાણિ પ્ર વોચં યાનિ ચકાર પ્રથમાનિ વજ્રી ।
અહન્નહિમન્વપસ્તતર્દ પ્ર વક્ષણા અભિનત્પર્વતાનામ્ ॥ ૧.૦૩૨.૦૧
અહન્નહિં પર્વતે શિશ્રિયાણં ત્વષ્ટાસ્મૈ વજ્રં સ્વર્યં તતક્ષ ।
વાશ્રા ઇવ ધેનવઃ સ્યન્દમાના અઞ્જઃ સમુદ્રમવ જગ્મુરાપઃ ॥ ૧.૦૩૨.૦૨
વૃષાયમાણોઽવૃણીત સોમં ત્રિકદ્રુકેષ્વપિબત્સુતસ્ય ।
આ સાયકં મઘવાદત્ત વજ્રમહન્નેનં પ્રથમજામહીનામ્ ॥ ૧.૦૩૨.૦૩
યદિન્દ્રાહન્પ્રથમજામહીનામાન્માયિનામમિનાઃ પ્રોત માયાઃ ।
આત્સૂર્યં જનયન્દ્યામુષાસં તાદીત્ના શત્રું ન કિલા વિવિત્સે ॥ ૧.૦૩૨.૦૪
અહન્વૃત્રં વૃત્રતરં વ્યંસમિન્દ્રો વજ્રેણ મહતા વધેન ।
સ્કન્ધાંસીવ કુલિશેના વિવૃક્ણાહિઃ શયત ઉપપૃક્પૃથિવ્યાઃ ॥ ૧.૦૩૨.૦૫
અયોદ્ધેવ દુર્મદ આ હિ જુહ્વે મહાવીરં તુવિબાધમૃજીષમ્ ।
નાતારીદસ્ય સમૃતિં વધાનાં સં રુજાનાઃ પિપિષ ઇન્દ્રશત્રુઃ ॥ ૧.૦૩૨.૦૬
અપાદહસ્તો અપૃતન્યદિન્દ્રમાસ્ય વજ્રમધિ સાનૌ જઘાન ।
વૃષ્ણો વધ્રિઃ પ્રતિમાનં બુભૂષન્પુરુત્રા વૃત્રો અશયદ્વ્યસ્તઃ ॥ ૧.૦૩૨.૦૭
નદં ન ભિન્નમમુયા શયાનં મનો રુહાણા અતિ યન્ત્યાપઃ ।

યાશ્ચિદ્વૃત્રો મહિના પર્યતિષ્ઠત્તાસામહિઃ પત્સુતઃશીર્બભૂવ ॥ ૧.૦૩૨.૦૮
નીચાવયા અભવદ્વૃત્રપુત્રેન્દ્રો અસ્યા અવ વધર્જભાર ।
ઉત્તરા સૂરધરઃ પુત્ર આસીદ્દાનુઃ શયે સહવત્સા ન ધેનુઃ ॥ ૧.૦૩૨.૦૯
અતિષ્ઠન્તીનામનિવેશનાનાં કાષ્ઠાનાં મધ્યે નિહિતં શરીરમ્ ।
વૃત્રસ્ય નિણ્યં વિ ચરન્ત્યાપો દીર્ઘં તમ આશયદિન્દ્રશત્રુઃ ॥ ૧.૦૩૨.૧૦
દાસપત્નીરહિગોપા અતિષ્ઠન્નિરુદ્ધા આપઃ પણિનેવ ગાવઃ ।
અપાં બિલમપિહિતં યદાસીદ્વૃત્રં જઘન્વાઁ અપ તદ્વવાર ॥ ૧.૦૩૨.૧૧
અશ્વ્યો વારો અભવસ્તદિન્દ્ર સૃકે યત્ત્વા પ્રત્યહન્દેવ એકઃ ।
અજયો ગા અજયઃ શૂર સોમમવાસૃજઃ સર્તવે સપ્ત સિન્ધૂન્ ॥ ૧.૦૩૨.૧૨
નાસ્મૈ વિદ્યુન્ન તન્યતુઃ સિષેધ ન યાં મિહમકિરદ્ધ્રાદુનિં ચ ।
ઇન્દ્રશ્ચ યદ્યુયુધાતે અહિશ્ચોતાપરીભ્યો મઘવા વિ જિગ્યે ॥ ૧.૦૩૨.૧૩
અહેર્યાતારં કમપશ્ય ઇન્દ્ર હૃદિ યત્તે જઘ્નુષો ભીરગચ્છત્ ।
નવ ચ યન્નવતિં ચ સ્રવન્તીઃ શ્યેનો ન ભીતો અતરો રજાંસિ ॥ ૧.૦૩૨.૧૪
ઇન્દ્રો યાતોઽવસિતસ્ય રાજા શમસ્ય ચ શૃઙ્ગિણો વજ્રબાહુઃ ।
સેદુ રાજા ક્ષયતિ ચર્ષણીનામરાન્ન નેમિઃ પરિ તા બભૂવ ॥ ૧.૦૩૨.૧૫

એતાયામોપ ગવ્યન્ત ઇન્દ્રમસ્માકં સુ પ્રમતિં વાવૃધાતિ ।
અનામૃણઃ કુવિદાદસ્ય રાયો ગવાં કેતં પરમાવર્જતે નઃ ॥ ૧.૦૩૩.૦૧
ઉપેદહં ધનદામપ્રતીતં જુષ્ટાં ન શ્યેનો વસતિં પતામિ ।
ઇન્દ્રં નમસ્યન્નુપમેભિરર્કૈર્યઃ સ્તોતૃભ્યો હવ્યો અસ્તિ યામન્ ॥ ૧.૦૩૩.૦૨
નિ સર્વસેન ઇષુધીઁરસક્ત સમર્યો ગા અજતિ યસ્ય વષ્ટિ ।
ચોષ્કૂયમાણ ઇન્દ્ર ભૂરિ વામં મા પણિર્ભૂરસ્મદધિ પ્રવૃદ્ધ ॥ ૧.૦૩૩.૦૩
વધીર્હિ દસ્યું ધનિનં ઘનેનઁ એકશ્ચરન્નુપશાકેભિરિન્દ્ર ।
ધનોરધિ વિષુણક્તે વ્યાયન્નયજ્વાનઃ સનકાઃ પ્રેતિમીયુઃ ॥ ૧.૦૩૩.૦૪
પરા ચિચ્છીર્ષા વવૃજુસ્ત ઇન્દ્રાયજ્વાનો યજ્વભિઃ સ્પર્ધમાનાઃ ।
પ્ર યદ્દિવો હરિવઃ સ્થાતરુગ્ર નિરવ્રતાઁ અધમો રોદસ્યોઃ ॥ ૧.૦૩૩.૦૫
અયુયુત્સન્નનવદ્યસ્ય સેનામયાતયન્ત ક્ષિતયો નવગ્વાઃ ।
વૃષાયુધો ન વધ્રયો નિરષ્ટાઃ પ્રવદ્ભિરિન્દ્રાચ્ચિતયન્ત આયન્ ॥ ૧.૦૩૩.૦૬

ત્વમેતાન્રુદતો જક્ષતશ્ચાયોધયો રજસ ઇન્દ્ર પારે ।
અવાદહો દિવ આ દસ્યુમુચ્ચા પ્ર સુન્વતઃ સ્તુવતઃ શંસમાવઃ ॥ ૧.૦૩૩.૦૭
ચક્રાણાસઃ પરીણહં પૃથિવ્યા હિરણ્યેન મણિના શુમ્ભમાનાઃ ।
ન હિન્વાનાસસ્તિતિરુસ્ત ઇન્દ્રં પરિ સ્પશો અદધાત્સૂર્યેણ ॥ ૧.૦૩૩.૦૮
પરિ યદિન્દ્ર રોદસી ઉભે અબુભોજીર્મહિના વિશ્વતઃ સીમ્ ।
અમન્યમાનાઁ અભિ મન્યમાનૈર્નિર્બ્રહ્મભિરધમો દસ્યુમિન્દ્ર ॥ ૧.૦૩૩.૦૯
ન યે દિવઃ પૃથિવ્યા અન્તમાપુર્ન માયાભિર્ધનદાં પર્યભૂવન્ ।
યુજં વજ્રં વૃષભશ્ચક્ર ઇન્દ્રો નિર્જ્યોતિષા તમસો ગા અદુક્ષત્ ॥ ૧.૦૩૩.૧૦
અનુ સ્વધામક્ષરન્નાપો અસ્યાવર્ધત મધ્ય આ નાવ્યાનામ્ ।
સધ્રીચીનેન મનસા તમિન્દ્ર ઓજિષ્ઠેન હન્મનાહન્નભિ દ્યૂન્ ॥ ૧.૦૩૩.૧૧
ન્યાવિધ્યદિલીબિશસ્ય દૃળ્હા વિ શ‍ૃઙ્ગિણમભિનચ્છુષ્ણમિન્દ્રઃ ।
યાવત્તરો મઘવન્યાવદોજો વજ્રેણ શત્રુમવધીઃ પૃતન્યુમ્ ॥ ૧.૦૩૩.૧૨
અભિ સિધ્મો અજિગાદસ્ય શત્રૂન્વિ તિગ્મેન વૃષભેણા પુરોઽભેત્ ।
સં વજ્રેણાસૃજદ્વૃત્રમિન્દ્રઃ પ્ર સ્વાં મતિમતિરચ્છાશદાનઃ ॥ ૧.૦૩૩.૧૩
આવઃ કુત્સમિન્દ્ર યસ્મિઞ્ચાકન્પ્રાવો યુધ્યન્તં વૃષભં દશદ્યુમ્ ।
શફચ્યુતો રેણુર્નક્ષત દ્યામુચ્છ્વૈત્રેયો નૃષાહ્યાય તસ્થૌ ॥ ૧.૦૩૩.૧૪
આવઃ શમં વૃષભં તુગ્ર્યાસુ ક્ષેત્રજેષે મઘવઞ્છ્વિત્ર્યં ગામ્ ।
જ્યોક્ચિદત્ર તસ્થિવાંસો અક્રઞ્છત્રૂયતામધરા વેદનાકઃ ॥ ૧.૦૩૩.૧૫

ત્રિશ્ચિન્નો અદ્યા ભવતં નવેદસા વિભુર્વાં યામ ઉત રાતિરશ્વિના ।
યુવોર્હિ યન્ત્રં હિમ્યેવ વાસસોઽભ્યાયંસેન્યા ભવતં મનીષિભિઃ ॥ ૧.૦૩૪.૦૧
ત્રયઃ પવયો મધુવાહને રથે સોમસ્ય વેનામનુ વિશ્વ ઇદ્વિદુઃ ।
ત્રયઃ સ્કમ્ભાસઃ સ્કભિતાસ આરભે ત્રિર્નક્તં યાથસ્ત્રિર્વશ્વિના દિવા ॥ ૧.૦૩૪.૦૨
સમાને અહન્ત્રિરવદ્યગોહના ત્રિરદ્ય યજ્ઞં મધુના મિમિક્ષતમ્ ।
ત્રિર્વાજવતીરિષો અશ્વિના યુવં દોષા અસ્મભ્યમુષસશ્ચ પિન્વતમ્ ॥ ૧.૦૩૪.૦૩
ત્રિર્વર્તિર્યાતં ત્રિરનુવ્રતે જને ત્રિઃ સુપ્રાવ્યે ત્રેધેવ શિક્ષતમ્ ।
ત્રિર્નાન્દ્યં વહતમશ્વિના યુવં ત્રિઃ પૃક્ષો અસ્મે અક્ષરેવ પિન્વતમ્ ॥ ૧.૦૩૪.૦૪
ત્રિર્નો રયિં વહતમશ્વિના યુવં ત્રિર્દેવતાતા ત્રિરુતાવતં ધિયઃ ।

ત્રિઃ સૌભગત્વં ત્રિરુત શ્રવાંસિ નસ્ત્રિષ્ઠં વાં સૂરે દુહિતા રુહદ્રથમ્ ॥ ૧.૦૩૪.૦૫
ત્રિર્નો અશ્વિના દિવ્યાનિ ભેષજા ત્રિઃ પાર્થિવાનિ ત્રિરુ દત્તમદ્ભ્યઃ ।
ઓમાનં શંયોર્મમકાય સૂનવે ત્રિધાતુ શર્મ વહતં શુભસ્પતી ॥ ૧.૦૩૪.૦૬
ત્રિર્નો અશ્વિના યજતા દિવેદિવે પરિ ત્રિધાતુ પૃથિવીમશાયતમ્ ।
તિસ્રો નાસત્યા રથ્યા પરાવત આત્મેવ વાતઃ સ્વસરાણિ ગચ્છતમ્ ॥ ૧.૦૩૪.૦૭
ત્રિરશ્વિના સિન્ધુભિઃ સપ્તમાતૃભિસ્ત્રય આહાવાસ્ત્રેધા હવિષ્કૃતમ્ ।
તિસ્રઃ પૃથિવીરુપરિ પ્રવા દિવો નાકં રક્ષેથે દ્યુભિરક્તુભિર્હિતમ્ ॥ ૧.૦૩૪.૦૮
ક્વ૧ ત્રી ચક્રા ત્રિવૃતો રથસ્ય ક્વ૧ ત્રયો વન્ધુરો યે સનીળાઃ ।
કદા યોગો વાજિનો રાસભસ્ય યેન યજ્ઞં નાસત્યોપયાથઃ ॥ ૧.૦૩૪.૦૯
આ નાસત્યા ગચ્છતં હૂયતે હવિર્મધ્વઃ પિબતં મધુપેભિરાસભિઃ ।
યુવોર્હિ પૂર્વં સવિતોષસો રથમૃતાય ચિત્રં ઘૃતવન્તમિષ્યતિ ॥ ૧.૦૩૪.૧૦
આ નાસત્યા ત્રિભિરેકાદશૈરિહ દેવેભિર્યાતં મધુપેયમશ્વિના ।
પ્રાયુસ્તારિષ્ટં ની રપાંસિ મૃક્ષતં સેધતં દ્વેષો ભવતં સચાભુવા ॥ ૧.૦૩૪.૧૧
આ નો અશ્વિના ત્રિવૃતા રથેનાર્વાઞ્ચં રયિં વહતં સુવીરમ્ ।
શ઼ૃણ્વન્તા વામવસે જોહવીમિ વૃધે ચ નો ભવતં વાજસાતૌ ॥ ૧.૦૩૪.૧૨

હ્વયામ્યગ્નિં પ્રથમં સ્વસ્તયે હ્વયામિ મિત્રાવરુણાવિહાવસે ।
હ્વયામિ રાત્રીં જગતો નિવેશનીં હ્વયામિ દેવં સવિતારમૂતયે ॥ ૧.૦૩૫.૦૧
આ કૃષ્ણેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યં ચ ।
હિરણ્યયેન સવિતા રથેના દેવો યાતિ ભુવનાનિ પશ્યન્ ॥ ૧.૦૩૫.૦૨
યાતિ દેવઃ પ્રવતા યાત્યુદ્વતા યાતિ શુભ્રાભ્યાં યજતો હરિભ્યામ્ ।
આ દેવો યાતિ સવિતા પરાવતોઽપ વિશ્વા દુરિતા બાધમાનઃ ॥ ૧.૦૩૫.૦૩
અભીવૃતં કૃશનૈર્વિશ્વરૂપં હિરણ્યશમ્યં યજતો બૃહન્તમ્ ।
આસ્થાદ્રથં સવિતા ચિત્રભાનુઃ કૃષ્ણા રજાંસિ તવિષીં દધાનઃ ॥ ૧.૦૩૫.૦૪
વિ જનાઞ્છ્યાવાઃ શિતિપાદો અખ્યન્રથં હિરણ્યપ્રઉગં વહન્તઃ ।
શશ્વદ્વિશઃ સવિતુર્દૈવ્યસ્યોપસ્થે વિશ્વા ભુવનાનિ તસ્થુઃ ॥ ૧.૦૩૫.૦૫
તિસ્રો દ્યાવઃ સવિતુર્દ્વા ઉપસ્થા઼઼ઁ એકા યમસ્ય ભુવને વિરાષાટ્ ।
આણિં ન રથ્યમમૃતાધિ તસ્થુરિહ બ્રવીતુ ય ઉ તચ્ચિકેતત્ ॥ ૧.૦૩૫.૦૬

વિ સુપર્ણો અન્તરિક્ષાણ્યખ્યદ્ગભીરવેપા અસુરઃ સુનીથઃ ।
ક્વેઽદાનીં સૂર્યઃ કશ્ચિકેત કતમાં દ્યાં રશ્મિરસ્યા તતાન ॥ ૧.૦૩૫.૦૭
અષ્ટૌ વ્યખ્યત્કકુભઃ પૃથિવ્યાસ્ત્રી ધન્વ યોજના સપ્ત સિન્ધૂન્ ।
હિરણ્યાક્ષઃ સવિતા દેવ આગાદ્દધદ્રત્ના દાશુષે વાર્યાણિ ॥ ૧.૦૩૫.૦૮
હિરણ્યપાણિઃ સવિતા વિચર્ષણિરુભે દ્યાવાપૃથિવી અન્તરીયતે ।
અપામીવાં બાધતે વેતિ સૂર્યમભિ કૃષ્ણેન રજસા દ્યામૃણોતિ ॥ ૧.૦૩૫.૦૯
હિરણ્યહસ્તો અસુરઃ સુનીથઃ સુમૃળીકઃ સ્વવાઁ યાત્વર્વાઙ્ ।
અપસેધન્રક્ષસો યાતુધાનાનસ્થાદ્દેવઃ પ્રતિદોષં ગૃણાનઃ ॥ ૧.૦૩૫.૧૦
યે તે પન્થાઃ સવિતઃ પૂર્વ્યાસોઽરેણવઃ સુકૃતા અન્તરિક્ષે ।
તેભિર્નો અદ્ય પથિભિઃ સુગેભી રક્ષા ચ નો અધિ ચ બ્રૂહિ દેવ ॥ ૧.૦૩૫.૧૧

પ્ર વો યહ્વં પુરૂણાં વિશાં દેવયતીનામ્ ।
અગ્નિં સૂક્તેભિર્વચોભિરીમહે યં સીમિદન્ય ઈળતે ॥ ૧.૦૩૬.૦૧
જનાસો અગ્નિં દધિરે સહોવૃધં હવિષ્મન્તો વિધેમ તે ।
સ ત્વં નો અદ્ય સુમના ઇહાવિતા ભવા વાજેષુ સન્ત્ય ॥ ૧.૦૩૬.૦૨
પ્ર ત્વા દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।
મહસ્તે સતો વિ ચરન્ત્યર્ચયો દિવિ સ્પૃશન્તિ ભાનવઃ ॥ ૧.૦૩૬.૦૩
દેવાસસ્ત્વા વરુણો મિત્રો અર્યમા સં દૂતં પ્રત્નમિન્ધતે ।
વિશ્વં સો અગ્ને જયતિ ત્વયા ધનં યસ્તે દદાશ મર્ત્યઃ ॥ ૧.૦૩૬.૦૪
મન્દ્રો હોતા ગૃહપતિરગ્ને દૂતો વિશામસિ ।
ત્વે વિશ્વા સંગતાનિ વ્રતા ધ્રુવા યાનિ દેવા અકૃણ્વત ॥ ૧.૦૩૬.૦૫
ત્વે ઇદગ્ને સુભગે યવિષ્ઠ્ય વિશ્વમા હૂયતે હવિઃ ।
સ ત્વં નો અદ્ય સુમના ઉતાપરં યક્ષિ દેવાન્સુવીર્યા ॥ ૧.૦૩૬.૦૬
તં ઘેમિત્થા નમસ્વિન ઉપ સ્વરાજમાસતે ।
હોત્રાભિરગ્નિં મનુષઃ સમિન્ધતે તિતિર્વાંસો અતિ સ્રિધઃ ॥ ૧.૦૩૬.૦૭
ઘ્નન્તો વૃત્રમતરન્રોદસી અપ ઉરુ ક્ષયાય ચક્રિરે ।
ભુવત્કણ્વે વૃષા દ્યુમ્ન્યાહુતઃ ક્રન્દદશ્વો ગવિષ્ટિષુ ॥ ૧.૦૩૬.૦૮
સં સીદસ્વ મહાઁ અસિ શોચસ્વ દેવવીતમઃ ।

વિ ધૂમમગ્ને અરુષં મિયેધ્ય સૃજ પ્રશસ્ત દર્શતમ્ ॥ ૧.૦૩૬.૦૯
યં ત્વા દેવાસો મનવે દધુરિહ યજિષ્ઠં હવ્યવાહન ।
યં કણ્વો મેધ્યાતિથિર્ધનસ્પૃતં યં વૃષા યમુપસ્તુતઃ ॥ ૧.૦૩૬.૧૦
યમગ્નિં મેધ્યાતિથિઃ કણ્વ ઈધ ઋતાદધિ ।
તસ્ય પ્રેષો દીદિયુસ્તમિમા ઋચસ્તમગ્નિં વર્ધયામસિ ॥ ૧.૦૩૬.૧૧
રાયસ્પૂર્ધિ સ્વધાવોઽસ્તિ હિ તેઽગ્ને દેવેષ્વાપ્યમ્ ।
ત્વં વાજસ્ય શ્રુત્યસ્ય રાજસિ સ નો મૃળ મહાઁ અસિ ॥ ૧.૦૩૬.૧૨
ઊર્ધ્વ ઊ ષુ ણ ઊતયે તિષ્ઠા દેવો ન સવિતા ।
ઊર્ધ્વો વાજસ્ય સનિતા યદઞ્જિભિર્વાઘદ્ભિર્વિહ્વયામહે ॥ ૧.૦૩૬.૧૩
ઊર્ધ્વો નઃ પાહ્યંહસો નિ કેતુના વિશ્વં સમત્રિણં દહ ।
કૃધી ન ઊર્ધ્વાઞ્ચરથાય જીવસે વિદા દેવેષુ નો દુવઃ ॥ ૧.૦૩૬.૧૪
પાહિ નો અગ્ને રક્ષસઃ પાહિ ધૂર્તેરરાવ્ણઃ ।
પાહિ રીષત ઉત વા જિઘાંસતો બૃહદ્ભાનો યવિષ્ઠ્ય ॥ ૧.૦૩૬.૧૫
ઘનેવ વિષ્વગ્વિ જહ્યરાવ્ણસ્તપુર્જમ્ભ યો અસ્મધ્રુક્ ।
યો મર્ત્યઃ શિશીતે અત્યક્તુભિર્મા નઃ સ રિપુરીશત ॥ ૧.૦૩૬.૧૬
અગ્નિર્વવ્ને સુવીર્યમગ્નિઃ કણ્વાય સૌભગમ્ ।
અગ્નિઃ પ્રાવન્મિત્રોત મેધ્યાતિથિમગ્નિઃ સાતા ઉપસ્તુતમ્ ॥ ૧.૦૩૬.૧૭
અગ્નિના તુર્વશં યદું પરાવત ઉગ્રાદેવં હવામહે ।
અગ્નિર્નયન્નવવાસ્ત્વં બૃહદ્રથં તુર્વીતિં દસ્યવે સહઃ ॥ ૧.૦૩૬.૧૮
નિ ત્વામગ્ને મનુર્દધે જ્યોતિર્જનાય શશ્વતે ।
દીદેથ કણ્વ ઋતજાત ઉક્ષિતો યં નમસ્યન્તિ કૃષ્ટયઃ ॥ ૧.૦૩૬.૧૯
ત્વેષાસો અગ્નેરમવન્તો અર્ચયો ભીમાસો ન પ્રતીતયે ।
રક્ષસ્વિનઃ સદમિદ્યાતુમાવતો વિશ્વં સમત્રિણં દહ ॥ ૧.૦૩૬.૨૦
ક્રીળં વઃ શર્ધો મારુતમનર્વાણં રથેશુભમ્ ।
કણ્વા અભિ પ્ર ગાયત ॥ ૧.૦૩૭.૦૧
યે પૃષતીભિરૃષ્ટિભિઃ સાકં વાશીભિરઞ્જિભિઃ ।
અજાયન્ત સ્વભાનવઃ ॥ ૧.૦૩૭.૦૨

ઇહેવ શૃણ્વ એષાં કશા હસ્તેષુ યદ્વદાન્ ।
નિ યામઞ્ચિત્રમૃઞ્જતે ॥ ૧.૦૩૭.૦૩
પ્ર વઃ શર્ધાય ઘૃષ્વયે ત્વેષદ્યુમ્નાય શુષ્મિણે ।
દેવત્તં બ્રહ્મ ગાયત ॥ ૧.૦૩૭.૦૪
પ્ર શંસા ગોષ્વઘ્ન્યં ક્રીળં યચ્છર્ધો મારુતમ્ ।
જમ્ભે રસસ્ય વાવૃધે ॥ ૧.૦૩૭.૦૫
કો વો વર્ષિષ્ઠ આ નરો દિવશ્ચ ગ્મશ્ચ ધૂતયઃ ।
યત્સીમન્તં ન ધૂનુથ ॥ ૧.૦૩૭.૦૬
નિ વો યામાય માનુષો દધ્ર ઉગ્રાય મન્યવે ।
જિહીત પર્વતો ગિરિઃ ॥ ૧.૦૩૭.૦૭
યેષામજ્મેષુ પૃથિવી જુજુર્વાઁ ઇવ વિશ્પતિઃ ।
ભિયા યામેષુ રેજતે ॥ ૧.૦૩૭.૦૮
સ્થિરં હિ જાનમેષાં વયો માતુર્નિરેતવે ।
યત્સીમનુ દ્વિતા શવઃ ॥ ૧.૦૩૭.૦૯
ઉદુ ત્યે સૂનવો ગિરઃ કાષ્ઠા અજ્મેષ્વત્નત ।
વાશ્રા અભિજ્ઞુ યાતવે ॥ ૧.૦૩૭.૧૦
ત્યં ચિદ્ઘા દીર્ઘં પૃથું મિહો નપાતમમૃધ્રમ્ ।
પ્ર ચ્યાવયન્તિ યામભિઃ ॥ ૧.૦૩૭.૧૧
મરુતો યદ્ધ વો બલં જનાઁ અચુચ્યવીતન ।
ગિરીઁરચુચ્યવીતન ॥ ૧.૦૩૭.૧૨
યદ્ધ યાન્તિ મરુતઃ સં હ બ્રુવતેઽધ્વન્ના ।
શૃણોતિ કશ્ચિદેષામ્ ॥ ૧.૦૩૭.૧૩
પ્ર યાત શીભમાશુભિઃ સન્તિ કણ્વેષુ વો દુવઃ ।
તત્રો ષુ માદયાધ્વૈ ॥ ૧.૦૩૭.૧૪
અસ્તિ હિ ષ્મા મદાય વઃ સ્મસિ ષ્મા વયમેષામ્ ।
વિશ્વં ચિદાયુર્જીવસે ॥ ૧.૦૩૭.૧૫
કદ્ધ નૂનં કધપ્રિયઃ પિતા પુત્રં ન હસ્તયોઃ ।

દધિધ્વે વૃક્તબર્હિષઃ ॥ ૧.૦૩૮.૦૧
ક્વ નૂનં કદ્ધો અર્થં ગન્તા દિવો ન પૃથિવ્યાઃ ।
ક્વ વો ગાવો ન રણ્યન્તિ ॥ ૧.૦૩૮.૦૨
ક્વ વઃ સુમ્ના નવ્યાંસિ મરુતઃ ક્વ સુવિતા ।
ક્વોઽ વિશ્વાનિ સૌભગા ॥ ૧.૦૩૮.૦૩
યદ્યૂયં પૃશ્નિમાતરો મર્તાસઃ સ્યાતન ।
સ્તોતા વો અમૃતઃ સ્યાત્ ॥ ૧.૦૩૮.૦૪
મા વો મૃગો ન યવસે જરિતા ભૂદજોષ્યઃ ।
પથા યમસ્ય ગાદુપ ॥ ૧.૦૩૮.૦૫
મો ષુ ણઃ પરાપરા નિરૃતિર્દુર્હણા વધીત્ ।
પદીષ્ટ તૃષ્ણયા સહ ॥ ૧.૦૩૮.૦૬
સત્યં ત્વેષા અમવન્તો ધન્વઞ્ચિદા રુદ્રિયાસઃ ।
મિહં કૃણ્વન્ત્યવાતામ્ ॥ ૧.૦૩૮.૦૭
વાશ્રેવ વિદ્યુન્મિમાતિ વત્સં ન માતા સિષક્તિ ।
યદેષાં વૃષ્ટિરસર્જિ ॥ ૧.૦૩૮.૦૮
દિવા ચિત્તમઃ કૃણ્વન્તિ પર્જન્યેનોદવાહેન ।
યત્પૃથિવીં વ્યુન્દન્તિ ॥ ૧.૦૩૮.૦૯
અધ સ્વનાન્મરુતાં વિશ્વમા સદ્મ પાર્થિવમ્ ।
અરેજન્ત પ્ર માનુષાઃ ॥ ૧.૦૩૮.૧૦
મરુતો વીળુપાણિભિશ્ચિત્રા રોધસ્વતીરનુ ।
યાતેમખિદ્રયામભિઃ ॥ ૧.૦૩૮.૧૧
સ્થિરા વઃ સન્તુ નેમયો રથા અશ્વાસ એષામ્ ।
સુસંસ્કૃતા અભીશવઃ ॥ ૧.૦૩૮.૧૨
અચ્છા વદા તના ગિરા જરાયૈ બ્રહ્મણસ્પતિમ્ ।
અગ્નિં મિત્રં ન દર્શતમ્ ॥ ૧.૦૩૮.૧૩
મિમીહિ શ્લોકમાસ્યે પર્જન્ય ઇવ તતનઃ ।
ગાય ગાયત્રમુક્થ્યમ્ ॥ ૧.૦૩૮.૧૪

વન્દસ્વ  મારુતં ગણં ત્વેષં પનસ્યુમર્કિણમ્ ।
અસ્મે વૃદ્ધા અસન્નિહ ॥ ૧.૦૩૮.૧૫

પ્ર યદિત્થા પરાવતઃ  શોચિર્ન માનમસ્યથ ।
કસ્ય  ક્રત્વા  મરુતઃ  કસ્ય  વર્પસા  કં યાથ  કં હ  ધૂતયઃ ॥ ૧.૦૩૯.૦૧
સ્થિરા વઃ  સન્ત્વાયુધા પરાણુદે  વીળૂ ઉત પ્રતિષ્કભે  ।
યુષ્માકમસ્તુ  તવિષી  પનીયસી  મા મર્ત્યસ્ય માયિનઃ  ॥ ૧.૦૩૯.૦૨
પરા  હ  યત્સ્થિરં હથ નરો  વર્તયથા ગુરુ ।
વિ યાથન વનિનઃ  પૃથિવ્યા વ્યાશાઃ  પર્વતાનામ્ ॥ ૧.૦૩૯.૦૩
નહિ વઃ  શત્રુર્વિવિદે અધિ  દ્યવિ  ન ભૂમ્યાં  રિશાદસઃ ।
યુષ્માકમસ્તુ  તવિષી  તના  યુજા રુદ્રાસો  નૂ ચિદાધૃષે  ॥ ૧.૦૩૯.૦૪
પ્ર વેપયન્તિ  પર્વતાન્વિ વિઞ્ચન્તિ  વનસ્પતીન્ ।
પ્રો આરત મરુતો દુર્મદા  ઇવ  દેવાસઃ  સર્વયા વિશા ॥ ૧.૦૩૯.૦૫
ઉપો  રથેષુ  પૃષતીરયુગ્ધ્વં  પ્રષ્ટિર્વહતિ  રોહિતઃ ।
આ વો  યામાય પૃથિવી ચિદશ્રોદબીભયન્ત  માનુષાઃ ॥ ૧.૦૩૯.૦૬
આ વો  મક્ષૂ તનાય  કં રુદ્રા  અવો  વૃણીમહે ।
ગન્તા  નૂનં નોઽવસા  યથા  પુરેત્થા કણ્વાય બિભ્યુષે  ॥ ૧.૦૩૯.૦૭
યુષ્મેષિતો મરુતો  મર્ત્યેષિત  આ યો નો  અભ્વ  ઈષતે ।
વિ તં યુયોત  શવસા  વ્યોજસા  વિ યુષ્માકાભિરૂતિભિઃ  ॥ ૧.૦૩૯.૦૮
અસામિ  હિ પ્રયજ્યવઃ  કણ્વં  દદ પ્રચેતસઃ ।
અસામિભિર્મરુત  આ ન  ઊતિભિર્ગન્તા  વૃષ્ટિં ન વિદ્યુતઃ  ॥ ૧.૦૩૯.૦૯
અસામ્યોજો  બિભૃથા સુદાનવોઽસામિ ધૂતયઃ  શવઃ  ।
ઋષિદ્વિષે  મરુતઃ પરિમન્યવ  ઇષું  ન સૃજત  દ્વિષમ્ ॥ ૧.૦૩૯.૧૦

ઉત્તિષ્ઠ બ્રહ્મણસ્પતે દેવયન્તસ્ત્વેમહે ।
ઉપ  પ્ર યન્તુ મરુતઃ  સુદાનવ  ઇન્દ્ર  પ્રાશૂર્ભવા  સચા  ॥ ૧.૦૪૦.૦૧
ત્વામિદ્ધિ સહસસ્પુત્ર  મર્ત્ય  ઉપબ્રૂતે ધને  હિતે ।
સુવીર્યં  મરુત  આ સ્વશ્વ્યં  દધીત  યો વ  આચકે ॥ ૧.૦૪૦.૦૨
પ્રૈતુ  બ્રહ્મણસ્પતિઃ  પ્ર દેવ્યેતુ સૂનૃતા  ।

અચ્છા વીરં નર્યં પઙ્ક્તિરાધસં દેવા યજ્ઞં નયન્તુ નઃ ॥ ૧.૦૪૦.૦૩

યો વાઘતે દદાતિ સૂનરં વસુ સ ધત્તે અક્ષિતિ શ્રવઃ ।

તસ્મા ઇળાં સુવીરામા યજામહે સુપ્રતૂર્તિમનેહસમ્ ॥ ૧.૦૪૦.૦૪

પ્ર નૂનં બ્રહ્મણસ્પતિર્મન્ત્રં વદત્યુક્થ્યમ્ ।

યસ્મિન્નિન્દ્રો વરુણો મિત્રો અર્યમા દેવા ઓકાંસિ ચક્રિરે ॥ ૧.૦૪૦.૦૫

તમિદ્વોચેમા વિદથેષુ શમ્ભુવં મન્ત્રં દેવા અનેહસમ્ ।

ઇમાં ચ વાચં પ્રતિહર્યથા નરો વિશ્વેદ્વામા વો અશ્નવત્ ॥ ૧.૦૪૦.૦૬

કો દેવયન્તમશ્નવજ્જનં કો વૃક્તબર્હિષમ્ ।

પ્રપ્ર દાશ્વાન્પસ્ત્યાભિરસ્થિતાન્તર્વાવત્ક્ષયં દધે ॥ ૧.૦૪૦.૦૭

ઉપ ક્ષત્રં પૃઞ્ચીત હન્તિ રાજભિર્ભયે ચિત્સુક્ષિતિં દધે ।

નાસ્ય વર્તા ન તરુતા મહાધને નાર્ભે અસ્તિ વજ્રિણઃ ॥ ૧.૦૪૦.૦૮

યં રક્ષન્તિ પ્રચેતસો વરુણો મિત્રો અર્યમા ।

નૂ ચિત્સ દભ્યતે જનઃ ॥ ૧.૦૪૧.૦૧

યં બાહુતેવ પિપ્રતિ પાન્તિ મર્ત્યં રિષઃ ।

અરિષ્ટઃ સર્વ એધતે ॥ ૧.૦૪૧.૦૨

વિ દુર્ગા વિ દ્વિષઃ પુરો ઘ્નન્તિ રાજાન એષામ્ ।

નયન્તિ દુરિતા તિરઃ ॥ ૧.૦૪૧.૦૩

સુગઃ પન્થા અનૃક્ષર આદિત્યાસ ઋતં યતે ।

નાત્રાવખાદો અસ્તિ વઃ ॥ ૧.૦૪૧.૦૪

યં યજ્ઞં નયથા નર આદિત્યા ઋજુના પથા ।

પ્ર વઃ સ ધીતયે નશત્ ॥ ૧.૦૪૧.૦૫

સ રત્નં મર્ત્યો વસુ વિશ્વં તોકમુત ત્મના ।

અચ્છા ગચ્છત્યસ્તૃતઃ ॥ ૧.૦૪૧.૦૬

કથા રાધામ સખાયઃ સ્તોમં મિત્રસ્યાર્યમ્ણઃ ।

મહિ પ્સરો વરુણસ્ય ॥ ૧.૦૪૧.૦૭

મા વો ઘ્નન્તં મા શપન્તં પ્રતિ વોચે દેવયન્તમ્ ।

સુમ્નૈરિદ્વ આ વિવાસે ॥ ૧.૦૪૧.૦૮

ચતુરશ્રિદ્દમાનાદ્બિભીયાદા નિધાતોઃ ।
ન દુરુક્તાય સ્પૃહયેત્ ॥ ૧.૦૪૧.૦૯

સં પૂષન્નધ્વનસ્તિર વ્યંહો વિમુચો નપાત્ ।
સક્ષ્વા દેવ પ્ર ણસ્પુરઃ ॥ ૧.૦૪૨.૦૧
યો નઃ પૂષન્નઘો વૃકો દુઃશેવ આદિદેશતિ ।
અપ સ્મ તં પથો જહિ ॥ ૧.૦૪૨.૦૨
અપ ત્યં પરિપન્થિનં મુષીવાણં હુરશ્ચિતમ્ ।
દૂરમધિ સ્રુતેરજ ॥ ૧.૦૪૨.૦૩
ત્વં તસ્ય દ્વયાવિનોઽઘશંસસ્ય કસ્ય ચિત્ ।
પદાભિ તિષ્ઠ તપુષિમ્ ॥ ૧.૦૪૨.૦૪
આ તત્તે દસ્ર મન્તુમઃ પૂષન્નવો વૃણીમહે ।
યેન પિતૄનચોદયઃ ॥ ૧.૦૪૨.૦૫
અધા નો વિશ્વસૌભગ હિરણ્યવાશીમત્તમ ।
ધનાનિ સુષણા કૃધિ ॥ ૧.૦૪૨.૦૬
અતિ નઃ સશ્ચતો નય સુગા નઃ સુપથા કૃણુ ।
પૂષન્નિહ ક્રતું વિદઃ ॥ ૧.૦૪૨.૦૭
અભિ સૂયવસં નય ન નવજ્વારો અધ્વને ।
પૂષન્નિહ ક્રતું વિદઃ ॥ ૧.૦૪૨.૦૮
શગ્ધિ પૂર્ધિ પ્ર યંસિ ચ શિશીહિ પ્રાસ્યુદરમ્ ।
પૂષન્નિહ ક્રતું વિદઃ ॥ ૧.૦૪૨.૦૯
ન પૂષણં મેથામસિ સૂક્તૈરભિ ગૃણીમસિ ।
વસૂનિ દસ્મમીમહે ॥ ૧.૦૪૨.૧૦

કદ્રુદ્રાય પ્રચેતસે મીળ્હુષ્ટમાય તવ્યસે ।
વોચેમ શંતમં હૃદે ॥ ૧.૦૪૩.૦૧
યથા નો અદિતિઃ કરત્પશ્વે નૃભ્યો યથા ગવે ।
યથા તોકાય રુદ્રિયમ્ ॥ ૧.૦૪૩.૦૨
યથા નો મિત્રો વરુણો યથા રુદ્રશ્ચિકેતતિ ।

યથા વિશ્વે સજોષસઃ ॥ ૧.૦૪૩.૦૩

ગાથપતિં મેધપતિં રુદ્રં જલાષભેષજમ્ ।

તચ્છંયોઃ સુમ્નમીમહે ॥ ૧.૦૪૩.૦૪

યઃ શુક્ર ઇવ સૂર્યો હિરણ્યમિવ રોચતે ।

શ્રેષ્ઠો દેવાનાં વસુઃ ॥ ૧.૦૪૩.૦૫

શં નઃ કરત્યર્વતે સુગં મેષાય મેષ્યે ।

નૃભ્યો નારિભ્યો ગવે ॥ ૧.૦૪૩.૦૬

અસ્મે સોમ શ્રિયમધિ નિ ધેહિ શતસ્ય નૃણામ્ ।

મહિ શ્રવસ્તુવિનૃમ્ણમ્ ॥ ૧.૦૪૩.૦૭

મા નઃ સોમપરિબાધો મારાતયો જુહુરન્ત ।

આ ન ઇન્દો વાજે ભજ ॥ ૧.૦૪૩.૦૮

યાસ્તે પ્રજા અમૃતસ્ય પરસ્મિન્ધામન્નૃતસ્ય ।

મૂર્ધા નાભા સોમ વેન આભૂષન્તીઃ સોમ વેદઃ ॥ ૧.૦૪૩.૦૯

અગ્ને વિવસ્વદુષસશ્ચિત્રં રાધો અમર્ત્ય ।

આ દાશુષે જાતવેદો વહા ત્વમદ્યા દેવાઁ ઉષર્બુધઃ ॥ ૧.૦૪૪.૦૧

જુષ્ટો હિ દૂતો અસિ હવ્યવાહનોઽગ્ને રથીરધ્વરાણામ્ ।

સજૂરશ્વિભ્યામુષસા સુવીર્યમસ્મે ધેહિ શ્રવો બૃહત્ ॥ ૧.૦૪૪.૦૨

અદ્યા દૂતં વૃણીમહે વસુમગ્નિં પુરુપ્રિયમ્ ।

ધૂમકેતું ભાઋજીકં વ્યુષ્ટિષુ યજ્ઞાનામધ્વરશ્રિયમ્ ॥ ૧.૦૪૪.૦૩

શ્રેષ્ઠં યવિષ્ઠમતિથિં સ્વાહુતં જુષ્ટં જનાય દાશુષે ।

દેવાઁ અચ્છા યાતવે જાતવેદસમગ્નિમીળે વ્યુષ્ટિષુ ॥ ૧.૦૪૪.૦૪

સ્તવિષ્યામિ ત્વામહં વિશ્વસ્યામૃત ભોજન ।

અગ્ને ત્રાતારમમૃતં મિયેધ્ય યજિષ્ઠં હવ્યવાહન ॥ ૧.૦૪૪.૦૫

સુશંસો બોધિ ગૃણતે યવિષ્ઠ્ય મધુજિહ્વઃ સ્વાહુતઃ ।

પ્રસ્કણ્વસ્ય પ્રતિરન્નાયુર્જીવસે નમસ્યા દૈવ્યં જનમ્ ॥ ૧.૦૪૪.૦૬

હોતારં વિશ્વવેદસં સં હિ ત્વા વિશ ઇન્ધતે ।

સ આ વહ પુરુહૂત પ્રચેતસોઽગ્ને દેવાઁ ઇહ દ્રવત્ ॥ ૧.૦૪૪.૦૭

સવિતારમુષસમશ્વિના ભગમગ્નિં વ્યુષ્ટિષુ ક્ષપઃ ।
કણ્વાસસ્ત્વા સુતસોમાસ ઇન્ધતે હવ્યવાહં સ્વધ્વર ॥ ૧.૦૪૪.૦૮
પતિર્હ્યધ્વરાણામગ્ને દૂતો વિશામસિ ।
ઉષર્બુધ આ વહ સોમપીતયે દેવાઁ અદ્ય સ્વર્દૃશઃ ॥ ૧.૦૪૪.૦૯
અગ્ને પૂર્વા અનૂષસો વિભાવસો દીદેથ વિશ્વદર્શતઃ ।
અસિ ગ્રામેષ્વવિતા પુરોહિતોઽસિ યજ્ઞેષુ માનુષઃ ॥ ૧.૦૪૪.૧૦
નિ ત્વા યજ્ઞસ્ય સાધનમગ્ને હોતારમૃત્વિજમ્ ।
મનુષ્વદ્દેવ ધીમહિ પ્રચેતસં જીરં દૂતમમર્ત્યમ્ ॥ ૧.૦૪૪.૧૧
યદ્દેવાનાં મિત્રમહઃ પુરોહિતોઽન્તરો યાસિ દૂત્યમ્ ।
સિન્ધોરિવ પ્રસ્વનિતાસ ઊર્મયોઽગ્નેર્ભ્રાજન્તે અર્ચયઃ ॥ ૧.૦૪૪.૧૨
શ્રુધિ શ્રુત્કર્ણ વહ્નિભિર્દેવૈરગ્ને સયાવભિઃ ।
આ સીદન્તુ બર્હિષિ મિત્રો અર્યમા પ્રાતર્યાવાણો અધ્વરમ્ ॥ ૧.૦૪૪.૧૩
શૃણ્વન્તુ સ્તોમં મરુતઃ સુદાનવોઽગ્નિજિહ્વા ઋતાવૃધઃ ।
પિબતુ સોમં વરુણો ધૃતવ્રતોઽશ્વિભ્યામુષસા સજૂઃ ॥ ૧.૦૪૪.૧૪

ત્વમગ્ને વસૂઁરિહ રુદ્રાઁ આદિત્યાઁ ઉત ।
યજા સ્વધ્વરં જનં મનુજાતં ઘૃતપ્રુષમ્ ॥ ૧.૦૪૫.૦૧
શ્રુષ્ટીવાનો હિ દાશુષે દેવા અગ્ને વિચેતસઃ ।
તાન્રોહિદશ્વ ગિર્વણસ્ત્રયસ્ત્રિંશતમા વહ ॥ ૧.૦૪૫.૦૨
પ્રિયમેધવદત્રિવજ્જાતવેદો વિરૂપવત્ ।
અઙ્ગિરસ્વન્મહિવ્રત પ્રસ્કણ્વસ્ય શ્રુધી હવમ્ ॥ ૧.૦૪૫.૦૩
મહિકેરવ ઊતયે પ્રિયમેધા અહૂષત ।
રાજન્તમધ્વરાણામગ્નિં શુક્રેણ શોચિષા ॥ ૧.૦૪૫.૦૪
ઘૃતાહવન સન્ત્યેમા ઉ ષુ શ્રુધી ગિરઃ ।
યાભિઃ કણ્વસ્ય સૂનવો હવન્તેઽવસે ત્વા ॥ ૧.૦૪૫.૦૫
ત્વાં ચિત્રશ્રવસ્તમ હવન્તે વિક્ષુ જન્તવઃ ।
શોચિષ્કેશં પુરુપ્રિયાગ્ને હવ્યાય વોળ્હવે ॥ ૧.૦૪૫.૦૬
નિ ત્વા હોતારમૃત્વિજં દધિરે વસુવિત્તમમ્ ।

શ્રુત્કર્ણં સપ્રથસ્તમં વિપ્રા અગ્ને દિવિષ્ટિષુ ॥ ૧.૦૪૫.૦૭
આ ત્વા વિપ્રા અચુચ્યવુઃ સુતસોમા અભિ પ્રયઃ ।
બૃહદ્ભા બિભ્રતો હવિરગ્ને મર્તાય દાશુષે ॥ ૧.૦૪૫.૦૮
પ્રાતર્યાવ્ણઃ સહસ્કૃત સોમપેયાય સન્ત્ય ।
ઇહાદ્ય દૈવ્યં જનં બર્હિરા સાદયા વસો ॥ ૧.૦૪૫.૦૯
અર્વાઞ્ચં દૈવ્યં જનમગ્ને યક્ષ્વ સહૂતિભિઃ ।
અયં સોમઃ સુદાનવસ્તં પાત તિરોઅહ્ન્યમ્ ॥ ૧.૦૪૫.૧૦
એષો ઉષા અપૂર્વ્યા વ્યુચ્છતિ પ્રિયા દિવઃ ।
સ્તુષે વામશ્વિના બૃહત્ ॥ ૧.૦૪૬.૦૧
યા દસ્રા સિન્ધુમાતરા મનોતરા રયીણામ્ ।
ધિયા દેવા વસુવિદા ॥ ૧.૦૪૬.૦૨
વચ્યન્તે વાં કકુહાસો જૂર્ણાયામધિ વિષ્ટપિ ।
યદ્વાં રથો વિભિષ્પતાત્ ॥ ૧.૦૪૬.૦૩
હવિષા જારો અપાં પિપર્તિ પપુરિર્નરા ।
પિતા કુટસ્ય ચર્ષણિઃ ॥ ૧.૦૪૬.૦૪
આદારો વાં મતીનાં નાસત્યા મતવચસા ।
પાતં સોમસ્ય ધૃષ્ણુયા ॥ ૧.૦૪૬.૦૫
યા નઃ પીપરદશ્વિના જ્યોતિષ્મતી તમસ્તિરઃ ।
તામસ્મે રાસાથામિષમ્ ॥ ૧.૦૪૬.૦૬
આ નો નાવા મતીનાં યાતં પારાય ગન્તવે ।
યુઞ્જાથામશ્વિના રથમ્ ॥ ૧.૦૪૬.૦૭
અરિત્રં વાં દિવસ્પૃથુ તીર્થે સિન્ધૂનાં રથઃ ।
ધિયા યુયુજ્ર ઇન્દવઃ ॥ ૧.૦૪૬.૦૮
દિવસ્કણ્વાસ ઇન્દવો વસુ સિન્ધૂનાં પદે ।
સ્વં વવ્રિં કુહ ધિત્સથઃ ॥ ૧.૦૪૬.૦૯
અભૂદુ ભા ઉ અંશવે હિરણ્યં પ્રતિ સૂર્યઃ ।
વ્યખ્યજ્જિહ્વયાસિતઃ ॥ ૧.૦૪૬.૧૦

અભૂદુ પારમેતવે પન્થા ઋતસ્ય સાધુયા ।
અદર્શિ વિ સ્રુતિર્દિવઃ ॥ ૧.૦૪૬.૧૧
તત્તદિદશ્વિનોરવો જરિતા પ્રતિ ભૂષતિ ।
મદે સોમસ્ય પિપ્રતોઃ ॥ ૧.૦૪૬.૧૨
વાવસાના વિવસ્વતિ સોમસ્ય પીત્યા ગિરા ।
મનુષ્વચ્છમ્ભૂ આ ગતમ્ ॥ ૧.૦૪૬.૧૩
યુવોરુષા અનુ શ્રિયં પરિજ્મનોરુપાચરત્ ।
ઋતા વનથો અક્તુભિઃ ॥ ૧.૦૪૬.૧૪
ઉભા પિબતમશ્વિનોભા નઃ શર્મ યચ્છતમ્ ।
અવિદ્રિયાભિરૂતિભિઃ ॥ ૧.૦૪૬.૧૫

અયં વાં મધુમત્તમઃ સુતઃ સોમ ઋતાવૃધા ।
તમશ્વિના પિબતં તિરોઅહ્ન્યં ધત્તં રત્નાનિ દાશુષે ॥ ૧.૦૪૭.૦૧
ત્રિવન્ધુરેણ ત્રિવૃતા સુપેશસા રથેના યાતમશ્વિના ।
કણ્વાસો વાં બ્રહ્મ કૃણ્વન્ત્યધ્વરે તેષાં સુ શૃણુતં હવમ્ ॥ ૧.૦૪૭.૦૨
અશ્વિના મધુમત્તમં પાતં સોમમૃતાવૃધા ।
અથાદ્ય દસ્રા વસુ બિભ્રતા રથે દાશ્વાંસમુપ ગચ્છતમ્ ॥ ૧.૦૪૭.૦૩
ત્રિષધસ્થે બર્હિષિ વિશ્વવેદસા મધ્વા યજ્ઞં મિમિક્ષતમ્ ।
કણ્વાસો વાં સુતસોમા અભિદ્યવો યુવાં હવન્તે અશ્વિના ॥ ૧.૦૪૭.૦૪
યાભિઃ કણ્વમભિષ્ટિભિઃ પ્રાવતં યુવમશ્વિના ।
તાભિઃ ષ્વ૧સ્માઁ અવતં શુભસ્પતી પાતં સોમમૃતાવૃધા ॥ ૧.૦૪૭.૦૫
સુદાસે દસ્રા વસુ બિભ્રતા રથે પૃક્ષો વહતમશ્વિના ।
રયિં સમુદ્રાદુત વા દિવસ્પર્યસ્મે ધત્તં પુરુસ્પૃહમ્ ॥ ૧.૦૪૭.૦૬
યન્નાસત્યા પરાવતિ યદ્વા સ્થો અધિ તુર્વશે ।
અતો રથેન સુવૃતા ન આ ગતં સાકં સૂર્યસ્ય રશ્મિભિઃ ॥ ૧.૦૪૭.૦૭
અર્વાઞ્ચા વાં સપ્તયોઽધ્વરશ્રિયો વહન્તુ સવનેદુપ ।
ઇષં પૃઞ્ચન્તા સુકૃતે સુદાનવ આ બર્હિઃ સીદતં નરા ॥ ૧.૦૪૭.૦૮
તેન નાસત્યા ગતં રથેન સૂર્યત્વચા ।

યેન શશ્વદૂહથુર્દાશુષે વસુ મધ્વઃ સોમસ્ય પીતયે ॥ ૧.૦૪૭.૦૯

ઉક્થેભિરર્વાગવસે પુરૂવસૂ અર્કૈશ્ચ નિ હ્વયામહે ।

શશ્વત્કણ્વાનાં સદસિ પ્રિયે હિ કં સોમં પપથુરશ્વિના ॥ ૧.૦૪૭.૧૦

સહ વામેન ન ઉષો વ્યુચ્છા દુહિતર્દિવઃ ।

સહ દ્યુમ્નેન બૃહતા વિભાવરિ રાયા દેવિ દાસ્વતી ॥ ૧.૦૪૮.૦૧

અશ્વાવતીર્ગોમતીર્વિશ્વસુવિદો ભૂરિ ચ્યવન્ત વસ્તવે ।

ઉદીરય પ્રતિ મા સૂનૃતા ઉષશ્ચોદ રાધો મઘોનામ્ ॥ ૧.૦૪૮.૦૨

ઉવાસોષા ઉચ્છાચ્ચ નુ દેવી જીરા રથાનામ્ ।

યે અસ્યા આચરણેષુ દધ્રિરે સમુદ્રે ન શ્રવસ્યવઃ ॥ ૧.૦૪૮.૦૩

ઉષો યે તે પ્ર યામેષુ યુઞ્જતે મનો દાનાય સૂરયઃ ।

અત્રાહ તત્કણ્વ એષાં કણ્વતમો નામ ગૃણાતિ નૃણામ્ ॥ ૧.૦૪૮.૦૪

આ ઘા યોષેવ સૂનર્યુષા યાતિ પ્રભુઞ્જતી ।

જરયન્તી વૃજનં પદ્વદીયત ઉત્પાતયતિ પક્ષિણઃ ॥ ૧.૦૪૮.૦૫

વિ યા સૃજતિ સમનં વ્યર્થિનઃ પદં ન વેત્યોદતી ।

વયો નકિષ્ટે પપ્તિવાંસ આસતે વ્યુષ્ટૌ વાજિનીવતિ ॥ ૧.૦૪૮.૦૬

એષાયુક્ત પરાવતઃ સૂર્યસ્યોદયનાદધિ ।

શતં રથેભિઃ સુભગોષા ઇયં વિ યાત્યભિ માનુષાન્ ॥ ૧.૦૪૮.૦૭

વિશ્વમસ્યા નાનામ ચક્ષસે જગજ્જ્યોતિષ્કૃણોતિ સૂનરી ।

અપ દ્વેષો મઘોની દુહિતા દિવ ઉષા ઉચ્છદપ સ્રિધઃ ॥ ૧.૦૪૮.૦૮

ઉષ આ ભાહિ ભાનુના ચન્દ્રેણ દુહિતર્દિવઃ ।

આવહન્તી ભૂર્યસ્મભ્યં સૌભગં વ્યુચ્છન્તી દિવિષ્ટિષુ ॥ ૧.૦૪૮.૦૯

વિશ્વસ્ય હિ પ્રાણનં જીવનં ત્વે વિ યદુચ્છસિ સૂનરિ ।

સા નો રથેન બૃહતા વિભાવરિ શ્રુધિ ચિત્રામઘે હવમ્ ॥ ૧.૦૪૮.૧૦

ઉષો વાજં હિ વંસ્વ યશ્ચિત્રો માનુષે જને ।

તેના વહ સુકૃતો અધ્વરાઁ ઉપ યે ત્વા ગૃણન્તિ વહ્નયઃ ॥ ૧.૦૪૮.૧૧

વિશ્વાન્દેવાઁ આ વહ સોમપીતયેઽન્તરિક્ષાદુષસ્ત્વમ્ ।

સાસ્માસુ ધા ગોમદશ્વાવદુક્થ્યમુષો વાજં સુવીર્યમ્ ॥ ૧.૦૪૮.૧૨

યસ્યા રુશન્તો અર્ચયઃ પ્રતિ ભદ્રા અદૃક્ષત ।
સા નો રયિં વિશ્વવારં સુપેશસમુષા દદાતુ સુગ્મ્યમ્ ॥ ૧.૦૪૮.૧૩
યે ચિદ્ધિ ત્વામૃષયઃ પૂર્વ ઊતયે જુહૂરેઽવસે મહિ ।
સા નઃ સ્તોમાઁ અભિ ગૃણીહિ રાધસોષઃ શુક્રેણ શોચિષા ॥ ૧.૦૪૮.૧૪
ઉષો યદદ્ય ભાનુના વિ દ્વારાવૃણવો દિવઃ ।
પ્ર નો યચ્છતાદવૃકં પૃથુ ચ્છર્દિઃ પ્ર દેવિ ગોમતીરિષઃ ॥ ૧.૦૪૮.૧૫
સં નો રાયા બૃહતા વિશ્વપેશસા મિમિક્ષ્વા સમિળાભિરા ।
સં દ્યુમ્નેન વિશ્વતુરોષો મહિ સં વાજૈર્વાજિનીવતિ ॥ ૧.૦૪૮.૧૬

ઉષો ભદ્રેભિરા ગહિ દિવશ્ચિદ્રોચનાદધિ ।
વહન્ત્વરુણપ્સવ ઉપ ત્વા સોમિનો ગૃહમ્ ॥ ૧.૦૪૯.૦૧
સુપેશસં સુખં રથં યમધ્યસ્થા ઉષસ્ત્વમ્ ।
તેના સુશ્રવસં જનં પ્રાવાદ્ય દુહિતર્દિવઃ ॥ ૧.૦૪૯.૦૨
વયશ્ચિત્તે પતત્રિણો દ્વિપચ્ચતુષ્પદર્જુનિ ।
ઉષઃ પ્રારન્નૃતૂઁરનુ દિવો અન્તેભ્યસ્પરિ ॥ ૧.૦૪૯.૦૩
વ્યુચ્છન્તી હિ રશ્મિભિર્વિશ્વમાભાસિ રોચનમ્ ।
તાં ત્વામુષર્વસૂયવો ગીર્ભિઃ કણ્વા અહૂષત ॥ ૧.૦૪૯.૦૪

ઉદુ ત્યં જાતવેદસં દેવં વહન્તિ કેતવઃ ।
દૃશે વિશ્વાય સૂર્યમ્ ॥ ૧.૦૫૦.૦૧
અપ ત્યે તાયવો યથા નક્ષત્રા યન્ત્યક્તુભિઃ ।
સૂરાય વિશ્વચક્ષસે ॥ ૧.૦૫૦.૦૨
અદૃશ્રમસ્ય કેતવો વિ રશ્મયો જનાઁ અનુ ।
ભ્રાજન્તો અગ્નયો યથા ॥ ૧.૦૫૦.૦૩
તરણિર્વિશ્વદર્શતો જ્યોતિષ્કૃદસિ સૂર્ય ।
વિશ્વમા ભાસિ રોચનમ્ ॥ ૧.૦૫૦.૦૪
પ્રત્યઙ્દેવાનાં વિશઃ પ્રત્યઙ્ઙુદેષિ માનુષાન્ ।
પ્રત્યઙ્વિશ્વં સ્વર્દૃશે ॥ ૧.૦૫૦.૦૫
યેના પાવક ચક્ષસા ભુરણ્યન્તં જનાઁ અનુ ।

ત્વં વરુણ પશ્યસિ ॥ ૧.૦૫૦.૦૬

વિ દ્યામેષિ રજસ્પૃથ્વહા મિમાનો અક્તુભિઃ ।

પશ્યઞ્જન્માનિ સૂર્ય ॥ ૧.૦૫૦.૦૭

સપ્ત ત્વા હરિતો રથે વહન્તિ દેવ સૂર્ય ।

શોચિષ્કેશં વિચક્ષણ ॥ ૧.૦૫૦.૦૮

અયુક્ત સપ્ત શુન્ધ્યુવઃ સૂરો રથસ્ય નપ્ત્યઃ ।

તાભિર્યાતિ સ્વયુક્તિભિઃ ॥ ૧.૦૫૦.૦૯

ઉદ્વયં તમસસ્પરિ જ્યોતિષ્પશ્યન્ત ઉત્તરમ્ ।

દેવં દેવત્રા સૂર્યમગન્મ જ્યોતિરુત્તમમ્ ॥ ૧.૦૫૦.૧૦

ઉદ્યન્નદ્ય મિત્રમહ આરોહન્નુત્તરાં દિવમ્ ।

હૃદ્રોગં મમ સૂર્ય હરિમાણં ચ નાશય ॥ ૧.૦૫૦.૧૧

શુકેષુ મે હરિમાણં રોપણાકાસુ દધ્મસિ ।

અથો હારિદ્રવેષુ મે હરિમાણં નિ દધ્મસિ ॥ ૧.૦૫૦.૧૨

ઉદગાદયમાદિત્યો વિશ્વેન સહસા સહ ।

દ્વિષન્તં મહ્યં રન્ધયન્મો અહં દ્વિષતે રધમ્ ॥ ૧.૦૫૦.૧૩

અભિ ત્યં મેષં પુરુહૂતમૃગ્મિયમિન્દ્રં ગીર્ભિર્મદતા વસ્વો અર્ણવમ્ ।

યસ્ય દ્યાવો ન વિચરન્તિ માનુષા ભુજે મંહિષ્ઠમભિ વિપ્રમર્ચત ॥ ૧.૦૫૧.૦૧

અભીમવન્વન્સ્વભિષ્ટિમૂતયોઽન્તરિક્ષપ્રાં તવિષીભિરાવૃતમ્ ।

ઇન્દ્રં દક્ષાસ ઋભવો મદચ્યુતં શતક્રતું જવની સૂનૃતારુહત્ ॥ ૧.૦૫૧.૦૨

ત્વં ગોત્રમઙ્ગિરોભ્યોઽવૃણોરપોતાત્રયે શતદુરેષુ ગાતુવિત્ ।

સસેન ચિદ્વિમદાયાવહો વસ્વાજાવદ્રિં વાવસાનસ્ય નર્તયન્ ॥ ૧.૦૫૧.૦૩

ત્વમપામપિધાનાવૃણોરપાધારયઃ પર્વતે દાનુમદ્વસુ ।

વૃત્રં યદિન્દ્ર શવસાવધીરહિમાદિત્સૂર્યં દિવ્યારોહયો દૃશે ॥ ૧.૦૫૧.૦૪

ત્વં માયાભિરપ માયિનોઽધમઃ સ્વધાભિર્યે અધિ શુપ્તાવજુહ્વત ।

ત્વં પિપ્રોર્નૃમણઃ પ્રારુજઃ પુરઃ પ્ર ઋજિશ્વાનં દસ્યુહત્યેષ્વાવિથ ॥ ૧.૦૫૧.૦૫

ત્વં કુત્સં શુષ્ણહત્યેષ્વાવિથારન્ધયોઽતિથિગ્વાય શમ્બરમ્ ।

મહાન્તં ચિદર્બુદં નિ ક્રમીઃ પદા સનાદેવ દસ્યુહત્યાય જજ્ઞિષે ॥ ૧.૦૫૧.૦૬

ત્વે વિશ્વા તવિષી સધ્ર્યગ્ઘિતા તવ રાધઃ સોમપીથાય હર્ષતે ।
તવ વજ્રશ્ચિકિતે બાહ્વોર્હિતો વૃશ્ચા શત્રોરવ વિશ્વાનિ વૃષ્ણ્યા ॥ ૧.૦૫૧.૦૭
વિ જાનીહ્યાર્યાન્યે ચ દસ્યવો બર્હિષ્મતે રન્ધયા શાસદવ્રતાન્ ।
શાકી ભવ યજમાનસ્ય ચોદિતા વિશ્વેત્તા તે સધમાદેષુ ચાકન ॥ ૧.૦૫૧.૦૮
અનુવ્રતાય રન્ધયન્નપવ્રતાનાભૂભિરિન્દ્રઃ શ્નથયન્નનાભુવઃ ।
વૃદ્ધસ્ય ચિદ્વર્ધતો દ્યામિનક્ષતઃ સ્તવાનો વમ્રો વિ જઘાન સંદિહઃ ॥ ૧.૦૫૧.૦૯
તક્ષદ્યત્ત ઉશના સહસા સહો વિ રોદસી મજ્મના બાધતે શવઃ ।
આ ત્વા વાતસ્ય નૃમણો મનોયુજ આ પૂર્યમાણમવહન્નભિ શ્રવઃ ॥ ૧.૦૫૧.૧૦
મન્દિષ્ટ યદુશને કાવ્યે સચાઁ ઇન્દ્રો વઙ્કૂ વઙ્કુતરાધિ તિષ્ઠતિ ।
ઉગ્રો યયિં નિરપઃ સ્રોતસાસૃજદ્વિ શુષ્ણસ્ય દૃંહિતા ઐરયત્પુરઃ ॥ ૧.૦૫૧.૧૧
આ સ્મા રથં વૃષપાણેષુ તિષ્ઠસિ શાર્યાતસ્ય પ્રભૃતા યેષુ મન્દસે ।
ઇન્દ્ર યથા સુતસોમેષુ ચાકનોઽનર્વાણં શ્લોકમા રોહસે દિવિ ॥ ૧.૦૫૧.૧૨
અદદા અર્ભાં મહતે વચસ્યવે કક્ષીવતે વૃચયામિન્દ્ર સુન્વતે ।
મેનાભવો વૃષણશ્વસ્ય સુક્રતો વિશ્વેત્તા તે સવનેષુ પ્રવાચ્યા ॥ ૧.૦૫૧.૧૩
ઇન્દ્રો અશ્રાયિ સુધ્યો નિરેકે પજ્રેષુ સ્તોમો દુર્યો ન યૂપઃ ।
અશ્વયુર્ગવ્યૂ રથયુર્વસૂયુરિન્દ્ર ઇદ્રાયઃ ક્ષયતિ પ્રયન્તા ॥ ૧.૦૫૧.૧૪
ઇદં નમો વૃષભાય સ્વરાજે સત્યશુષ્માય તવસેઽવાચિ ।
અસ્મિન્નિન્દ્ર વૃજને સર્વવીરાઃ સ્મત્સૂરિભિસ્તવ શર્મન્સ્યામ ॥ ૧.૦૫૧.૧૫

ત્યં સુ મેષં મહયા સ્વર્વિદં શતં યસ્ય સુભ્વઃ સાકમીરતે ।
અત્યં ન વાજં હવનસ્યદં રથમેન્દ્રં વવૃત્યામવસે સુવૃક્તિભિઃ ॥ ૧.૦૫૨.૦૧
સ પર્વતો ન ધરુણેષ્વચ્યુતઃ સહસ્રમૂતિસ્તવિષીષુ વાવૃધે ।
ઇન્દ્રો યદ્વૃત્રમવધીન્નદીવૃતમુબ્જન્નર્ણાંસિ જર્હૃષાણો અન્ધસા ॥ ૧.૦૫૨.૦૨
સ હિ દ્વરો દ્વરિષુ વવ્ર ઊધનિ ચન્દ્રબુધ્નો મદવૃદ્ધો મનીષિભિઃ ।
ઇન્દ્રં તમહ્વે સ્વપસ્યયા ધિયા મંહિષ્ઠરાતિં સ હિ પપ્રિરન્ધસઃ ॥ ૧.૦૫૨.૦૩
આ યં પૃણન્તિ દિવિ સદ્મબર્હિષઃ સમુદ્રં ન સુભ્વ૧ઃ સ્વા અભિષ્ટયઃ ।
તં વૃત્રહત્યે અનુ તસ્થુરૂતયઃ શુષ્મા ઇન્દ્રમવાતા અહ્રુતપ્સવઃ ॥ ૧.૦૫૨.૦૪
અભિ સ્વવૃષ્ટિં મદે અસ્ય યુધ્યતો રઘ્વીરિવ પ્રવણે સસ્રુરૂતયઃ ।

ઇન્દ્રો યદ્વજ્રી ધૃષમાણો અન્ધસા ભિનદ્વલસ્ય પરિધીઁરિવ ત્રિતઃ ॥ ૧.૦૫૨.૦૫
પરીં ઘૃણા ચરતિ તિત્વિષે શવોઽપો વૃત્વી રજસો બુધ્નમાશયત્ ।
વૃત્રસ્ય યત્પ્રવણે દુર્ગૃભિશ્વનો નિજઘન્થ હન્વોરિન્દ્ર તન્યતુમ્ ॥ ૧.૦૫૨.૦૬
હ્રદં ન હિ ત્વા ન્યૃષન્ત્યૂર્મયો બ્રહ્માણીન્દ્ર તવ યાનિ વર્ધના ।
ત્વષ્ટા ચિત્તે યુજ્યં વાવૃધે શવસ્તતક્ષ વજ્રમભિભૂત્યોજસમ્ ॥ ૧.૦૫૨.૦૭
જઘન્વાઁ ઉ હરિભિઃ સમ્ભૃતક્રતવિન્દ્ર વૃત્રં મનુષે ગાતુયન્નપઃ ।
અયચ્છથા બાહ્વોર્વજ્રમાયસમધારયો દિવ્યા સૂર્યં દૃશે ॥ ૧.૦૫૨.૦૮
બૃહત્સ્વશ્ચન્દ્રમમવદ્યદુક્થ્ય૧મકૃણ્વત ભિયસા રોહણં દિવઃ ।
યન્માનુષપ્રધના ઇન્દ્રમૂતયઃ સ્વર્નૃષાચો મરુતોઽમદન્નનુ ॥ ૧.૦૫૨.૦૯
દ્યૌશ્ચિદસ્યામવાઁ અહેઃ સ્વનાદયોયવીદ્ભિયસા વજ્ર ઇન્દ્ર તે ।
વૃત્રસ્ય યદ્બદ્બધાનસ્ય રોદસી મદે સુતસ્ય શવસાભિનચ્છિરઃ ॥ ૧.૦૫૨.૧૦
યદિન્ન્વિન્દ્ર પૃથિવી દશભુજિરહાનિ વિશ્વા તતનન્ત કૃષ્ટયઃ ।
અત્રાહ તે મઘવન્વિશ્રુતં સહો દ્યામનુ શવસા બર્હણા ભુવત્ ॥ ૧.૦૫૨.૧૧
ત્વમસ્ય પારે રજસો વ્યોમનઃ સ્વભૂત્યોજા અવસે ધૃષન્મનઃ ।
ચકૃષે ભૂમિં પ્રતિમાનમોજસોઽપઃ સ્વઃ પરિભૂરેષ્યા દિવમ્ ॥ ૧.૦૫૨.૧૨
ત્વં ભુવઃ પ્રતિમાનં પૃથિવ્યા ઋષ્વવીરસ્ય બૃહતઃ પતિર્ભૂઃ ।
વિશ્વમાપ્રા અન્તરિક્ષં મહિત્વા સત્યમદ્ધા નકિરન્યસ્ત્વાવાન્ ॥ ૧.૦૫૨.૧૩
ન યસ્ય દ્યાવાપૃથિવી અનુ વ્યચો ન સિન્ધવો રજસો અન્તમાનશુઃ ।
નોત સ્વવૃષ્ટિં મદે અસ્ય યુધ્યત એકો અન્યચ્ચકૃષે વિશ્વમાનુષક્ ॥ ૧.૦૫૨.૧૪
આર્ચન્નત્ર મરુતઃ સસ્મિન્નાજૌ વિશ્વે દેવાસો અમદન્નનુ ત્વા ।
વૃત્રસ્ય યદ્ભૃષ્ટિમતા વધેન નિ ત્વમિન્દ્ર પ્રત્યાનં જઘન્થ ॥ ૧.૦૫૨.૧૫
ન્યૂ૩ ષુ વાચં પ્ર મહે ભરામહે ગિર ઇન્દ્રાય સદને વિવસ્વતઃ ।
નૂ ચિદ્ધિ રત્નં સસતામિવાવિદન્ન દુષ્ટુતિર્દ્રવિણોદેષુ શસ્યતે ॥ ૧.૦૫૩.૦૧
દુરો અશ્વસ્ય દુર ઇન્દ્ર ગોરસિ દુરો યવસ્ય વસુન ઇનસ્પતિઃ ।
શિક્ષાનરઃ પ્રદિવો અકામકર્શનઃ સખા સખિભ્યસ્તમિદં ગૃણીમસિ ॥ ૧.૦૫૩.૦૨
શચીવ ઇન્દ્ર પુરુકૃદ્દ્યુમત્તમ તવેદિદમભિતશ્ચેકિતે વસુ ।
અતઃ સંગૃભ્યાભિભૂત આ ભર મા ત્વાયતો જરિતુઃ કામમૂનયીઃ ॥ ૧.૦૫૩.૦૩

એભિર્દ્યુભિઃ સુમના એભિરિન્દુભિર્નિરુન્ધાનો અમતિં ગોભિરશ્વિના ।
ઇન્દ્રેણ દસ્યું દરયન્ત ઇન્દુભિર્યુતદ્વેષસઃ સમિષા રભેમહિ ॥ ૧.૦૫૩.૦૪
સમિન્દ્ર રાયા સમિષા રભેમહિ સં વાજેભિઃ પુરુશ્ચન્દ્રૈરભિદ્યુભિઃ ।
સં દેવ્યા પ્રમત્યા વીરશુષ્મયા ગોઅગ્રયાશ્વાવત્યા રભેમહિ ॥ ૧.૦૫૩.૦૫
તે ત્વા મદા અમદન્તાનિ વૃષ્ણ્યા તે સોમાસો વૃત્રહત્યેષુ સત્પતે ।
યત્કારવે દશ વૃત્રાણ્યપ્રતિ બર્હિષ્મતે નિ સહસ્રાણિ બર્હયઃ ॥ ૧.૦૫૩.૦૬
યુધા યુધમુપ ઘેદેષિ ધૃષ્ણુયા પુરા પુરં સમિદં હંસ્યોજસા ।
નમ્યા યદિન્દ્ર સખ્યા પરાવતિ નિબર્હયો નમુચિં નામ માયિનમ્ ॥ ૧.૦૫૩.૦૭
ત્વં કરઞ્જમુત પર્ણયં વધીસ્તેજિષ્ઠયાતિથિગ્વસ્ય વર્તની ।
ત્વં શતા વઙ્ગૃદસ્યાભિનત્પુરોઽનાનુદઃ પરિષૂતા ઋજિશ્વના ॥ ૧.૦૫૩.૦૮
ત્વમેતાઞ્જનરાજ્ઞો દ્વિર્દશાબન્ધુના સુશ્રવસોપજગ્મુષઃ ।
ષષ્ટિં સહસ્રા નવતિં નવ શ્રુતો નિ ચક્રેણ રથ્યા દુષ્પદાવૃણક્ ॥ ૧.૦૫૩.૦૯
ત્વમાવિથ સુશ્રવસં તવોતિભિસ્તવ ત્રામભિરિન્દ્ર તૂર્વયાણમ્ ।
ત્વમસ્મૈ કુત્સમતિથિગ્વમાયું મહે રાજ્ઞે યૂને અરન્ધનાયઃ ॥ ૧.૦૫૩.૧૦
ય ઉદૃચીન્દ્ર દેવગોપાઃ સખાયસ્તે શિવતમા અસામ ।
ત્વાં સ્તોષામ ત્વયા સુવીરા દ્રાઘીય આયુઃ પ્રતરં દધાનાઃ ॥ ૧.૦૫૩.૧૧

મા નો અસ્મિન્મઘવન્પૃત્સ્વંહસિ નહિ તે અન્તઃ શવસઃ પરીણશે ।
અક્રન્દયો નદ્યોરુવ રોરુવદ્વના કથા ન ક્ષોણીર્ભિયસા સમારત ॥ ૧.૦૫૪.૦૧
અર્ચા શક્રાય શાકિને શચીવતે શૃણ્વન્તમિન્દ્રં મહયન્નભિ ષ્ટુહિ ।
યો ધૃષ્ણુના શવસા રોદસી ઉભે વૃષા વૃષત્વા વૃષભો ન્યૃઞ્જતે ॥ ૧.૦૫૪.૦૨
અર્ચા દિવે બૃહતે શૂષ્યં૧ વચઃ સ્વક્ષત્રં યસ્ય ધૃષતો ધૃષન્મનઃ ।
બૃહચ્છ્રવા અસુરો બર્હણા કૃતઃ પુરો હરિભ્યાં વૃષભો રથો હિ ષઃ ॥ ૧.૦૫૪.૦૩
ત્વં દિવો બૃહતઃ સાનુ કોપયોઽવ ત્મના ધૃષતા શમ્બરં ભિનત્ ।
યન્માયિનો વ્રન્દિનો મન્દિના ધૃષચ્છિતાં ગભસ્તિમશનિં પૃતન્યસિ ॥ ૧.૦૫૪.૦૪
નિ યદ્વૃણક્ષિ શ્વસનસ્ય મૂર્ધનિ શુષ્ણસ્ય ચિદ્વ્રન્દિનો રોરુવદ્વના ।
પ્રાચીનેન મનસા બર્હણાવતા યદદ્યા ચિત્કૃણવઃ કસ્ત્વા પરિ ॥ ૧.૦૫૪.૦૫
ત્વમાવિથ નર્યં તુર્વશં યદું ત્વં તુર્વીતિં વય્યં શતક્રતો ।

ત્વં રથમેતશં કૃત્વ્યે ધને ત્વં પુરો નવતિં દમ્ભયો નવ ॥ ૧.૦૫૪.૦૬
સ ઘા રાજા સત્પતિઃ શૂશુવજ્જનો રાતહવ્યઃ પ્રતિ યઃ શાસમિન્વતિ ।
ઉક્થા વા યો અભિગૃણાતિ રાધસા દાનુરસ્મા ઉપરા પિન્વતે દિવઃ ॥ ૧.૦૫૪.૦૭
અસમં ક્ષત્રમસમા મનીષા પ્ર સોમપા અપસા સન્તુ નેમે ।
યે ત ઇન્દ્ર દદુષો વર્ધયન્તિ મહિ ક્ષત્રં સ્થવિરં વૃષ્ણ્યં ચ ॥ ૧.૦૫૪.૦૮
તુભ્યેદેતે બહુલા અદ્રિદુગ્ધાશ્ચમૂષદશ્ચમસા ઇન્દ્રપાનાઃ ।
વ્યશ્નુહિ તર્પયા કામમેષામથા મનો વસુદેયાય કૃષ્વ ॥ ૧.૦૫૪.૦૯
અપામતિષ્ઠદ્ધરુણહ્વરં તમોઽન્તર્વૃત્રસ્ય જઠરેષુ પર્વતઃ ।
અભીમિન્દ્રો નદ્યો વવ્રિણા હિતા વિશ્વા અનુષ્ઠાઃ પ્રવણેષુ જિઘ્નતે ॥ ૧.૦૫૪.૧૦
સ શેવૃધમધિ ધા દ્યુમ્નમસ્મે મહિ ક્ષત્રં જનાષાળિન્દ્ર તવ્યમ્ ।
રક્ષા ચ નો મઘોનઃ પાહિ સૂરીન્રાયે ચ નઃ સ્વપત્યા ઇષે ધાઃ ॥ ૧.૦૫૪.૧૧

દિવશ્ચિદસ્ય વરિમા વિ પપ્રથ ઇન્દ્રં ન મહ્ના પૃથિવી ચન પ્રતિ ।
ભીમસ્તુવિષ્માઞ્ચર્ષણિભ્ય આતપઃ શિશીતે વજ્રં તેજસે ન વંસગઃ ॥ ૧.૦૫૫.૦૧
સો અર્ણવો ન નદ્યઃ સમુદ્રિયઃ પ્રતિ ગૃભ્ણાતિ વિશ્રિતા વરીમભિઃ ।
ઇન્દ્રઃ સોમસ્ય પીતયે વૃષાયતે સનાત્સ યુધ્મ ઓજસા પનસ્યતે ॥ ૧.૦૫૫.૦૨
ત્વં તમિન્દ્ર પર્વતં ન ભોજસે મહો નૃમ્ણસ્ય ધર્મણામિરજ્યસિ ।
પ્ર વીર્યેણ દેવતાતિ ચેકિતે વિશ્વસ્મા ઉગ્રઃ કર્મણે પુરોહિતઃ ॥ ૧.૦૫૫.૦૩
સ ઇદ્વને નમસ્યુભિર્વચસ્યતે ચારુ જનેષુ પ્રબ્રુવાણ ઇન્દ્રિયમ્ ।
વૃષા છન્દુર્ભવતિ હર્યતો વૃષા ક્ષેમેણ ધેનાં મઘવા યદિન્વતિ ॥ ૧.૦૫૫.૦૪
સ ઇન્મહાનિ સમિથાનિ મજ્મના કૃણોતિ યુધ્મ ઓજસા જનેભ્યઃ ।
અધા ચન શ્રદ્દધતિ ત્વિષીમત ઇન્દ્રાય વજ્રં નિઘનિઘ્નતે વધમ્ ॥ ૧.૦૫૫.૦૫
સ હિ શ્રવસ્યુઃ સદનાનિ કૃત્રિમા ક્ષ્મયા વૃધાન ઓજસા વિનાશયન્ ।
જ્યોતીંષિ કૃણ્વન્નવૃકાણિ યજ્યવેઽવ સુક્રતુઃ સર્તવા અપઃ સૃજત્ ॥ ૧.૦૫૫.૦૬
દાનાય મનઃ સોમપાવન્નસ્તુ તેઽર્વાઞ્ચા હરી વન્દનશ્રુદા કૃધિ ।
યમિષ્ઠાસઃ સારથયો ય ઇન્દ્ર તે ન ત્વા કેતા આ દભ્નુવન્તિ ભૂર્ણયઃ ॥ ૧.૦૫૫.૦૭
અપ્રક્ષિતં વસુ બિભર્ષિ હસ્તયોરષાળ્હં સહસ્તન્વિ શ્રુતો દધે ।
આવૃતાસોઽવતાસો ન કર્તૃભિસ્તનૂષુ તે ક્રતવ ઇન્દ્ર ભૂરયઃ ॥ ૧.૦૫૫.૦૮

એષ પ્ર પૂર્વીરવ તસ્ય ચમ્રિષોઽત્યો ન યોષામુદયંસ્ત ભુર્વણિઃ ।
દક્ષં મહે પાયયતે હિરણ્યયં રથમાવૃત્યા હરિયોગમૃભ્વસમ્ ॥ ૧.૦૫૬.૦૧
તં ગૂર્તયો નેમન્નિષઃ પરીણસઃ સમુદ્રં ન સંચરણે સનિષ્યવઃ ।
પતિં દક્ષસ્ય વિદથસ્ય નૂ સહો ગિરિં ન વેના અધિ રોહ તેજસા ॥ ૧.૦૫૬.૦૨
સ તુર્વણિર્મહાઁ અરેણુ પૌંસ્યે ગિરેર્ભૃષ્ટિર્ન ભ્રાજતે તુજા શવઃ ।
યેન શુષ્ણં માયિનમાયસો મદે દુધ્ર આભૂષુ રામયન્નિ દામનિ ॥ ૧.૦૫૬.૦૩
દેવી યદિ તવિષી ત્વાવૃધોતય ઇન્દ્રં સિષક્ત્યુષસં ન સૂર્યઃ ।
યો ધૃષ્ણુના શવસા બાધતે તમ ઇયર્તિ રેણું બૃહદર્હરિષ્વણિઃ ॥ ૧.૦૫૬.૦૪
વિ યત્તિરો ધરુણમચ્યુતં રજોઽતિષ્ઠિપો દિવ આતાસુ બર્હણા ।
સ્વર્મીળ્હે યન્મદ ઇન્દ્ર હર્ષ્યાહન્વૃત્રં નિરપામૌબ્જો અર્ણવમ્ ॥ ૧.૦૫૬.૦૫
ત્વં દિવો ધરુણં ધિષ ઓજસા પૃથિવ્યા ઇન્દ્ર સદનેષુ માહિનઃ ।
ત્વં સુતસ્ય મદે અરિણા અપો વિ વૃત્રસ્ય સમયા પાષ્યારુજઃ ॥ ૧.૦૫૬.૦૬

પ્ર મંહિષ્ઠાય બૃહતે બૃહદ્રયે સત્યશુષ્માય તવસે મતિં ભરે ।
અપામિવ પ્રવણે યસ્ય દુર્ધરં રાધો વિશ્વાયુ શવસે અપાવૃતમ્ ॥ ૧.૦૫૭.૦૧
અધ તે વિશ્વમનુ હાસદિષ્ટય આપો નિમ્નેવ સવના હવિષ્મતઃ ।
યત્પર્વતે ન સમશીત હર્યત ઇન્દ્રસ્ય વજ્રઃ શ્નથિતા હિરણ્યયઃ ॥ ૧.૦૫૭.૦૨
અસ્મૈ ભીમાય નમસા સમધ્વર ઉષો ન શુભ્ર આ ભરા પનીયસે ।
યસ્ય ધામ શ્રવસે નામેન્દ્રિયં જ્યોતિરકારિ હરિતો નાયસે ॥ ૧.૦૫૭.૦૩
ઇમે ત ઇન્દ્ર તે વયં પુરુષ્ટુત યે ત્વારભ્ય ચરામસિ પ્રભૂવસો ।
નહિ ત્વદન્યો ગિર્વણો ગિરઃ સઘત્ક્ષોણીરિવ પ્રતિ નો હર્ય તદ્વચઃ ॥ ૧.૦૫૭.૦૪
ભૂરિ ત ઇન્દ્ર વીર્યં૧ તવ સ્મસ્યસ્ય સ્તોતુર્મઘવન્કામમા પૃણ ।
અનુ તે દ્યૌર્બૃહતી વીર્યં મમ ઇયં ચ તે પૃથિવી નેમ ઓજસે ॥ ૧.૦૫૭.૦૫
ત્વં તમિન્દ્ર પર્વતં મહામુરું વજ્રેણ વજ્રિન્પર્વશશ્ચકર્તિથ ।
અવાસૃજો નિવૃતાઃ સર્તવા અપઃ સત્રા વિશ્વં દધિષે કેવલં સહઃ ॥ ૧.૦૫૭.૦૬

નૂ ચિત્સહોજા અમૃતો નિ તુન્દતે હોતા યદ્દૂતો અભવદ્વિવસ્વતઃ ।
વિ સાધિષ્ઠેભિઃ પથિભી રજો મમ આ દેવતાતા હવિષા વિવાસતિ ॥ ૧.૦૫૮.૦૧
આ સ્વમદ્મ યુવમાનો અજરસ્તૃષ્વવિષ્યન્નતસેષુ તિષ્ઠતિ ।

અત્યો ન પૃષ્ઠં પ્રુષિતસ્ય રોચતે દિવો ન સાનુ સ્તનયન્નચિક્રદત્ ॥ ૧.૦૫૮.૦૨
ક્રાણા રુદ્રેભિર્વસુભિઃ પુરોહિતો હોતા નિષત્તો રયિષાળમર્ત્યઃ ।
રથો ન વિક્ષ્વૃઞ્જસાન આયુષુ વ્યાનુષગ્વાર્યા દેવ ઋણ્વતિ ॥ ૧.૦૫૮.૦૩
વિ વાતજૂતો અતસેષુ તિષ્ઠતે વૃથા જુહૂભિઃ સૃણ્યા તુવિષ્વણિઃ ।
તૃષુ યદગ્ને વનિનો વૃષાયસે કૃષ્ણં ત એમ રુશદૂર્મે અજર ॥ ૧.૦૫૮.૦૪
તપુર્જમ્ભો વન આ વાતચોદિતો યૂથે ન સાહ્વાઁ અવ વાતિ વંસગઃ ।
અભિવ્રજન્નક્ષિતં પાજસા રજઃ સ્થાતુશ્ચરથં ભયતે પતત્રિણઃ ॥ ૧.૦૫૮.૦૫
દધુષ્ટ્વા ભૃગવો માનુષેષ્વા રયિં ન ચારું સુહવં જનેભ્યઃ ।
હોતારમગ્ને અતિથિં વરેણ્યં મિત્રં ન શેવં દિવ્યાય જન્મને ॥ ૧.૦૫૮.૦૬
હોતારં સપ્ત જુહ્વોૂ યજિષ્ઠં યં વાઘતો વૃણતે અધ્વરેષુ ।
અગ્નિં વિશ્વેષામરતિં વસૂનાં સપર્યામિ પ્રયસા યામિ રત્નમ્ ॥ ૧.૦૫૮.૦૭
અચ્છિદ્રા સૂનો સહસો નો અદ્ય સ્તોતૃભ્યો મિત્રમહઃ શર્મ યચ્છ ।
અગ્ને ગૃણન્તમંહસ ઉરુષ્યોર્જો નપાત્પૂર્ભિરાયસીભિઃ ॥ ૧.૦૫૮.૦૮
ભવા વરૂથં ગૃણતે વિભાવો ભવા મઘવન્મઘવદ્ભ્યઃ શર્મ ।
ઉરુષ્યાગ્ને અંહસો ગૃણન્તં પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૫૮.૦૯
વયા ઇદગ્ને અગ્નયસ્તે અન્યે ત્વે વિશ્વે અમૃતા માદયન્તે ।
વૈશ્વાનર નાભિરસિ ક્ષિતીનાં સ્થૂણેવ જનાઁ ઉપમિદ્યયન્થ ॥ ૧.૦૫૯.૦૧
મૂર્ધા દિવો નાભિરગ્નિઃ પૃથિવ્યા અથાભવદરતી રોદસ્યોઃ ।
તં ત્વા દેવાસોઽજનયન્ત દેવં વૈશ્વાનર જ્યોતિરિદાર્યાય ॥ ૧.૦૫૯.૦૨
આ સૂર્યે ન રશ્મયો ધ્રુવાસો વૈશ્વાનરે દધિરેઽગ્ના વસૂનિ ।
યા પર્વતેષ્વોષધીષ્વપ્સુ યા માનુષેષ્વસિ તસ્ય રાજા ॥ ૧.૦૫૯.૦૩
બૃહતી ઇવ સૂનવે રોદસી ગિરો હોતા મનુષ્યોૂ ન દક્ષઃ ।
સ્વર્વતે સત્યશુષ્માય પૂર્વીર્વૈશ્વાનરાય નૃતમાય યહ્વીઃ ॥ ૧.૦૫૯.૦૪
દિવશ્ચિત્તે બૃહતો જાતવેદો વૈશ્વાનર પ્ર રિરિચે મહિત્વમ્ ।
રાજા કૃષ્ટીનામસિ માનુષીણાં યુધા દેવેભ્યો વરિવશ્ચકર્થ ॥ ૧.૦૫૯.૦૫
પ્ર નૂ મહિત્વં વૃષભસ્ય વોચં યં પૂરવો વૃત્રહણં સચન્તે ।
વૈશ્વાનરો દસ્યુમગ્નિર્જઘન્વાઁ અધૂનોત્કાષ્ઠા અવ શમ્બરં ભેત્ ॥ ૧.૦૫૯.૦૬

વૈશ્વાનરો મહિમ્ના વિશ્વકૃષ્ટિર્ભરદ્વાજેષુ યજતો વિભાવા ।
શાતવનેયે શતિનીભિરગ્નિઃ પુરુણીથે જરતે સૂનૃતાવાન્ ॥ ૧.૦૫૯.૦૭

વહ્નિં યશસં વિદથસ્ય કેતું સુપ્રાવ્યં દૂતં સદ્યોઅર્થમ્ ।
દ્વિજન્માનં રયિમિવ પ્રશસ્તં રાતિં ભરદ્ભૃગવે માતરિશ્વા ॥ ૧.૦૬૦.૦૧
અસ્ય શાસુરુભયાસઃ સચન્તે હવિષ્મન્ત ઉશિજો યે ચ મર્તાઃ ।
દિવશ્ચિત્પૂર્વો ન્યસાદિ હોતાપૃચ્છ્યો વિશ્પતિર્વિક્ષુ વેધાઃ ॥ ૧.૦૬૦.૦૨
તં નવ્યસી હૃદ આ જાયમાનમસ્મત્સુકીર્તિર્મધુજિહ્વમશ્યાઃ ।
યમૃત્વિજો વૃજને માનુષાસઃ પ્રયસ્વન્ત આયવો જીજનન્ત ॥ ૧.૦૬૦.૦૩
ઉશિક્પાવકો વસુર્માનુષેષુ વરેણ્યો હોતાધાયિ વિક્ષુ ।
દમૂના ગૃહપતિર્દમ આઁ અગ્નિર્ભુવદ્રયિપતી રયીણામ્ ॥ ૧.૦૬૦.૦૪
તં ત્વા વયં પતિમગ્ને રયીણાં પ્ર શંસામો મતિભિર્ગોતમાસઃ ।
આશું ન વાજમ્ભરં મર્જયન્તઃ પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૬૦.૦૫

અસ્મા ઇદુ પ્ર તવસે તુરાય પ્રયો ન હર્મિ સ્તોમં માહિનાય ।
ઋચીષમાયાધ્રિગવ ઓહમિન્દ્રાય બ્રહ્માણિ રાતતમા ॥ ૧.૦૬૧.૦૧
અસ્મા ઇદુ પ્રય ઇવ પ્ર યંસિ ભરામ્યાઙ્ગૂષં બાધે સુવૃક્તિ ।
ઇન્દ્રાય હૃદા મનસા મનીષા પ્રત્નાય પત્યે ધિયો મર્જયન્ત ॥ ૧.૦૬૧.૦૨
અસ્મા ઇદુ ત્યમુપમં સ્વર્ષાં ભરામ્યાઙ્ગૂષમાસ્યેન ।
મંહિષ્ઠમચ્છોક્તિભિર્મતીનાં સુવૃક્તિભિઃ સૂરિં વાવૃધધ્યૈ ॥ ૧.૦૬૧.૦૩
અસ્મા ઇદુ સ્તોમં સં હિનોમિ રથં ન તષ્ટેવ તત્સિનાય ।
ગિરશ્ચ ગિર્વાહસે સુવૃક્તીન્દ્રાય વિશ્વમિન્વં મેધિરાય ॥ ૧.૦૬૧.૦૪
અસ્મા ઇદુ સપ્તિમિવ શ્રવસ્યેન્દ્રાયાર્કં જુહ્વા૩ સમઞ્જે ।
વીરં દાનૌકસં વન્દધ્યૈ પુરાં ગૂર્તશ્રવસં દર્માણમ્ ॥ ૧.૦૬૧.૦૫
અસ્મા ઇદુ ત્વષ્ટા તક્ષદ્વજ્રં સ્વપસ્તમં સ્વર્યં૧ રણાય ।
વૃત્રસ્ય ચિદ્વિદદ્યેન મર્મ તુજન્નીશાનસ્તુજતા કિયેધાઃ ॥ ૧.૦૬૧.૦૬
અસ્યેદુ માતુઃ સવનેષુ સદ્યો મહઃ પિતું પપિવાઞ્ચાર્વન્ના ।
મુષાયદ્વિષ્ણુઃ પચતં સહીયાન્વિધ્યદ્વરાહં તિરો અદ્રિમસ્તા ॥ ૧.૦૬૧.૦૭
અસ્મા ઇદુ ગ્નાશ્ચિદ્દેવપત્નીરિન્દ્રાયાર્કમહિહત્ય ઊવુઃ ।

પરિ દ્યાવાપૃથિવી જભ્ર ઉર્વી નાસ્ય તે મહિમાનં પરિ ષ્ટઃ ॥ ૧.૦૬૧.૦૮
અસ્યેદેવ પ્ર રિરિચે મહિત્વં દિવસ્પૃથિવ્યાઃ પર્યન્તરિક્ષાત્ ।
સ્વરાળિન્દ્રો દમ આ વિશ્વગૂર્તઃ સ્વરિરમત્રો વવક્ષે રણાય ॥ ૧.૦૬૧.૦૯
અસ્યેદેવ શવસા શુષન્તં વિ વૃશ્ચદ્વજ્રેણ વૃત્રમિન્દ્રઃ ।
ગા ન વ્રાણા અવનીરમુઞ્ચદભિ શ્રવો દાવને સચેતાઃ ॥ ૧.૦૬૧.૧૦
અસ્યેદુ ત્વેષસા રન્ત સિન્ધવઃ પરિ યદ્વજ્રેણ સીમયચ્છત્ ।
ઈશાનકૃદ્દાશુષે દશસ્યન્તુર્વીતયે ગાધં તુર્વણિઃ કઃ ॥ ૧.૦૬૧.૧૧
અસ્મા ઇદુ પ્ર ભરા તૂતુજાનો વૃત્રાય વજ્રમીશાનઃ કિયેધાઃ ।
ગોર્ન પર્વ વિ રદા તિરશ્ચેષ્યન્નર્ણાંસ્યપાં ચરધ્યૈ ॥ ૧.૦૬૧.૧૨
અસ્યેદુ પ્ર બ્રૂહિ પૂર્વ્યાણિ તુરસ્ય કર્માણિ નવ્ય ઉક્થૈઃ ।
યુધે યદિષ્ણાન આયુધાન્યૃઘાયમાણો નિરિણાતિ શત્રૂન્ ॥ ૧.૦૬૧.૧૩
અસ્યેદુ ભિયા ગિરયશ્ચ દૃળ્હા દ્યાવા ચ ભૂમા જનુષસ્તુજેતે ।
ઉપો વેનસ્ય જોગુવાન ઓણિં સદ્યો ભુવદ્વીર્યાય નોધાઃ ॥ ૧.૦૬૧.૧૪
અસ્મા ઇદુ ત્યદનુ દાય્યેષામેકો યદ્વવ્ને ભૂરેરીશાનઃ ।
પ્રૈતશં સૂર્યે પસ્પૃધાનં સૌવશ્વ્યે સુષ્વિમાવદિન્દ્રઃ ॥ ૧.૦૬૧.૧૫
એવા તે હારિયોજના સુવૃક્તીન્દ્ર બ્રહ્માણિ ગોતમાસો અક્રન્ ।
ઐષુ વિશ્વપેશસં ધિયં ધાઃ પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૬૧.૧૬
પ્ર મન્મહે શવસાનાય શૂષમાઙ્ગૂષં ગિર્વણસે અઙ્ગિરસ્વત્ ।
સુવૃક્તિભિઃ સ્તુવત ઋગ્મિયાયાર્ચામાર્કં નરે વિશ્રુતાય ॥ ૧.૦૬૨.૦૧
પ્ર વો મહે મહિ નમો ભરધ્વમાઙ્ગૂષ્યં શવસાનાય સામ ।
યેના નઃ પૂર્વે પિતરઃ પદજ્ઞા અર્ચન્તો અઙ્ગિરસો ગા અવિન્દન્ ॥ ૧.૦૬૨.૦૨
ઇન્દ્રસ્યાઙ્ગિરસાં ચેષ્ટૌ વિદત્સરમા તનયાય ધાસિમ્ ।
બૃહસ્પતિર્ભિનદદ્રિં વિદદ્ગાઃ સમુસ્રિયાભિર્વાવશન્ત નરઃ ॥ ૧.૦૬૨.૦૩
સ સુષ્ટુભા સ સ્તુભા સપ્ત વિપ્રૈઃ સ્વરેણાદ્રિં સ્વર્યો૩ નવગ્વૈઃ ।
સરણ્યુભિઃ ફલિગમિન્દ્ર શક્ર વલં રવેણ દરયો દશગ્વૈઃ ॥ ૧.૦૬૨.૦૪
ગૃણાનો અઙ્ગિરોભિર્દસ્મ વિ વરુષસા સૂર્યેણ ગોભિરન્ધઃ ।
વિ ભૂમ્યા અપ્રથય ઇન્દ્ર સાનુ દિવો રજ ઉપરમસ્તભાયઃ ॥ ૧.૦૬૨.૦૫

તદુ પ્રયક્ષતમમસ્ય કર્મ દસ્મસ્ય ચારુતમમસ્તિ દંસઃ ।
ઉપહ્વરે યદુપરા અપિન્વન્મધ્વર્ણસો નદ્ય૧શ્ચતસ્રઃ ॥ ૧.૦૬૨.૦૬
દ્વિતા વિ વવ્રે સનજા સનીળે અયાસ્યઃ સ્તવમાનેભિરર્કૈઃ ।
ભગો ન મેને પરમે વ્યોમન્નધારયદ્રોદસી સુદંસાઃ ॥ ૧.૦૬૨.૦૭
સનાદ્દિવં પરિ ભૂમા વિરૂપે પુનર્ભુવા યુવતી સ્વેભિરેવૈઃ ।
કૃષ્ણેભિરક્તોષા રુશદ્ભિર્વપુર્ભિરા ચરતો અન્યાન્યા ॥ ૧.૦૬૨.૦૮
સનેમિ સખ્યં સ્વપસ્યમાનઃ સૂનુર્દાધાર શવસા સુદંસાઃ ।
આમાસુ ચિદ્દધિષે પક્વમન્તઃ પયઃ કૃષ્ણાસુ રુશદ્રોહિણીષુ ॥ ૧.૦૬૨.૦૯
સનાત્સનીળા અવનીરવાતા વ્રતા રક્ષન્તે અમૃતાઃ સહોભિઃ ।
પુરૂ સહસ્રા જનયો ન પત્નીર્દુવસ્યન્તિ સ્વસારો અહ્રયાણમ્ ॥ ૧.૦૬૨.૧૦
સનાયુવો નમસા નવ્યો અર્કૈર્વસૂયવો મતયો દસ્મ દદ્રુઃ ।
પતિં ન પત્નીરુશતીરુશન્તં સ્પૃશન્તિ ત્વા શવસાવન્મનીષાઃ ॥ ૧.૦૬૨.૧૧
સનાદેવ તવ રાયો ગભસ્તૌ ન ક્ષીયન્તે નોપ દસ્યન્તિ દસ્મ ।
દ્યુમાઁ અસિ ક્રતુમાઁ ઇન્દ્ર ધીરઃ શિક્ષા શચીવસ્તવ નઃ શચીભિઃ ॥ ૧.૦૬૨.૧૨
સનાયતે ગોતમ ઇન્દ્ર નવ્યમતક્ષદ્બ્રહ્મ હરિયોજનાય ।
સુનીથાય નઃ શવસાન નોધાઃ પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૬૨.૧૩
ત્વં મહાઁ ઇન્દ્ર યો હ શુષ્મૈર્દ્યાવા જજ્ઞાનઃ પૃથિવી અમે ધાઃ ।
યદ્ધ તે વિશ્વા ગિરયશ્ચિદભ્વા ભિયા દૃળ્હાસઃ કિરણા નૈજન્ ॥ ૧.૦૬૩.૦૧
આ યદ્ધરી ઇન્દ્ર વિવ્રતા વેરા તે વજ્રં જરિતા બાહ્વોર્ધાત્ ।
યેનાવિહર્યતક્રતો અમિત્રાન્પુર ઇષ્ણાસિ પુરુહૂત પૂર્વીઃ ॥ ૧.૦૬૩.૦૨
ત્વં સત્ય ઇન્દ્ર ધૃષ્ણુરેતાન્ત્વમૃભુક્ષા નર્યસ્ત્વં ષાટ્ ।
ત્વં શુષ્ણં વૃજને પૃક્ષ આણૌ યૂને કુત્સાય દ્યુમતે સચાહન્ ॥ ૧.૦૬૩.૦૩
ત્વં હ ત્યદિન્દ્ર ચોદીઃ સખા વૃત્રં યદ્વજ્રિન્વૃષકર્મન્નુભ્નાઃ ।
યદ્ધ શૂર વૃષમણઃ પરાચૈર્વિ દસ્યૂઁર્યોનાવકૃતો વૃથાષાટ્ ॥ ૧.૦૬૩.૦૪
ત્વં હ ત્યદિન્દ્રારિષણ્યન્દૃળ્હસ્ય ચિન્મર્તાનામજુષ્ટૌ ।
વ્ય૧સ્મદા કાષ્ઠા અર્વતે વર્ઘનેવ વજ્રિઞ્છ્નથિહ્યમિત્રાન્ ॥ ૧.૦૬૩.૦૫
ત્વાં હ ત્યદિન્દ્રાર્ણસાતૌ સ્વર્મીળ્હે નર આજા હવન્તે ।

તવ સ્વધાવ ઇયમા સમર્ય ઊતિર્વાજેષ્વતસાય્યા ભૂત્ ॥ ૧.૦૬૩.૦૬

ત્વં હ ત્યદિન્દ્ર સપ્ત યુધ્યન્પુરો વજ્રિન્પુરુકુત્સાય દર્દઃ ।

બર્હિર્ન યત્સુદાસે વૃથા વર્ગંહો રાજન્વરિવઃ પૂરવે કઃ ॥ ૧.૦૬૩.૦૭

ત્વં ત્યાં ન ઇન્દ્ર દેવ ચિત્રામિષમાપો ન પીપયઃ પરિજ્મન્ ।

યયા શૂર પ્રત્યસ્મભ્યં યંસિ ત્મનમૂર્જં ન વિશ્વધ ક્ષરધ્યૈ ॥ ૧.૦૬૩.૦૮

અકારિ ત ઇન્દ્ર ગોતમેભિર્બ્રહ્માણ્યોક્તા નમસા હરિભ્યામ્ ।

સુપેશસં વાજમા ભરા નઃ પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૬૩.૦૯

વૃષ્ણે શર્ધાય સુમખાય વેધસે નોધઃ સુવૃક્તિં પ્ર ભરા મરુદ્ભ્યઃ ।

અપો ન ધીરો મનસા સુહસ્ત્યો ગિરઃ સમઞ્જે વિદથેષ્વાભુવઃ ॥ ૧.૦૬૪.૦૧

તે જજ્ઞિરે દિવ ઋષ્વાસ ઉક્ષણો રુદ્રસ્ય મર્યા અસુરા અરેપસઃ ।

પાવકાસઃ શુચયઃ સૂર્યા ઇવ સત્વાનો ન દ્રપ્સિનો ઘોરવર્પસઃ ॥ ૧.૦૬૪.૦૨

યુવાનો રુદ્રા અજરા અભોગ્ઘનો વવક્ષુરધ્રિગાવઃ પર્વતા ઇવ ।

દૃળ્હા ચિદ્વિશ્વા ભુવનાનિ પાર્થિવા પ્ર ચ્યાવયન્તિ દિવ્યાનિ મજ્મના ॥ ૧.૦૬૪.૦૩

ચિત્રૈરઞ્જિભિર્વપુષે વ્યઞ્જતે વક્ષસ્સુ રુક્માઁ અધિ યેતિરે શુભે ।

અંસેષ્વેષાં નિ મિમૃક્ષુરૃષ્ટયઃ સાકં જજ્ઞિરે સ્વધયા દિવો નરઃ ॥ ૧.૦૬૪.૦૪

ઈશાનકૃતો ધુનયો રિશાદસો વાતાન્વિદ્યુતસ્તવિષીભિરક્રત ।

દુહન્ત્યૂધર્દિવ્યાનિ ધૂતયો ભૂમિં પિન્વન્તિ પયસા પરિજ્રયઃ ॥ ૧.૦૬૪.૦૫

પિન્વન્ત્યપો મરુતઃ સુદાનવઃ પયો ઘૃતવદ્વિદથેષ્વાભુવઃ ।

અત્યં ન મિહે વિ નયન્તિ વાજિનમુત્સં દુહન્તિ સ્તનયન્તમક્ષિતમ્ ॥ ૧.૦૬૪.૦૬

મહિષાસો માયિનશ્ચિત્રભાનવો ગિરયો ન સ્વતવસો રઘુષ્યદઃ ।

મૃગા ઇવ હસ્તિનઃ ખાદથા વના યદારુણીષુ તવિષીરયુગ્ધ્વમ્ ॥ ૧.૦૬૪.૦૭

સિંહા ઇવ નાનદતિ પ્રચેતસઃ પિશા ઇવ સુપિશો વિશ્વવેદસઃ ।

ક્ષપો જિન્વન્તઃ પૃષતીભિરૃષ્ટિભિઃ સમિત્સબાધઃ શવસાહિમન્યવઃ ॥ ૧.૦૬૪.૦૮

રોદસી આ વદતા ગણશ્રિયો નૃષાચઃ શૂરાઃ શવસાહિમન્યવઃ ।

આ વન્ધુરેષ્વમતિર્ન દર્શતા વિદ્યુન્ન તસ્થૌ મરુતો રથેષુ વઃ ॥ ૧.૦૬૪.૦૯

વિશ્વવેદસો રયિભિઃ સમોકસઃ સમ્મિશ્લાસસ્તવિષીભિર્વિરપ્શિનઃ ।

અસ્તાર ઇષું દધિરે ગભસ્ત્યોરનન્તશુષ્મા વૃષખાદયો નરઃ ॥ ૧.૦૬૪.૧૦

હિરણ્યયેભિઃ પવિભિઃ પયોવૃધ ઉજ્જિઘ્નન્ત આપથ્યો૩ ન પર્વતાન્ ।
મખા અયાસઃ સ્વસૃતો ધ્રુવચ્યુતો દુધ્રકૃતો મરુતો ભ્રાજદૃષ્ટયઃ ॥ ૧.૦૬૪.૧૧

ઘૃષું પાવકં વનિનં વિચર્ષણિં રુદ્રસ્ય સૂનું હવસા ગૃણીમસિ ।
રજસ્તુરં તવસં મારુતં ગણમૃજીષિણં વૃષણં સશ્ચત શ્રિયે ॥ ૧.૦૬૪.૧૨

પ્ર નૂ સ મર્તઃ શવસા જનાઁ અતિ તસ્થૌ વ ઊતી મરુતો યમાવત ।
અર્વદ્ભિર્વાજં ભરતે ધના નૃભિરાપૃચ્છ્યં ક્રતુમા ક્ષેતિ પુષ્યતિ ॥ ૧.૦૬૪.૧૩

ચર્કૃત્યં મરુતઃ પૃત્સુ દુષ્ટરં દ્યુમન્તં શુષ્મં મઘવત્સુ ધત્તન ।
ધનસ્પૃતમુક્થ્યં વિશ્વચર્ષણિં તોકં પુષ્યેમ તનયં શતં હિમાઃ ॥ ૧.૦૬૪.૧૪

નૂ ષ્ઠિરં મરુતો વીરવન્તમૃતીષાહં રયિમસ્માસુ ધત્ત ।
સહસ્રિણં શતિનં શૂશુવાંસં પ્રાતર્મક્ષૂ ધિયાવસુર્જગમ્યાત્ ॥ ૧.૦૬૪.૧૫

પશ્વા ન તાયું ગુહા ચતન્તં નમો યુજાનં નમો વહન્તમ્ ॥ ૧.૦૬૫.૦૧

સજોષા ધીરાઃ પદૈરનુ ગ્મન્નુપ ત્વા સીદન્વિશ્વે યજત્રાઃ ॥ ૧.૦૬૫.૦૨

ઋતસ્ય દેવા અનુ વ્રતા ગુર્ભુવત્પરિષ્ટિર્દ્યૌર્ન ભૂમ ॥ ૧.૦૬૫.૦૩

વર્ધન્તીમાપઃ પન્વા સુશિશ્વિમૃતસ્ય યોના ગર્ભે સુજાતમ્ ॥ ૧.૦૬૫.૦૪

પુષ્ટિર્ન રણ્વા ક્ષિતિર્ન પૃથ્વી ગિરિર્ન ભુજ્મ ક્ષોદો ન શમ્ભુ ॥ ૧.૦૬૫.૦૫

અત્યો નાજ્મન્સર્ગપ્રતક્તઃ સિન્ધુર્ન ક્ષોદઃ ક ઈં વરાતે ॥ ૧.૦૬૫.૦૬

જામિઃ સિન્ધૂનાં ભ્રાતેવ સ્વસ્રામિભ્યાન્ન રાજા વનાન્યત્તિ ॥ ૧.૦૬૫.૦૭

યદ્વાતજૂતો વના વ્યસ્થાદગ્નિર્હ દાતિ રોમા પૃથિવ્યાઃ ॥ ૧.૦૬૫.૦૮

શ્વસિત્યપ્સુ હંસો ન સીદન્ક્રત્વા ચેતિષ્ઠો વિશામુષર્ભુત્ ॥ ૧.૦૬૫.૦૯

સોમો ન વેધા ઋતપ્રજાતઃ પશુર્ન શિશ્વા વિભુર્દૂરેભાઃ ॥ ૧.૦૬૫.૧૦

રયિર્ન ચિત્રા સૂરો ન સંદૃગાયુર્ન પ્રાણો નિત્યો ન સૂનુઃ ॥ ૧.૦૬૬.૦૧

તક્વા ન ભૂર્ણિર્વના સિષક્તિ પયો ન ધેનુઃ શુચિર્વિભાવા ॥ ૧.૦૬૬.૦૨

દાધાર ક્ષેમમોકો ન રણ્વો યવો ન પક્વો જેતા જનાનામ્ ॥ ૧.૦૬૬.૦૩

ઋષિર્ન સ્તુભ્વા વિક્ષુ પ્રશસ્તો વાજી ન પ્રીતો વયો દધાતિ ॥ ૧.૦૬૬.૦૪

દુરોકશોચિઃ ક્રતુર્ન નિત્યો જાયેવ યોનાવરં વિશ્વસ્મૈ ॥ ૧.૦૬૬.૦૫

ચિત્રો યદભ્રાટ્ છ્વેતો ન વિક્ષુ રથો ન રુક્મી ત્વેષઃ સમત્સુ ॥ ૧.૦૬૬.૦૬

સેનેવ સૃષ્ટામં દધાત્યસ્તુર્ન દિદ્યુત્ત્વેષપ્રતીકા ॥ ૧.૦૬૬.૦૭

યમો હ જાતો યમો જનિત્વં જારઃ કનીનાં પતિર્જનીનામ્ ॥ ૧.૦૬૬.૦૮
તં વશ્ચરાથા વયં વસત્યાસ્તં ન ગાવો નક્ષન્ત ઇદ્ધમ્ ॥ ૧.૦૬૬.૦૯
સિન્ધુર્ન ક્ષોદઃ પ્ર નીચીરૈનોન્નવન્ત ગાવઃ સ્વર્દૃશીકે ॥ ૧.૦૬૬.૧૦

વનેષુ જાયુર્મર્તેષુ મિત્રો વૃણીતે શ્રુષ્ટિં રાજેવાજુર્યમ્ ॥ ૧.૦૬૭.૦૧
ક્ષેમો ન સાધુઃ ક્રતુર્ન ભદ્રો ભુવત્સ્વાધીર્હોતા હવ્યવાટ્ ॥ ૧.૦૬૭.૦૨
હસ્તે દધાનો નૃમ્ણા વિશ્વાન્યમે દેવાન્ધાદ્ગુહા નિષીદન્ ॥ ૧.૦૬૭.૦૩
વિદન્તીમત્ર નરો ધિયંધા હૃદા યત્તષ્ટાન્મન્ત્રાઁ અશંસન્ ॥ ૧.૦૬૭.૦૪
અજો ન ક્ષાં દાધાર પૃથિવીં તસ્તમ્ભ દ્યાં મન્ત્રેભિઃ સત્યૈઃ ॥ ૧.૦૬૭.૦૫
પ્રિયા પદાનિ પશ્વો નિ પાહિ વિશ્વાયુરગ્ને ગુહા ગુહં ગાઃ ॥ ૧.૦૬૭.૦૬
ય ઈં ચિકેત ગુહા ભવન્તમા યઃ સસાદ ધારામૃતસ્ય ॥ ૧.૦૬૭.૦૭
વિ યે ચૃતન્ત્યૃતા સપન્ત આદિદ્વસૂનિ પ્ર વવાચાસ્મૈ ॥ ૧.૦૬૭.૦૮
વિ યો વીરુત્સુ રોધન્મહિત્વોત પ્રજા ઉત પ્રસૂષ્વન્તઃ ॥ ૧.૦૬૭.૦૯
ચિત્તિરપાં દમે વિશ્વાયુઃ સદ્મેવ ધીરાઃ સમ્માય ચક્રુઃ ॥ ૧.૦૬૭.૧૦

શ્રીણન્નુપ સ્થાદ્દિવં ભુરણ્યુઃ સ્થાતુશ્ચરથમક્તૂન્વ્યૂર્ણોત્ ॥ ૧.૦૬૮.૦૧
પરિ યદેષામેકો વિશ્વેષાં ભુવદ્દેવો દેવાનાં મહિત્વા ॥ ૧.૦૬૮.૦૨
આદિત્તે વિશ્વે ક્રતું જુષન્ત શુષ્કાદ્યદ્દેવ જીવો જનિષ્ઠાઃ ॥ ૧.૦૬૮.૦૩
ભજન્ત વિશ્વે દેવત્વં નામ ઋતં સપન્તો અમૃતમેવૈઃ ॥ ૧.૦૬૮.૦૪
ઋતસ્ય પ્રેષા ઋતસ્ય ધીતિર્વિશ્વાયુર્વિશ્વે અપાંસિ ચક્રુઃ ॥ ૧.૦૬૮.૦૫
યસ્તુભ્યં દાશાદ્યો વા તે શિક્ષાત્તસ્મૈ ચિકિત્વાન્રયિં દયસ્વ ॥ ૧.૦૬૮.૦૬
હોતા નિષત્તો મનોરપત્યે સ ચિન્ન્વાસાં પતી રયીણામ્ ॥ ૧.૦૬૮.૦૭
ઇચ્છન્ત રેતો મિથસ્તનૂષુ સં જાનત સ્વૈર્દક્ષૈરમૂરાઃ ॥ ૧.૦૬૮.૦૮
પિતુર્ન પુત્રાઃ ક્રતું જુષન્ત શ્રોષન્યે અસ્ય શાસં તુરાસઃ ॥ ૧.૦૬૮.૦૯
વિ રાય ઔર્ણોદ્દુરઃ પુરુક્ષુઃ પિપેશ નાકં સ્તૃભિર્દમૂનાઃ ॥ ૧.૦૬૮.૧૦

શુક્રઃ શુશુક્વાઁ ઉષો ન જારઃ પપ્રા સમીચી દિવો ન જ્યોતિઃ ॥ ૧.૦૬૯.૦૧
પરિ પ્રજાતઃ ક્રત્વા બભૂથ ભુવો દેવાનાં પિતા પુત્રઃ સન્ ॥ ૧.૦૬૯.૦૨
વેધા અદૃપ્તો અગ્નિર્વિજાનન્નૂધર્ન ગોનાં સ્વાદ્મા પિતૂનામ્ ॥ ૧.૦૬૯.૦૩
જને ન શેવ આહૂર્યઃ સન્મધ્યે નિષત્તો રણ્વો દુરોણે ॥ ૧.૦૬૯.૦૪

પુત્રો ન જાતો રણ્વો દુરોણે વાજી ન પ્રીતો વિશો વિ તારીત્ ॥ ૧.૦૬૯.૦૫

વિશો યદહ્વે નૃભિઃ સનીળા અગ્નિર્દેવત્વા વિશ્વાન્યશ્યાઃ ॥ ૧.૦૬૯.૦૬

નકિષ્ટ એતા વ્રતા મિનન્તિ નૃભ્યો યદેભ્યઃ શ્રુષ્ટિં ચકર્થ ॥ ૧.૦૬૯.૦૭

તત્તુ તે દંસો યદહન્સમાનૈર્નૃભિર્યદ્યુક્તો વિવે રપાંસિ ॥ ૧.૦૬૯.૦૮

ઉષો ન જારો વિભાવોસ્રઃ સંજ્ઞાતરૂપશ્ચિકેતદસ્મૈ ॥ ૧.૦૬૯.૦૯

ત્મના વહન્તો દુરો વ્યૃણ્વન્નવન્ત વિશ્વે સ્વ૧ર્દૃશીકે ॥ ૧.૦૬૯.૧૦

વનેમ પૂર્વીરર્યો મનીષા અગ્નિઃ સુશોકો વિશ્વાન્યશ્યાઃ ॥ ૧.૦૭૦.૦૧

આ દૈવ્યાનિ વ્રતા ચિકિત્વાના માનુષસ્ય જનસ્ય જન્મ ॥ ૧.૦૭૦.૦૨

ગર્ભો યો અપાં ગર્ભો વનાનાં ગર્ભશ્ચ સ્થાતાં ગર્ભશ્ચરથામ્ ॥ ૧.૦૭૦.૦૩

અદ્રૌ ચિદસ્મા અન્તર્દુરોણે વિશાં ન વિશ્વો અમૃતઃ સ્વાધીઃ ॥ ૧.૦૭૦.૦૪

સ હિ ક્ષપાવાઁ અગ્ની રયીણાં દાશદ્યો અસ્મા અરં સૂક્તૈઃ ॥ ૧.૦૭૦.૦૫

એતા ચિકિત્વો ભૂમા નિ પાહિ દેવાનાં જન્મ મર્તાઁશ્ચ વિદ્વાન્ ॥ ૧.૦૭૦.૦૬

વર્ધાન્યં પૂર્વીઃ ક્ષપો વિરૂપાઃ સ્થાતુશ્ચ રથમૃતપ્રવીતમ્ ॥ ૧.૦૭૦.૦૭

અરાધિ હોતા સ્વ૧ર્નિષત્તઃ કૃણ્વન્વિશ્વાન્યપાંસિ સત્યા ॥ ૧.૦૭૦.૦૮

ગોષુ પ્રશસ્તિં વનેષુ ધિષે ભરન્ત વિશ્વે બલિં સ્વર્ણઃ ॥ ૧.૦૭૦.૦૯

વિ ત્વા નરઃ પુરુત્રા સપર્યન્પિતુર્ન જિવ્રેર્વિ વેદો ભરન્ત ॥ ૧.૦૭૦.૧૦

સાધુર્ન ગૃધ્નુરસ્તેવ શૂરો યાતેવ ભીમસ્ત્વેષઃ સમત્સુ ॥ ૧.૦૭૦.૧૧

ઉપ પ્ર જિન્વન્નુશતીરુશન્તં પતિં ન નિત્યં જનયઃ સનીળાઃ ।
સ્વસારઃ શ્યાવીમરુષીમજુષ્રઞ્ચિત્રમુચ્છન્તીમુષસં ન ગાવઃ ॥ ૧.૦૭૧.૦૧

વીળુ ચિદ્દૃળ્હા પિતરો ન ઉક્થૈરદ્રિં રુજન્નઙ્ગિરસો રવેણ ।
ચક્રુર્દિવો બૃહતો ગાતુમસ્મે અહઃ સ્વર્વિવિદુઃ કેતુમુસ્રાઃ ॥ ૧.૦૭૧.૦૨

દધન્નૃતં ધનયન્નસ્ય ધીતિમાદિદર્યો દિધિષ્વો૩ વિભૃત્રાઃ ।
અતૃષ્યન્તીરપસો યન્ત્યચ્છા દેવાઞ્જન્મ પ્રયસા વર્ધયન્તીઃ ॥ ૧.૦૭૧.૦૩

મથીદ્યદીં વિભૃતો માતરિશ્વા ગૃહેગૃહે શ્યેતો જેન્યો ભૂત્ ।
આદીં રાજ્ઞે ન સહીયસે સચા સન્ના દૂત્યં૧ ભૃગવાણો વિવાય ॥ ૧.૦૭૧.૦૪

મહે યત્પિત્ર ઈં રસં દિવે કરવ ત્સરત્પૃશન્યશ્ચિકિત્વાન્ ।
સૃજદસ્તા ધૃષતા દિદ્યુમસ્મૈ સ્વાયાં દેવો દુહિતરિ ત્વિષિં ધાત્ ॥ ૧.૦૭૧.૦૫

સ્વ આ યસ્તુભ્યં દમ આ વિભાતિ નમો વા દાશાદુશતો અનુ દ્યૂન્ ।
વર્ધો અગ્ને વયો અસ્ય દ્વિબર્હા યાસદ્રાયા સરથં યં જુનાસિ ॥ ૧.૦૭૧.૦૬
અગ્નિં વિશ્વા અભિ પૃક્ષઃ સચન્તે સમુદ્રં ન સ્રવતઃ સપ્ત યહ્વીઃ ।
ન જામિભિર્વિ ચિકિતે વયો નો વિદા દેવેષુ પ્રમતિં ચિકિત્વાન્ ॥ ૧.૦૭૧.૦૭
આ યદિષે નૃપતિં તેજ આનટ્ છુચિ રેતો નિષિક્તં દ્યૌરભીકે ।
અગ્નિઃ શર્ધમનવદ્યં યુવાનં સ્વાધ્યં જનયત્સૂદયચ્ચ ॥ ૧.૦૭૧.૦૮
મનો ન યોઽધ્વનઃ સદ્ય એત્યેકઃ સત્રા સૂરો વસ્વ ઈશે ।
રાજાના મિત્રાવરુણા સુપાણી ગોષુ પ્રિયમમૃતં રક્ષમાણા ॥ ૧.૦૭૧.૦૯
મા નો અગ્ને સખ્યા પિત્ર્યાણિ પ્ર મર્ષિષ્ઠા અભિ વિદુષ્કવિઃ સન્ ।
નભો ન રૂપં જરિમા મિનાતિ પુરા તસ્યા અભિશસ્તેરધીહિ ॥ ૧.૦૭૧.૧૦

નિ કાવ્યા વેધસઃ શશ્વતસ્કર્હસ્તે દધાનો નર્યા પુરૂણિ ।
અગ્નિર્ભુવદ્રયિપતી રયીણાં સત્રા ચક્રાણો અમૃતાનિ વિશ્વા ॥ ૧.૦૭૨.૦૧
અસ્મે વત્સં પરિ ષન્તં ન વિન્દન્નિચ્છન્તો વિશ્વે અમૃતા અમૂરાઃ ।
શ્રમયુવઃ પદવ્યો ધિયંધાસ્તસ્થુઃ પદે પરમે ચાર્વગ્નેઃ ॥ ૧.૦૭૨.૦૨
તિસ્રો યદગ્ને શરદસ્ત્વામિચ્છુચિં ઘૃતેન શુચયઃ સપર્યાન્ ।
નામાનિ ચિદ્દધિરે યજ્ઞિયાન્યસૂદયન્ત તન્વ૧ઃ સુજાતાઃ ॥ ૧.૦૭૨.૦૩
આ રોદસી બૃહતી વેવિદાનાઃ પ્ર રુદ્રિયા જભ્રિરે યજ્ઞિયાસઃ ।
વિદન્મર્તો નેમધિતા ચિકિત્વાનગ્નિં પદે પરમે તસ્થિવાંસમ્ ॥ ૧.૦૭૨.૦૪
સંજાનાના ઉપ સીદન્નભિજ્ઞુ પત્નીવન્તો નમસ્યં નમસ્યન્ ।
રિરિક્વાંસસ્તન્વઃ કૃણ્વત સ્વાઃ સખા સખ્યુર્નિમિષિ રક્ષમાણાઃ ॥ ૧.૦૭૨.૦૫
ત્રિઃ સપ્ત યદ્ગુહ્યાનિ ત્વે ઇત્પદાવિદન્નિહિતા યજ્ઞિયાસઃ ।
તેભી રક્ષન્તે અમૃતં સજોષાઃ પશૂઞ્ચ સ્થાતૄઞ્ચરથં ચ પાહિ ॥ ૧.૦૭૨.૦૬
વિદ્વાઁ અગ્ને વયુનાનિ ક્ષિતીનાં વ્યાનુષક્છુરુધો જીવસે ધાઃ ।
અન્તર્વિદ્વાઁ અધ્વનો દેવયાનાનતન્દ્રો દૂતો અભવો હવિર્વાટ્ ॥ ૧.૦૭૨.૦૭
સ્વાધ્યો દિવ આ સપ્ત યહ્વી રાયો દુરો વ્યૃતજ્ઞા અજાનન્ ।
વિદદ્ગવ્યં સરમા દૃળ્હમૂર્વં યેના નુ કં માનુષી ભોજતે વિટ્ ॥ ૧.૦૭૨.૦૮
આ યે વિશ્વા સ્વપત્યાનિ તસ્થુઃ કૃણ્વાનાસો અમૃતત્વાય ગાતુમ્ ।

મહ્ના મહદ્ભિઃ પૃથિવી વિ તસ્થે માતા પુત્રૈરદિતિર્ધાયસે વેઃ ॥ ૧.૦૭૨.૦૯
અધિ શ્રિયં નિ દધુશ્ચારુમસ્મિન્દિવો યદક્ષી અમૃતા અકૃણ્વન્ ।
અધ ક્ષરન્તિ સિન્ધવો ન સૃષ્ટાઃ પ્ર નીચીરગ્ને અરુષીરજાનન્ ॥ ૧.૦૭૨.૧૦
રયિર્ન યઃ પિતૃવિત્તો વયોધાઃ સુપ્રણીતિશ્ચિકિતુષો ન શાસુઃ ।
સ્યોનશીરતિથિર્ન પ્રીણાનો હોતેવ સદ્મ વિધતો વિ તારીત્ ॥ ૧.૦૭૩.૦૧
દેવો ન યઃ સવિતા સત્યમન્મા ક્રત્વા નિપાતિ વૃજનાનિ વિશ્વા ।
પુરુપ્રશસ્તો અમતિર્ન સત્ય આત્મેવ શેવો દિધિષાય્યો ભૂત્ ॥ ૧.૦૭૩.૦૨
દેવો ન યઃ પૃથિવીં વિશ્વધાયા ઉપક્ષેતિ હિતમિત્રો ન રાજા ।
પુરઃસદઃ શર્મસદો ન વીરા અનવદ્યા પતિજુષ્ટેવ નારી ॥ ૧.૦૭૩.૦૩
તં ત્વા નરો દમ આ નિત્યમિદ્ધમગ્ને સચન્ત ક્ષિતિષુ ધ્રુવાસુ ।
અધિ દ્યુમ્નં નિ દધુર્ભૂર્યસ્મિન્ભવા વિશ્વાયુર્ધરુણો રયીણામ્ ॥ ૧.૦૭૩.૦૪
વિ પૃક્ષો અગ્ને મઘવાનો અશ્યુર્વિ સૂરયો દદતો વિશ્વમાયુઃ ।
સનેમ વાજં સમિથેષ્વર્યો ભાગં દેવેષુ શ્રવસે દધાનાઃ ॥ ૧.૦૭૩.૦૫
ઋતસ્ય હિ ધેનવો વાવશાનાઃ સ્મદૂધ્નીઃ પીપયન્ત દ્યુભક્તાઃ ।
પરાવતઃ સુમતિં ભિક્ષમાણા વિ સિન્ધવઃ સમયા સસ્રુરદ્રિમ્ ॥ ૧.૦૭૩.૦૬
ત્વે અગ્ને સુમતિં ભિક્ષમાણા દિવિ શ્રવો દધિરે યજ્ઞિયાસઃ ।
નક્તા ચ ચક્રુરુષસા વિરૂપે કૃષ્ણં ચ વર્ણમરુણં ચ સં ધુઃ ॥ ૧.૦૭૩.૦૭
યાન્રાયે મર્તાન્સુષૂદો અગ્ને તે સ્યામ મઘવાનો વયં ચ ।
છાયેવ વિશ્વં ભુવનં સિસક્ષ્યાપપ્રિવાન્રોદસી અન્તરિક્ષમ્ ॥ ૧.૦૭૩.૦૮
અર્વદ્ભિરગ્ને અર્વતો નૃભિર્નૄન્વીરૈર્વીરાન્વનુયામા ત્વોતાઃ ।
ઈશાનાસઃ પિતૃવિત્તસ્ય રાયો વિ સૂરયઃ શતહિમા નો અશ્યુઃ ॥ ૧.૦૭૩.૦૯
એતા તે અગ્ન ઉચથાનિ વેધો જુષ્ટાનિ સન્તુ મનસે હૃદે ચ ।
શકેમ રાયઃ સુધુરો યમં તેઽધિ શ્રવો દેવભક્તં દધાનાઃ ॥ ૧.૦૭૩.૧૦
ઉપપ્રયન્તો અધ્વરં મન્ત્રં વોચેમાગ્નયે ।
આરે અસ્મે ચ શૃણ્વતે ॥ ૧.૦૭૪.૦૧
યઃ સ્નીહિતીષુ પૂર્વ્યઃ સંજગ્માનાસુ કૃષ્ટિષુ ।
અરક્ષદ્દાશુષે ગયમ્ ॥ ૧.૦૭૪.૦૨

ઉત બ્રુવન્તુ જન્તવ ઉદગ્નિર્વૃત્રહાજનિ ।
ધનંજયો રણેરણે ॥ ૧.૦૭૪.૦૩
યસ્ય દૂતો અસિ ક્ષયે વેષિ હવ્યાનિ વીતયે ।
દસ્મત્કૃણોષ્યધ્વરમ્ ॥ ૧.૦૭૪.૦૪
તમિત્સુહવ્યમઙ્ગિરઃ સુદેવં સહસો યહો ।
જના આહુઃ સુબર્હિષમ્ ॥ ૧.૦૭૪.૦૫
આ ચ વહાસિ તાઁ ઇહ દેવાઁ ઉપ પ્રશસ્તયે ।
હવ્યા સુશ્ચન્દ્ર વીતયે ॥ ૧.૦૭૪.૦૬
ન યોરુપબ્દિરશ્વ્યઃ શૃણ્વે રથસ્ય કચ્ચન ।
યદગ્ને યાસિ દૂત્યમ્ ॥ ૧.૦૭૪.૦૭
ત્વોતો વાજ્યહ્રયોઽભિ પૂર્વસ્માદપરઃ ।
પ્ર દાશ્વાઁ અગ્ને અસ્થાત્ ॥ ૧.૦૭૪.૦૮
ઉત દ્યુમત્સુવીર્યં બૃહદગ્ને વિવાસસિ ।
દેવેભ્યો દેવ દાશુષે ॥ ૧.૦૭૪.૦૯
જુષસ્વ સપ્રથસ્તમં વચો દેવપ્સરસ્તમમ્ ।
હવ્યા જુહ્વાન આસનિ ॥ ૧.૦૭૫.૦૧
અથા તે અઙ્ગિરસ્તમાગ્ને વેધસ્તમ પ્રિયમ્ ।
વોચેમ બ્રહ્મ સાનસિ ॥ ૧.૦૭૫.૦૨
કસ્તે જામિર્જનાનામગ્ને કો દાશ્વધ્વરઃ ।
કો હ કસ્મિન્નસિ શ્રિતઃ ॥ ૧.૦૭૫.૦૩
ત્વં જામિર્જનાનામગ્ને મિત્રો અસિ પ્રિયઃ ।
સખા સખિભ્ય ઈડ્યઃ ॥ ૧.૦૭૫.૦૪
યજા નો મિત્રાવરુણા યજા દેવાઁ ઋતં બૃહત્ ।
અગ્ને યક્ષિ સ્વં દમમ્ ॥ ૧.૦૭૫.૦૫
કા ત ઉપેતિર્મનસો વરાય ભુવદગ્ને શંતમા કા મનીષા ।
કો વા યજ્ઞૈઃ પરિ દક્ષં ત આપ કેન વા તે મનસા દાશેમ ॥ ૧.૦૭૬.૦૧
એહ્યગ્ન ઇહ હોતા નિ ષીદાદબ્ધઃ સુ પુરએતા ભવા નઃ ।

અવતાં ત્વા રોદસી વિશ્વમિન્વે યજા મહે સૌમનસાય દેવાન્ ॥ ૧.૦૭૬.૦૨
પ્ર સુ વિશ્વાન્રક્ષસો ધક્ષ્યગ્ને ભવા યજ્ઞાનામભિશસ્તિપાવા ।
અથા વહ સોમપતિં હરિભ્યામાતિથ્યમસ્મૈ ચકૃમા સુદાવ્ને ॥ ૧.૦૭૬.૦૩
પ્રજાવતા વચસા વહ્નિરાસા ચ હુવે નિ ચ સત્સીહ દેવૈઃ ।
વેષિ હોત્રમુત પોત્રં યજત્ર બોધિ પ્રયન્તર્જનિતર્વસૂનામ્ ॥ ૧.૦૭૬.૦૪
યથા વિપ્રસ્ય મનુષો હવિર્ભિર્દેવાઁ અયજઃ કવિભિઃ કવિઃ સન્ ।
એવા હોતઃ સત્યતર ત્વમદ્યાગ્ને મન્દ્રયા જુહ્વા યજસ્વ ॥ ૧.૦૭૬.૦૫

કથા દાશેમાગ્નયે કાસ્મૈ દેવજુષ્ટોચ્યતે ભામિને ગીઃ ।
યો મર્ત્યેષ્વમૃત ઋતાવા હોતા યજિષ્ઠ ઇત્કૃણોતિ દેવાન્ ॥ ૧.૦૭૭.૦૧
યો અધ્વરેષુ શંતમ ઋતાવા હોતા તમૂ નમોભિરા કૃણુધ્વમ્ ।
અગ્નિર્યદ્વેર્મર્તાય દેવાન્સ ચા બોધાતિ મનસા યજાતિ ॥ ૧.૦૭૭.૦૨
સ હિ ક્રતુઃ સ મર્યઃ સ સાધુર્મિત્રો ન ભૂદદ્ભુતસ્ય રથીઃ ।
તં મેધેષુ પ્રથમં દેવયન્તીર્વિશ ઉપ બ્રુવતે દસ્મમારીઃ ॥ ૧.૦૭૭.૦૩
સ નો નૃણાં નૃતમો રિશાદા અગ્નિર્ગિરોઽવસા વેતુ ધીતિમ્ ।
તના ચ યે મઘવાનઃ શવિષ્ઠા વાજપ્રસૂતા ઇષયન્ત મન્મ ॥ ૧.૦૭૭.૦૪
એવાગ્નિર્ગોતમેભિરૃતાવા વિપ્રેભિરસ્તોષ્ટ જાતવેદાઃ ।
સ એષુ દ્યુમ્નં પીપયત્સ વાજં સ પુષ્ટિં યાતિ જોષમા ચિકિત્વાન્ ॥ ૧.૦૭૭.૦૫

અભિ ત્વા ગોતમા ગિરા જાતવેદો વિચર્ષણે ।
દ્યુમ્નૈરભિ પ્ર ણોનુમઃ ॥ ૧.૦૭૮.૦૧
તમુ ત્વા ગોતમો ગિરા રાયસ્કામો દુવસ્યતિ ।
દ્યુમ્નૈરભિ પ્ર ણોનુમઃ ॥ ૧.૦૭૮.૦૨
તમુ ત્વા વાજસાતમમઙ્ગિરસ્વદ્ધવામહે ।
દ્યુમ્નૈરભિ પ્ર ણોનુમઃ ॥ ૧.૦૭૮.૦૩
તમુ ત્વા વૃત્રહન્તમં યો દસ્યૂઁરવધૂનુષે ।
દ્યુમ્નૈરભિ પ્ર ણોનુમઃ ॥ ૧.૦૭૮.૦૪
અવોચામ રહૂગણા અગ્નયે મધુમદ્વચઃ ।
દ્યુમ્નૈરભિ પ્ર ણોનુમઃ ॥ ૧.૦૭૮.૦૫

હિરણ્યકેશો રજસો વિસારેઽહિર્ધુનિર્વાત ઇવ ધ્રજીમાન્ ।
શુચિભ્રાજા ઉષસો નવેદા યશસ્વતીરપસ્યુવો ન સત્યાઃ ॥ ૧.૦૭૯.૦૧
આ તે સુપર્ણા અમિનન્તઁ એવૈઃ કૃષ્ણો નોનાવ વૃષભો યદીદમ્ ।
શિવાભિર્ન સ્મયમાનાભિરાગાત્પતન્તિ મિહઃ સ્તનયન્ત્યભ્રા ॥ ૧.૦૭૯.૦૨
યદીમૃતસ્ય પયસા પિયાનો નયન્નૃતસ્ય પથિભી રજિષ્ઠૈઃ ।
અર્યમા મિત્રો વરુણઃ પરિજ્મા ત્વચં પૃઞ્ચન્ત્યુપરસ્ય યોનૌ ॥ ૧.૦૭૯.૦૩
અગ્ને વાજસ્ય ગોમત ઈશાનઃ સહસો યહો ।
અસ્મે ધેહિ જાતવેદો મહિ શ્રવઃ ॥ ૧.૦૭૯.૦૪
સ ઇધાનો વસુષ્કવિરગ્નિરીળેન્યો ગિરા ।
રેવદસ્મભ્યં પુર્વણીક દીદિહિ ॥ ૧.૦૭૯.૦૫
ક્ષપો રાજન્નુત ત્મનાગ્ને વસ્તોરુતોષસઃ ।
સ તિગ્મજમ્ભ રક્ષસો દહ પ્રતિ ॥ ૧.૦૭૯.૦૬
અવા નો અગ્ન ઊતિભિર્ગાયત્રસ્ય પ્રભર્મણિ ।
વિશ્વાસુ ધીષુ વન્દ્ય ॥ ૧.૦૭૯.૦૭
આ નો અગ્ને રયિં ભર સત્રાસાહં વરેણ્યમ્ ।
વિશ્વાસુ પૃત્સુ દુષ્ટરમ્ ॥ ૧.૦૭૯.૦૮
આ નો અગ્ને સુચેતુના રયિં વિશ્વાયુપોષસમ્ ।
માર્ડીકં ધેહિ જીવસે ॥ ૧.૦૭૯.૦૯
પ્ર પૂતાસ્તિગ્મશોચિષે વાચો ગોતમાગ્નયે ।
ભરસ્વ સુમ્નયુર્ગિરઃ ॥ ૧.૦૭૯.૧૦
યો નો અગ્નેઽભિદાસત્યન્તિ દૂરે પદીષ્ટ સઃ ।
અસ્માકમિદ્વૃધે ભવ ॥ ૧.૦૭૯.૧૧
સહસ્રાક્ષો વિચર્ષણિરગ્ની રક્ષાંસિ સેધતિ ।
હોતા ગૃણીત ઉક્થ્યઃ ॥ ૧.૦૭૯.૧૨

ઇત્થા હિ સોમ ઇન્મદે બ્રહ્મા ચકાર વર્ધનમ્ ।
શવિષ્ઠ વજ્રિન્નોજસા પૃથિવ્યા નિઃ શશા અહિમર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૧
સ ત્વામદદ્વૃષા મદઃ સોમઃ શ્યેનાભૃતઃ સુતઃ ।

યેના વૃત્રં નિરદ્ભ્યો જઘન્થ વજ્રિન્નોજસાર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૨
પ્રેહ્યભીહિ ધૃષ્ણુહિ ન તે વજ્રો નિ યંસતે ।
ઇન્દ્ર નૃમ્ણં હિ તે શવો હનો વૃત્રં જયા અપોઽર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૩
નિરિન્દ્ર ભૂમ્યા અધિ વૃત્રં જઘન્થ નિર્દિવઃ ।
સૃજા મરુત્વતીરવ જીવધન્યા ઇમા અપોઽર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૪
ઇન્દ્રો વૃત્રસ્ય દોધતઃ સાનું વજ્રેણ હીળિતઃ ।
અભિક્રમ્યાવ જિઘ્નતેઽપઃ સર્માય ચોદયન્નર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૫
અધિ સાનૌ નિ જિઘ્નતે વજ્રેણ શતપર્વણા ।
મન્દાન ઇન્દ્રો અન્ધસઃ સખિભ્યો ગાતુમિચ્છત્યર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૬
ઇન્દ્ર તુભ્યમિદદ્રિવોઽનુત્તં વજ્રિન્વીર્યમ્ ।
યદ્ધ ત્યં માયિનં મૃગં તમુ ત્વં માયયાવધીરર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૭
વિ તે વજ્રાસો અસ્થિરન્નવતિં નાવ્યા૩ અનુ ।
મહત્ત ઇન્દ્ર વીર્યં બાહ્વોસ્તે બલં હિતમર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૮
સહસ્રં સાકમર્ચત પરિ ષ્ટોભત વિંશતિઃ ।
શતૈનમન્વનોનવુરિન્દ્રાય બ્રહ્મોદ્યતમર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૦૯
ઇન્દ્રો વૃત્રસ્ય તવિષીં નિરહન્સહસા સહઃ ।
મહત્તદસ્ય પૌંસ્યં વૃત્રં જઘન્વાઁ અસૃજદર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૦
ઇમે ચિત્તવ મન્યવે વેપેતે ભિયસા મહી ।
યદિન્દ્ર વજ્રિન્નોજસા વૃત્રં મરુત્વાઁ અવધીરર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૧
ન વેપસા ન તન્યતેન્દ્રં વૃત્રો વિ બીભયત્ ।
અભ્યેનં વજ્ર આયસઃ સહસ્રભૃષ્ટિરાયતાર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૨
યદ્વૃત્રં તવ ચાશનિં વજ્રેણ સમયોધયઃ ।
અહિમિન્દ્ર જિઘાંસતો દિવિ તે બદ્બધે શવોઽર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૩
અભિષ્ટને તે અદ્રિવો યત્સ્થા જગચ્ચ રેજતે ।
ત્વષ્ટા ચિત્તવ મન્યવ ઇન્દ્ર વેવિજ્યતે ભિયાર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૪
નહિ નુ યાદધીમસીન્દ્રં કો વીર્યા પરઃ ।
તસ્મિન્નૃમ્ણમુત ક્રતું દેવા ઓજાંસિ સં દધુરર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૫

યામથર્વા મનુષ્પિતા દધ્યઙ્ ધિયમત્નત ।
તસ્મિન્બ્રહ્માણિ પૂર્વથેન્દ્ર ઉક્થા સમગ્મતાર્ચન્નનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૦.૧૬

ઇન્દ્રો મદાય વાવૃધે શવસે વૃત્રહા નૃભિઃ ।
તમિન્મહત્સ્વાજિષૂતેમર્ભે હવામહે સ વાજેષુ પ્ર નોઽવિષત્ ॥ ૧.૦૮૧.૦૧
અસિ હિ વીર સેન્યોઽસિ ભૂરિ પરાદદિઃ ।
અસિ દભ્રસ્ય ચિદ્વૃધો યજમાનાય શિક્ષસિ સુન્વતે ભૂરિ તે વસુ ॥ ૧.૦૮૧.૦૨
યદુદીરત આજયો ધૃષ્ણવે ધીયતે ધના ।
યુક્ષ્વા મદચ્યુતા હરી કં હનઃ કં વસૌ દધોઽસ્માઁ ઇન્દ્ર વસૌ દધઃ ॥ ૧.૦૮૧.૦૩
ક્રત્વા મહાઁ અનુષ્વધં ભીમ આ વાવૃધે શવઃ ।
શ્રિય ઋષ્વ ઉપાકયોર્નિ શિપ્રી હરિવાન્દધે હસ્તયોર્વજ્રમાયસમ્ ॥ ૧.૦૮૧.૦૪
આ પપ્રૌ પાર્થિવં રજો બદ્બધે રોચના દિવિ ।
ન ત્વાવાઁ ઇન્દ્ર કશ્ચન ન જાતો ન જનિષ્યતેઽતિ વિશ્વં વવક્ષિથ ॥ ૧.૦૮૧.૦૫
યો અર્યો મર્તભોજનં પરાદદાતિ દાશુષે ।
ઇન્દ્રો અસ્મભ્યં શિક્ષતુ વિ ભજા ભૂરિ તે વસુ ભક્ષીય તવ રાધસઃ ॥ ૧.૦૮૧.૦૬
મદેમદે હિ નો દદિર્યૂથા ગવામૃજુક્રતુઃ ।
સં ગૃભાય પુરૂ શતોભયાહસ્ત્યા વસુ શિશીહિ રાય આ ભર ॥ ૧.૦૮૧.૦૭
માદયસ્વ સુતે સચા શવસે શૂર રાધસે ।
વિદ્મા હિ ત્વા પુરૂવસુમુપ કામાન્સસૃજ્મહેઽથા નોઽવિતા ભવ ॥ ૧.૦૮૧.૦૮
એતે ત ઇન્દ્ર જન્તવો વિશ્વં પુષ્યન્તિ વાર્યમ્ ।
અન્તર્હિ ખ્યો જનાનામર્યો વેદો અદાશુષાં તેષાં નો વેદ આ ભર ॥ ૧.૦૮૧.૦૯

ઉપો ષુ શૃણુહી ગિરો મઘવન્માતથા ઇવ ।
યદા નઃ સૂનૃતાવતઃ કર આદર્થયાસ ઇદ્યોજા ન્વિન્દ્ર તે હરી ॥ ૧.૦૮૨.૦૧
અક્ષન્નમીમદન્ત હ્યવ પ્રિયા અધૂષત ।
અસ્તોષત સ્વભાનવો વિપ્રા નવિષ્ઠયા મતી યોજા ન્વિન્દ્ર તે હરી ॥ ૧.૦૮૨.૦૨
સુસંદૃશં ત્વા વયં મઘવન્વન્દિષીમહિ ।
પ્ર નૂનં પૂર્ણવન્ધુરઃ સ્તુતો યાહિ વશાઁ અનુ યોજા ન્વિન્દ્ર તે હરી ॥ ૧.૦૮૨.૦૩
સ ઘા તં વૃષણં રથમધિ તિષ્ઠાતિ ગોવિદમ્ ।

યઃ પાત્રં હારિયોજનં પૂર્ણમિન્દ્ર ચિકેતતિ યોજા ન્વિન્દ્ર તે હરી ॥ ૧.૦૮૨.૦૪
યુક્તસ્તે અસ્તુ દક્ષિણ ઉત સવ્યઃ શતક્રતો ।
તેન જાયામુપ પ્રિયાં મન્દાનો યાહ્યન્ધસો યોજા ન્વિન્દ્ર તે હરી ॥ ૧.૦૮૨.૦૫
યુનજ્મિ તે બ્રહ્મણા કેશિના હરી ઉપ પ્ર યાહિ દધિષે ગભસ્ત્યોઃ ।
ઉત્ત્વા સુતાસો રભસા અમન્દિષુઃ પૂષણ્વાન્વજ્રિન્સમુ પત્ન્યામદઃ ॥ ૧.૦૮૨.૦૬

અશ્વાવતિ પ્રથમો ગોષુ ગચ્છતિ સુપ્રાવીરિન્દ્ર મર્ત્યસ્તવોતિભિઃ ।
તમિત્પૃણક્ષિ વસુના ભવીયસા સિન્ધુમાપો યથાભિતો વિચેતસઃ ॥ ૧.૦૮૩.૦૧
આપો ન દેવીરુપ યન્તિ હોત્રિયમવઃ પશ્યન્તિ વિતતં યથા રજઃ ।
પ્રાચૈર્દેવાસઃ પ્ર ણયન્તિ દેવયું બ્રહ્મપ્રિયં જોષયન્તે વરા ઇવ ॥ ૧.૦૮૩.૦૨
અધિ દ્વયોરદધા ઉક્થ્યં૧ વચો યતસ્રુચા મિથુના યા સપર્યતઃ ।
અસંયત્તો વ્રતે તે ક્ષેતિ પુષ્યતિ ભદ્રા શક્તિર્યજમાનાય સુન્વતે ॥ ૧.૦૮૩.૦૩
આદઙ્ગિરાઃ પ્રથમં દધિરે વય ઇદ્ધાગ્નયઃ શમ્યા યે સુકૃત્યયા ।
સર્વં પણેઃ સમવિન્દન્ત ભોજનમશ્વાવન્તં ગોમન્તમા પશું નરઃ ॥ ૧.૦૮૩.૦૪
યજ્ઞૈરથર્વા પ્રથમઃ પથસ્તતે તતઃ સૂર્યો વ્રતપા વેન આજનિ ।
આ ગા આજદુશના કાવ્યઃ સચા યમસ્ય જાતમમૃતં યજામહે ॥ ૧.૦૮૩.૦૫
બર્હિર્વા યત્સ્વપત્યાય વૃજ્યતેઽર્કો વા શ્લોકમાઘોષતે દિવિ ।
ગ્રાવા યત્ર વદતિ કારુરુક્થ્ય૧સ્તસ્યેદિન્દ્રો અભિપિત્વેષુ રણ્યતિ ॥ ૧.૦૮૩.૦૬

અસાવિ સોમ ઇન્દ્ર તે શવિષ્ઠ ધૃષ્ણવા ગહિ ।
આ ત્વા પૃણક્ત્વિન્દ્રિયં રજઃ સૂર્યો ન રશ્મિભિઃ ॥ ૧.૦૮૪.૦૧
ઇન્દ્રમિદ્ધરી વહતોઽપ્રતિધૃષ્ટશવસમ્ ।
ઋષીણાં ચ સ્તુતીરુપ યજ્ઞં ચ માનુષાણામ્ ॥ ૧.૦૮૪.૦૨
આ તિષ્ઠ વૃત્રહન્રથં યુક્તા તે બ્રહ્મણા હરી ।
અર્વાચીનં સુ તે મનો ગ્રાવા કૃણોતુ વગ્નુના ॥ ૧.૦૮૪.૦૩
ઇમમિન્દ્ર સુતં પિબ જ્યેષ્ઠમમર્ત્યં મદમ્ ।
શુક્રસ્ય ત્વાભ્યક્ષરન્ધારા ઋતસ્ય સાદને ॥ ૧.૦૮૪.૦૪
ઇન્દ્રાય નૂનમર્ચતોક્થાનિ ચ બ્રવીતન ।
સુતા અમત્સુરિન્દવો જ્યેષ્ઠં નમસ્યતા સહઃ ॥ ૧.૦૮૪.૦૫

નકિષ્ટ્વદ્રથીતરો હરી યદિન્દ્ર યચ્છસે ।
નકિષ્ટ્વાનુ મજ્મના નકિઃ સ્વશ્વ આનશે ॥ ૧.૦૮૪.૦૬
ય એક ઇદ્વિદયતે વસુ મર્તાય દાશુષે ।
ઈશાનો અપ્રતિષ્કુત ઇન્દ્રો અઙ્ગ ॥ ૧.૦૮૪.૦૭
કદા મર્તમરાધસં પદા ક્ષુમ્પમિવ સ્ફુરત્ ।
કદા નઃ શુશ્રવદ્ગિર ઇન્દ્રો અઙ્ગ ॥ ૧.૦૮૪.૦૮
યશ્ચિદ્ધિ ત્વા બહુભ્ય આ સુતાવાઁ આવિવાસતિ ।
ઉગ્રં તત્પત્યતે શવ ઇન્દ્રો અઙ્ગ ॥ ૧.૦૮૪.૦૯
સ્વાદોરિત્થા વિષૂવતો મધ્વઃ પિબન્તિ ગૌર્યઃ ।
યા ઇન્દ્રેણ સયાવરીર્વૃષ્ણા મદન્તિ શોભસે વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૪.૧૦
તા અસ્ય પૃશનાયુવઃ સોમં શ્રીણન્તિ પૃશ્નયઃ ।
પ્રિયા ઇન્દ્રસ્ય ધેનવો વજ્રં હિન્વન્તિ સાયકં વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૪.૧૧
તા અસ્ય નમસા સહઃ સપર્યન્તિ પ્રચેતસઃ ।
વ્રતાન્યસ્ય સશ્ચિરે પુરૂણિ પૂર્વચિત્તયે વસ્વીરનુ સ્વરાજ્યમ્ ॥ ૧.૦૮૪.૧૨
ઇન્દ્રો દધીચો અસ્થભિર્વૃત્રાણ્યપ્રતિષ્કુતઃ ।
જઘાન નવતીર્નવ ॥ ૧.૦૮૪.૧૩
ઇચ્છન્નશ્વસ્ય યચ્છિરઃ પર્વતેષ્વપશ્રિતમ્ ।
તદ્વિદચ્છર્યણાવતિ ॥ ૧.૦૮૪.૧૪
અત્રાહ ગોરમન્વત નામ ત્વષ્ટુરપીચ્યમ્ ।
ઇત્થા ચન્દ્રમસો ગૃહે ॥ ૧.૦૮૪.૧૫
કો અદ્ય યુઙ્ક્તે ધુરિ ગા ઋતસ્ય શિમીવતો ભામિનો દુર્હૃણાયૂન્ ।
આસન્નિષૂન્હૃત્સ્વસો મયોભૂન્ય એષાં ભૃત્યામૃણધત્સ જીવાત્ ॥ ૧.૦૮૪.૧૬
ક ઈષતે તુજ્યતે કો બિભાય કો મંસતે સન્તમિન્દ્રં કો અન્તિ ।
કસ્તોકાય ક ઇભાયોત રાયેઽધિ બ્રવત્તન્વે૩ કો જનાય ॥ ૧.૦૮૪.૧૭
કો અગ્નિમીટ્ટે હવિષા ઘૃતેન સ્રુચા યજાતા ઋતુભિર્ધ્રુવેભિઃ ।
કસ્મૈ દેવા આ વહાનાશુ હોમ કો મંસતે વીતિહોત્રઃ સુદેવઃ ॥ ૧.૦૮૪.૧૮
ત્વમઙ્ગ પ્ર શંસિષો દેવઃ શવિષ્ઠ મર્ત્યમ્ ।

ન ત્વદન્યો મઘવન્નસ્તિ મર્ડિતેન્દ્ર બ્રવીમિ તે વચઃ ॥ ૧.૦૮૪.૧૯
મા તે રાધાંસિ મા ત ઊતયો વસોઽસ્માન્કદા ચના દભન્ ।
વિશ્વા ચ ન ઉપમિમીહિ માનુષ વસૂનિ ચર્ષણિભ્ય આ ॥ ૧.૦૮૪.૨૦
પ્ર યે શુમ્ભન્તે જનયો ન સપ્તયો યામન્રુદ્રસ્ય સૂનવઃ સુદંસસઃ ।
રોદસી હિ મરુતશ્ચક્રિરે વૃધે મદન્તિ વીરા વિદથેષુ ઘૃષ્વયઃ ॥ ૧.૦૮૫.૦૧
ત ઉક્ષિતાસો મહિમાનમાશત દિવિ રુદ્રાસો અધિ ચક્રિરે સદઃ ।
અર્ચન્તો અર્કં જનયન્ત ઇન્દ્રિયમધિ શ્રિયો દધિરે પૃશ્નિમાતરઃ ॥ ૧.૦૮૫.૦૨
ગોમાતરો યચ્છુભયન્તે અઞ્જિભિસ્તનૂષુ શુભ્રા દધિરે વિરુક્મતઃ ।
બાધન્તે વિશ્વમભિમાતિનમપ વર્ત્માન્યેષામનુ રીયતે ઘૃતમ્ ॥ ૧.૦૮૫.૦૩
વિ યે ભ્રાજન્તે સુમખાસ ઋષ્ટિભિઃ પ્રચ્યાવયન્તો અચ્યુતા ચિદોજસા ।
મનોજુવો યન્મરુતો રથેષ્વા વૃષવ્રાતાસઃ પૃષતીરયુગ્ધ્વમ્ ॥ ૧.૦૮૫.૦૪
પ્ર યદ્રથેષુ પૃષતીરયુગ્ધ્વં વાજે અદ્રિં મરુતો રંહયન્તઃ ।
ઉતારુષસ્ય વિ ષ્યન્તિ ધારાશ્ચર્મેવોદભિર્વ્યુન્દન્તિ ભૂમ ॥ ૧.૦૮૫.૦૫
આ વો વહન્તુ સપ્તયો રઘુષ્યદો રઘુપત્વાનઃ પ્ર જિગાત બાહુભિઃ ।
સીદતા બર્હિરુરુ વઃ સદસ્કૃતં માદયધ્વં મરુતો મધ્વો અન્ધસઃ ॥ ૧.૦૮૫.૦૬
તેઽવર્ધન્ત સ્વતવસો મહિત્વના નાકં તસ્થુરુરુ ચક્રિરે સદઃ ।
વિષ્ણુર્યદ્ધાવદ્વૃષણં મદચ્યુતં વયો ન સીદન્નધિ બર્હિષિ પ્રિયે ॥ ૧.૦૮૫.૦૭
શૂરા ઇવેદ્યુયુધયો ન જગ્મયઃ શ્રવસ્યવો ન પૃતનાસુ યેતિરે ।
ભયન્તે વિશ્વા ભુવના મરુદ્ભ્યો રાજાન ઇવ ત્વેષસંદૃશો નરઃ ॥ ૧.૦૮૫.૦૮
ત્વષ્ટા યદ્વજ્રં સુકૃતં હિરણ્યયં સહસ્રભૃષ્ટિં સ્વપા અવર્તયત્ ।
ધત્ત ઇન્દ્રો નર્યપાંસિ કર્તવેઽહન્વૃત્રં નિરપામૌબ્જદર્ણવમ્ ॥ ૧.૦૮૫.૦૯
ઊર્ધ્વં નુનુદ્રેઽવતં ત ઓજસા દાદૃહાણં ચિદ્બિભિદુર્વિ પર્વતમ્ ।
ધમન્તો વાણં મરુતઃ સુદાનવો મદે સોમસ્ય રણ્યાનિ ચક્રિરે ॥ ૧.૦૮૫.૧૦
જિહ્મં નુનુદ્રેઽવતં તયા દિશાસિઞ્ચન્નુત્સં ગોતમાય તૃષ્ણજે ।
આ ગચ્છન્તીમવસા ચિત્રભાનવઃ કામં વિપ્રસ્ય તર્પયન્ત ધામભિઃ ॥ ૧.૦૮૫.૧૧
યા વઃ શર્મ શશમાનાય સન્તિ ત્રિધાતૂનિ દાશુષે યચ્છતાધિ ।
અસ્મભ્યં તાનિ મરુતો વિ યન્ત રયિં નો ધત્ત વૃષણઃ સુવીરમ્ ॥ ૧.૦૮૫.૧૨

મરુતો યસ્ય હિ ક્ષયે પાથા દિવો વિમહસઃ ।
સ સુગોપાતમો જનઃ ॥ ૧.૦૮૬.૦૧
યજ્ઞૈર્વા યજ્ઞવાહસો વિપ્રસ્ય વા મતીનામ્ ।
મરુતઃ શૃણુતા હવમ્ ॥ ૧.૦૮૬.૦૨
ઉત વા યસ્ય વાજિનોઽનુ વિપ્રમતક્ષત ।
સ ગન્તા ગોમતિ વ્રજે ॥ ૧.૦૮૬.૦૩
અસ્ય વીરસ્ય બર્હિષિ સુતઃ સોમો દિવિષ્ટિષુ ।
ઉક્થં મદશ્ચ શસ્યતે ॥ ૧.૦૮૬.૦૪
અસ્ય શ્રોષન્ત્વા ભુવો વિશ્વા યશ્ચર્ષણીરભિ ।
સૂરં ચિત્સસ્રુષીરિષઃ ॥ ૧.૦૮૬.૦૫
પૂર્વીભિર્હિ દદાશિમ શરદ્ભિર્મરુતો વયમ્ ।
અવોભિશ્ચર્ષણીનામ્ ॥ ૧.૦૮૬.૦૬
સુભગઃ સ પ્રયજ્યવો મરુતો અસ્તુ મર્ત્યઃ ।
યસ્ય પ્રયાંસિ પર્ષથ ॥ ૧.૦૮૬.૦૭
શશમાનસ્ય વા નરઃ સ્વેદસ્ય સત્યશવસઃ ।
વિદા કામસ્ય વેનતઃ ॥ ૧.૦૮૬.૦૮
યૂયં તત્સત્યશવસ આવિષ્કર્ત મહિત્વના ।
વિધ્યતા વિદ્યુતા રક્ષઃ ॥ ૧.૦૮૬.૦૯
ગૂહતા ગુહ્યં તમો વિ યાત વિશ્વમત્રિણમ્ ।
જ્યોતિષ્કર્તા યદુશ્મસિ ॥ ૧.૦૮૬.૧૦
પ્રત્વક્ષસઃ પ્રતવસો વિરપ્શિનોઽનાનતા અવિથુરા ઋજીષિણઃ ।
જુષ્ટતમાસો નૃતમાસો અઞ્જિભિર્વ્યાનજ્રે કે ચિદુસ્રા ઇવ સ્તૃભિઃ ॥ ૧.૦૮૭.૦૧
ઉપહ્વરેષુ યદચિધ્વં યયિં વય ઇવ મરુતઃ કેન ચિત્પથા ।
શ્ચોતન્તિ કોશા ઉપ વો રથેષ્વા ઘૃતમુક્ષતા મધુવર્ણમર્ચતે ॥ ૧.૦૮૭.૦૨
પ્રૈષામજ્મેષુ વિથુરેવ રેજતે ભૂમિર્યામેષુ યદ્ધ યુઞ્જતે શુભે ।
તે ક્રીળયો ધુનયો ભ્રાજદૃષ્ટયઃ સ્વયં મહિત્વં પનયન્ત ધૂતયઃ ॥ ૧.૦૮૭.૦૩
સ હિ સ્વસૃત્પૃષદશ્વો યુવા ગણોઽયા ઈશાનસ્તવિષીભિરાવૃતઃ ।

અસિ સત્ય ઋણયાવાનેદ્યોઽસ્યા ધિયઃ પ્રાવિતાથા વૃષા ગણઃ ॥ ૧.૦૮૭.૦૪

પિતુઃ પ્રત્નસ્ય જન્મના વદામસિ સોમસ્ય જિહ્વા પ્ર જિગાતિ ચક્ષસા ।
યદીમિન્દ્રં શમ્યૃક્વાણ આશતાદિન્નામાનિ યજ્ઞિયાનિ દધિરે ॥ ૧.૦૮૭.૦૫

શ્રિયસે કં ભાનુભિઃ સં મિમિક્ષિરે તે રશ્મિભિસ્ત ઋક્વભિઃ સુખાદયઃ ।
તે વાશીમન્ત ઇષ્મિણો અભીરવો વિદ્રે પ્રિયસ્ય મારુતસ્ય ધામ્નઃ ॥ ૧.૦૮૭.૦૬

આ વિદ્યુન્મદ્ભિર્મરુતઃ સ્વર્કૈ રથેભિર્યાત ઋષ્ટિમદ્ભિરશ્વપર્ણૈઃ ।
આ વર્ષિષ્ઠયા ન ઇષા વયો ન પપ્તતા સુમાયાઃ ॥ ૧.૦૮૮.૦૧

તેઽરુણેભિર્વરમા પિશઙ્ગૈઃ શુભે કં યાન્તિ રથતૂર્ભિરશ્વૈઃ ।
રુક્મો ન ચિત્રઃ સ્વધિતીવાન્પવ્યા રથસ્ય જઙ્ઘનન્ત ભૂમ ॥ ૧.૦૮૮.૦૨

શ્રિયે કં વો અધિ તનૂષુ વાશીર્મેધા વના ન કૃણવન્ત ઊર્ધ્વા ।
યુષ્મભ્યં કં મરુતઃ સુજાતાસ્તુવિદ્યુમ્નાસો ધનયન્તે અદ્રિમ્ ॥ ૧.૦૮૮.૦૩

અહાનિ ગૃધ્રાઃ પર્યા વ આગુરિમાં ધિયં વાર્કાર્યાં ચ દેવીમ્ ।
બ્રહ્મ કૃણ્વન્તો ગોતમાસો અર્કૈરૂર્ધ્વં નુનુદ્ર ઉત્સધિં પિબધ્યૈ ॥ ૧.૦૮૮.૦૪

એતત્ત્યન્ન યોજનમચેતિ સસ્વર્હ યન્મરુતો ગોતમો વઃ ।
પશ્યન્હિરણ્યચક્રાનયોદંષ્ટ્રાન્વિધાવતો વરાહૂન્ ॥ ૧.૦૮૮.૦૫

એષા સ્યા વો મરુતોઽનુભર્ત્રી પ્રતિ ષ્ટોભતિ વાઘતો ન વાણી ।
અસ્તોભયદ્વૃથાસામનુ સ્વધાં ગભસ્ત્યોઃ ॥ ૧.૦૮૮.૦૬

આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોઽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
દેવા નો યથા સદમિદ્વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવેદિવે ॥ ૧.૦૮૯.૦૧

દેવાનાં ભદ્રા સુમતિરૃજૂયતાં દેવાનાં રાતિરભિ નો નિ વર્તતામ્ ।
દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્ર તિરન્તુ જીવસે ॥ ૧.૦૮૯.૦૨

તાન્પૂર્વયા નિવિદા હૂમહે વયં ભગં મિત્રમદિતિં દક્ષમસ્રિધમ્ ।
અર્યમણં વરુણં સોમમશ્વિના સરસ્વતી નઃ સુભગા મયસ્કરત્ ॥ ૧.૦૮૯.૦૩

તન્નો વાતો મયોભુ વાતુ ભેષજં તન્માતા પૃથિવી તત્પિતા દ્યૌઃ ।
તદ્ગ્રાવાણઃ સોમસુતો મયોભુવસ્તદશ્વિના શૃણુતં ધિષ્ણ્યા યુવમ્ ॥ ૧.૦૮૯.૦૪

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥ ૧.૦૮૯.૦૫

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૧.૦૮૯.૦૬
પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષુ જગ્મયઃ ।
અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ॥ ૧.૦૮૯.૦૭
ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥ ૧.૦૮૯.૦૮
શતમિન્નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ॥ ૧.૦૮૯.૦૯
અદિતિર્દ્યૌરદિતિરન્તરિક્ષમદિતિર્માતા સ પિતા સ પુત્રઃ ।
વિશ્વે દેવા અદિતિઃ પઞ્ચ જના અદિતિર્જાતમદિતિર્જનિત્વમ્ ॥ ૧.૦૮૯.૧૦
ઋજુનીતી નો વરુણો મિત્રો નયતુ વિદ્વાન્ ।
અર્યમા દેવૈઃ સજોષાઃ ॥ ૧.૦૯૦.૦૧
તે હિ વસ્વો વસવાનાસ્તે અપ્રમૂરા મહોભિઃ ।
વ્રતા રક્ષન્તે વિશ્વાહા ॥ ૧.૦૯૦.૦૨
તે અસ્મભ્યં શર્મ યંસન્નમૃતા મર્ત્યેભ્યઃ ।
બાધમાના અપ દ્વિષઃ ॥ ૧.૦૯૦.૦૩
વિ નઃ પથઃ સુવિતાય ચિયન્ત્વિન્દ્રો મરુતઃ ।
પૂષા ભગો વન્દ્યાસઃ ॥ ૧.૦૯૦.૦૪
ઉત નો ધિયો ગોઅગ્રાઃ પૂષન્વિષ્ણવેવયાવઃ ।
કર્તા નઃ સ્વસ્તિમતઃ ॥ ૧.૦૯૦.૦૫
મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ॥ ૧.૦૯૦.૦૬
મધુ નક્તમુતોષસો મધુમત્પાર્થિવં રજઃ ।
મધુ દ્યૌરસ્તુ નઃ પિતા ॥ ૧.૦૯૦.૦૭
મધુમાન્નો વનસ્પતિર્મધુમાઁ અસ્તુ સૂર્યઃ ।
માધ્વીર્ગાવો ભવન્તુ નઃ ॥ ૧.૦૯૦.૦૮
શં નો મિત્રઃ શં વરુણઃ શં નો ભવત્વર્યમા ।

શં ન ઇન્દ્રો બૃહસ્પતિઃ શં નો વિષ્ણુરુરુક્રમઃ ॥ ૧.૦૯૦.૦૯
ત્વં સોમ પ્ર ચિકિતો મનીષા ત્વં રજિષ્ઠમનુ નેષિ પન્થામ્ ।
તવ પ્રણીતી પિતરો ન ઇન્દો દેવેષુ રત્નમભજન્ત ધીરાઃ ॥ ૧.૦૯૧.૦૧
ત્વં સોમ ક્રતુભિઃ સુક્રતુર્ભૂસ્ત્વં દક્ષૈઃ સુદક્ષો વિશ્વવેદાઃ ।
ત્વં વૃષા વૃષત્વેભિર્મહિત્વા દ્યુમ્નેભિર્દ્યુમ્ન્યભવો નૃચક્ષાઃ ॥ ૧.૦૯૧.૦૨
રાજ્ઞો નુ તે વરુણસ્ય વ્રતાનિ બૃહદ્ગભીરં તવ સોમ ધામ ।
શુચિષ્ટ્વમસિ પ્રિયો ન મિત્રો દક્ષાય્યો અર્યમેવાસિ સોમ ॥ ૧.૦૯૧.૦૩
યા તે ધામાનિ દિવિ યા પૃથિવ્યાં યા પર્વતેષ્વોષધીષ્વપ્સુ ।
તેભિર્નો વિશ્વૈઃ સુમના અહેળન્રાજન્સોમ પ્રતિ હવ્યા ગૃભાય ॥ ૧.૦૯૧.૦૪
ત્વં સોમાસિ સત્પતિસ્ત્વં રાજોત વૃત્રહા ।
ત્વં ભદ્રો અસિ ક્રતુઃ ॥ ૧.૦૯૧.૦૫
ત્વં ચ સોમ નો વશો જીવાતું ન મરામહે ।
પ્રિયસ્તોત્રો વનસ્પતિઃ ॥ ૧.૦૯૧.૦૬
ત્વં સોમ મહે ભગં ત્વં યૂન ઋતાયતે ।
દક્ષં દધાસિ જીવસે ॥ ૧.૦૯૧.૦૭
ત્વં નઃ સોમ વિશ્વતો રક્ષા રાજન્નઘાયતઃ ।
ન રિષ્યેત્ત્વાવતઃ સખા ॥ ૧.૦૯૧.૦૮
સોમ યાસ્તે મયોભુવ ઊતયઃ સન્તિ દાશુષે ।
તાભિર્નોઽવિતા ભવ ॥ ૧.૦૯૧.૦૯
ઇમં યજ્ઞમિદં વચો જુજુષાણ ઉપાગહિ ।
સોમ ત્વં નો વૃધે ભવ ॥ ૧.૦૯૧.૧૦
સોમ ગીર્ભિષ્ટ્વા વયં વર્ધયામો વચોવિદઃ ।
સુમૃળીકો ન આ વિશ ॥ ૧.૦૯૧.૧૧
ગયસ્ફાનો અમીવહા વસુવિત્પુષ્ટિવર્ધનઃ ।
સુમિત્રઃ સોમ નો ભવ ॥ ૧.૦૯૧.૧૨
સોમ રારન્ધિ નો હૃદિ ગાવો ન યવસેષ્વા ।
મર્ય ઇવ સ્વ ઓક્યે ॥ ૧.૦૯૧.૧૩

યઃ સોમ સખ્યે તવ રારણદ્દેવ મર્ત્યઃ ।
તં દક્ષઃ સચતે કવિઃ ॥ ૧.૦૯૧.૧૪

ઉરુષ્યા ણો અભિશસ્તેઃ સોમ નિ પાહ્યંહસઃ ।
સખા સુશેવ એધિ નઃ ॥ ૧.૦૯૧.૧૫

આ પ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણ્યમ્ ।
ભવા વાજસ્ય સંગથે ॥ ૧.૦૯૧.૧૬

આ પ્યાયસ્વ મદિન્તમ સોમ વિશ્વેભિરંશુભિઃ ।
ભવા નઃ સુશ્રવસ્તમઃ સખા વૃધે ॥ ૧.૦૯૧.૧૭

સં તે પયાંસિ સમુ યન્તુ વાજાઃ સં વૃષ્ણ્યાન્યભિમાતિષાહઃ ।
આપ્યાયમાનો અમૃતાય સોમ દિવિ શ્રવાંસ્યુત્તમાનિ ધિષ્વ ॥ ૧.૦૯૧.૧૮

યા તે ધામાનિ હવિષા યજન્તિ તા તે વિશ્વા પરિભૂરસ્તુ યજ્ઞમ્ ।
ગયસ્ફાનઃ પ્રતરણઃ સુવીરોઽવીરહા પ્ર ચરા સોમ દુર્યાન્ ॥ ૧.૦૯૧.૧૯

સોમો ધેનું સોમો અર્વન્તમાશું સોમો વીરં કર્મણ્યં દદાતિ ।
સાદન્યં વિદથ્યં સભેયં પિતૃશ્રવણં યો દદાશદસ્મૈ ॥ ૧.૦૯૧.૨૦

અષાળ્હં યુત્સુ પૃતનાસુ પપ્રિં સ્વર્ષામપ્સાં વૃજનસ્ય ગોપામ્ ।
ભરેષુજાં સુક્ષિતિં સુશ્રવસં જયન્તં ત્વામનુ મદેમ સોમ ॥ ૧.૦૯૧.૨૧

ત્વમિમા ઓષધીઃ સોમ વિશ્વાસ્ત્વમપો અજનયસ્ત્વં ગાઃ ।
ત્વમા તતન્થોર્વ૧ન્તરિક્ષં ત્વં જ્યોતિષા વિ તમો વવર્થ ॥ ૧.૦૯૧.૨૨

દેવેન નો મનસા દેવ સોમ રાયો ભાગં સહસાવન્નભિ યુધ્ય ।
મા ત્વા તનદીશિષે વીર્યસ્યોભયેભ્યઃ પ્ર ચિકિત્સા ગવિષ્ટૌ ॥ ૧.૦૯૧.૨૩

એતા ઉ ત્યા ઉષસઃ કેતુમક્રત પૂર્વે અર્ધે રજસો ભાનુમઞ્જતે ।
નિષ્કૃણ્વાના આયુધાનીવ ધૃષ્ણવઃ પ્રતિ ગાવોઽરુષીર્યન્તિ માતરઃ ॥ ૧.૦૯૨.૦૧

ઉદપપ્તન્નરુણા ભાનવો વૃથા સ્વાયુજો અરુષીર્ગા અયુક્ષત ।
અક્રન્નુષાસો વયુનાનિ પૂર્વથા રુશન્તં ભાનુમરુષીરશિશ્રયુઃ ॥ ૧.૦૯૨.૦૨

અર્ચન્તિ નારીરપસો ન વિષ્ટિભિઃ સમાનેન યોજનેના પરાવતઃ ।
ઇષં વહન્તીઃ સુકૃતે સુદાનવે વિશ્વેદહ યજમાનાય સુન્વતે ॥ ૧.૦૯૨.૦૩

અધિ પેશાંસિ વપતે નૃતૂરિવાપોર્ણુતે વક્ષ ઉસ્રેવ બર્જહમ્ ।

જ્યોતિર્વિશ્વસ્મૈ ભુવનાય કૃણ્વતી ગાવો ન વ્રજં વ્યુ૧ષા આવર્તમઃ ॥ ૧.૦૯૨.૦૪
પ્રત્યર્ચી રુશદસ્યા અદર્શિ વિ તિષ્ઠતે બાધતે કૃષ્ણમભ્વમ્ ।
સ્વરું ન પેશો વિદથેષ્વઞ્જઞ્ચિત્રં દિવો દુહિતા ભાનુમશ્રેત્ ॥ ૧.૦૯૨.૦૫
અતારિષ્મ તમસસ્પારમસ્યોષા ઉચ્છન્તી વયુના કૃણોતિ ।
શ્રિયે છન્દો ન સ્મયતે વિભાતી સુપ્રતીકા સૌમનસાયાજીગઃ ॥ ૧.૦૯૨.૦૬
ભાસ્વતી નેત્રી સૂનૃતાનાં દિવઃ સ્તવે દુહિતા ગોતમેભિઃ ।
પ્રજાવતો નૃવતો અશ્વબુધ્યાનુષો ગોઅગ્રાઁ ઉપ માસિ વાજાન્ ॥ ૧.૦૯૨.૦૭
ઉષસ્તમશ્યાં યશસં સુવીરં દાસપ્રવર્ગં રયિમશ્વબુધ્યમ્ ।
સુદંસસા શ્રવસા યા વિભાસિ વાજપ્રસૂતા સુભગે બૃહન્તમ્ ॥ ૧.૦૯૨.૦૮
વિશ્વાનિ દેવી ભુવનાભિચક્ષ્યા પ્રતીચી ચક્ષુરુર્વિયા વિ ભાતિ ।
વિશ્વં જીવં ચરસે બોધયન્તી વિશ્વસ્ય વાચમવિદન્મનાયોઃ ॥ ૧.૦૯૨.૦૯
પુનઃપુનર્જાયમાના પુરાણી સમાનં વર્ણમભિ શુમ્ભમાના ।
શ્વઘ્નીવ કૃત્નુર્વિજ આમિનાના મર્તસ્ય દેવી જરયન્ત્યાયુઃ ॥ ૧.૦૯૨.૧૦
વ્યૂર્ણ્વતી દિવો અન્તાઁ અબોધ્યપ સ્વસારં સનુતર્યુયોતિ ।
પ્રમિનતી મનુષ્યા યુગાનિ યોષા જારસ્ય ચક્ષસા વિ ભાતિ ॥ ૧.૦૯૨.૧૧
પશૂન્ન ચિત્રા સુભગા પ્રથાના સિન્ધુર્ન ક્ષોદ ઉર્વિયા વ્યશ્વૈત્ ।
અમિનતી દૈવ્યાનિ વ્રતાનિ સૂર્યસ્ય ચેતિ રશ્મિભિર્દૃશાના ॥ ૧.૦૯૨.૧૨
ઉષસ્તચ્ચિત્રમા ભરાસ્મભ્યં વાજિનીવતિ ।
યેન તોકં ચ તનયં ચ ધામહે ॥ ૧.૦૯૨.૧૩
ઉષો અદ્યેહ ગોમત્યશ્વાવતિ વિભાવરિ ।
રેવદસ્મે વ્યુચ્છ સૂનૃતાવતિ ॥ ૧.૦૯૨.૧૪
યુક્ષ્વા હિ વાજિનીવત્યશ્વાઁ અદ્યારુણાઁ ઉષઃ ।
અથા નો વિશ્વા સૌભગાન્યા વહ ॥ ૧.૦૯૨.૧૫
અશ્વિના વર્તિરસ્મદા ગોમદ્દસ્રા હિરણ્યવત્ ।
અર્વાગ્રથં સમનસા નિ યચ્છતમ્ ॥ ૧.૦૯૨.૧૬
યાવિત્થા શ્લોકમા દિવો જ્યોતિર્જનાય ચક્રથુઃ ।
આ ન ઊર્જં વહતમશ્વિના યુવમ્ ॥ ૧.૦૯૨.૧૭

એહ દેવા મયોભુવા દસ્રા હિરણ્યવર્તની ।
ઉષર્બુધો વહન્તુ સોમપીતયે ॥ ૧.૦૯૨.૧૮
અગ્નીષોમાવિમં સુ મે શૃણુતં વૃષણા હવમ્ ।
પ્રતિ સૂક્તાનિ હર્યતં ભવતં દાશુષે મયઃ ॥ ૧.૦૯૩.૦૧
અગ્નીષોમા યો અદ્ય વામિદં વચઃ સપર્યતિ ।
તસ્મૈ ધત્તં સુવીર્યં ગવાં પોષં સ્વશ્વ્યમ્ ॥ ૧.૦૯૩.૦૨
અગ્નીષોમા ય આહુતિં યો વાં દાશાદ્ધવિષ્કૃતિમ્ ।
સ પ્રજયા સુવીર્યં વિશ્વમાયુર્વ્યશ્નવત્ ॥ ૧.૦૯૩.૦૩
અગ્નીષોમા ચેતિ તદ્વીર્યં વાં યદમુષ્ણીતમવસં પણિં ગાઃ ।
અવાતિરતં બૃસયસ્ય શેષોઽવિન્દતં જ્યોતિરેકં બહુભ્યઃ ॥ ૧.૦૯૩.૦૪
યુવમેતાનિ દિવિ રોચનાન્યગ્નિશ્ચ સોમ સક્રતૂ અધત્તમ્ ।
યુવં સિન્ધૂઁરભિશસ્તેરવદ્યાદગ્નીષોમાવમુઞ્ચતં ગૃભીતાન્ ॥ ૧.૦૯૩.૦૫
આન્યં દિવો માતરિશ્વા જભારામથ્નાદન્યં પરિ શ્યેનો અદ્રેઃ ।
અગ્નીષોમા બ્રહ્મણા વાવૃધાનોરું યજ્ઞાય ચક્રથુરુ લોકમ્ ॥ ૧.૦૯૩.૦૬
અગ્નીષોમા હવિષઃ પ્રસ્થિતસ્ય વીતં હર્યતં વૃષણા જુષેથામ્ ।
સુશર્માણા સ્વવસા હિ ભૂતમથા ધત્તં યજમાનાય શં યોઃ ॥ ૧.૦૯૩.૦૭
યો અગ્નીષોમા હવિષા સપર્યાદ્દેવદ્રીચા મનસા યો ઘૃતેન ।
તસ્ય વ્રતં રક્ષતં પાતમંહસો વિશે જનાય મહિ શર્મ યચ્છતમ્ ॥ ૧.૦૯૩.૦૮
અગ્નીષોમા સવેદસા સહૂતી વનતં ગિરઃ ।
સં દેવત્રા બભૂવથુઃ ॥ ૧.૦૯૩.૦૯
અગ્નીષોમાવનેન વાં યો વાં ઘૃતેન દાશતિ ।
તસ્મૈ દીદયતં બૃહત્ ॥ ૧.૦૯૩.૧૦
અગ્નીષોમાવિમાનિ નો યુવં હવ્યા જુજોષતમ્ ।
આ યાતમુપ નઃ સચા ॥ ૧.૦૯૩.૧૧
અગ્નીષોમા પિપૃતમર્વતો ન આ પ્યાયન્તામુસ્રિયા હવ્યસૂદઃ ।
અસ્મે બલાનિ મઘવત્સુ ધત્તં કૃણુતં નો અધ્વરં શ્રુષ્ટિમન્તમ્ ॥ ૧.૦૯૩.૧૨
ઇમં સ્તોમમર્હતે જાતવેદસે રથમિવ સં મહેમા મનીષયા ।

ભદ્રા હિ નઃ પ્રમતિરસ્ય સંસદ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૧
યસ્મૈ ત્વમાયજસે સ સાધત્યનર્વા ક્ષેતિ દધતે સુવીર્યમ્ ।
સ તૂતાવ નૈનમશ્નોત્યંહતિરગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૨
શકેમ ત્વા સમિધં સાધયા ધિયસ્ત્વે દેવા હવિરદન્ત્યાહુતમ્ ।
ત્વમાદિત્યાઁ આ વહ તાન્હ્યુશ્મસ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૩
ભરામેધ્મં કૃણવામા હવીંષિ તે ચિતયન્તઃ પર્વણાપર્વણા વયમ્ ।
જીવાતવે પ્રતરં સાધયા ધિયોઽગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૪
વિશાં ગોપા અસ્ય ચરન્તિ જન્તવો દ્વિપચ્ચ યદુત ચતુષ્પદક્તુભિઃ ।
ચિત્રઃ પ્રકેત ઉષસો મહાઁ અસ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૫
ત્વમધ્વર્યુરુત હોતાસિ પૂર્વ્યઃ પ્રશાસ્તા પોતા જનુષા પુરોહિતઃ ।
વિશ્વા વિદ્વાઁ આર્ત્વિજ્યા ધીર પુષ્યસ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૬
યો વિશ્વતઃ સુપ્રતીકઃ સદૃઙ્ઙસિ દૂરે ચિત્સન્તળિદિવાતિ રોચસે ।
રાત્ર્યાશ્ચિદન્ધો અતિ દેવ પશ્યસ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૭
પૂર્વો દેવા ભવતુ સુન્વતો રથોઽસ્માકં શંસો અભ્યસ્તુ દૂઢ્યઃ ।
તદા જાનીતોત પુષ્યતા વચોઽગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૮
વધૈર્દુઃશંસાઁ અપ દૂઢ્યો જહિ દૂરે વા યે અન્તિ વા કે ચિદત્રિણઃ ।
અથા યજ્ઞાય ગૃણતે સુગં કૃધ્યગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૦૯
યદયુક્થા અરુષા રોહિતા રથે વાતજૂતા વૃષભસ્યેવ તે રવઃ ।
આદિન્વસિ વનિનો ધૂમકેતુનાગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૧૦
અધ સ્વનાદુત બિભ્યુઃ પતત્રિણો દ્રપ્સા યત્તે યવસાદો વ્યસ્થિરન્ ।
સુગં તત્તે તાવકેભ્યો રથેભ્યોઽગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૧૧
અયં મિત્રસ્ય વરુણસ્ય ધાયસેઽવયાતાં મરુતાં હેળો અદ્ભુતઃ ।
મૃળા સુ નો ભૂત્વેષાં મનઃ પુનરગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૧૨
દેવો દેવાનામસિ મિત્રો અદ્ભુતો વસુર્વસૂનામસિ ચારુરધ્વરે ।
શર્મન્સ્યામ તવ સપ્રથસ્તમેઽગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૧૩
તત્તે ભદ્રં યત્સમિદ્ધઃ સ્વે દમે સોમાહુતો જરસે મૃળયત્તમઃ ।
દધાસિ રત્નં દ્રવિણં ચ દાશુષેઽગ્ને સખ્યે મા રિષામા વયં તવ ॥ ૧.૦૯૪.૧૪

યસ્મૈ ત્વં સુદ્રવિણો દદાશોઽનાગાસ્ત્વમદિતે સર્વતાતા ।
યં ભદ્રેણ શવસા ચોદયાસિ પ્રજાવતા રાધસા તે સ્યામ ॥ ૧.૦૯૪.૧૫
સ ત્વમગ્ને સૌભગત્વસ્ય વિદ્વાનસ્માકમાયુઃ પ્ર તિરેહ દેવ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૦૯૪.૧૬

દ્વે વિરૂપે ચરતઃ સ્વર્થે અન્યાન્યા વત્સમુપ ધાપયેતે ।
હરિરન્યસ્યાં ભવતિ સ્વધાવાઞ્છુક્રો અન્યસ્યાં દદૃશે સુવર્ચાઃ ॥ ૧.૦૯૫.૦૧
દશેમં ત્વષ્ટુર્જનયન્ત ગર્ભમતન્દ્રાસો યુવતયો વિભૃત્રમ્ ।
તિગ્માનીકં સ્વયશસં જનેષુ વિરોચમાનં પરિ ષીં નયન્તિ ॥ ૧.૦૯૫.૦૨
ત્રીણિ જાના પરિ ભૂષન્ત્યસ્ય સમુદ્ર એકં દિવ્યેકમપ્સુ ।
પૂર્વામનુ પ્ર દિશં પાર્થિવાનામૃતૂન્પ્રશાસદ્વિ દધાવનુષ્ઠુ ॥ ૧.૦૯૫.૦૩
ક ઇમં વો નિણ્યમા ચિકેત વત્સો માતૃર્જનયત સ્વધાભિઃ ।
બહ્વીનાં ગર્ભો અપસામુપસ્થાન્મહાન્કવિર્નિશ્ચરતિ સ્વધાવાન્ ॥ ૧.૦૯૫.૦૪
આવિષ્ટ્યો વર્ધતે ચારુરાસુ જિહ્માનામૂર્ધ્વઃ સ્વયશા ઉપસ્થે ।
ઉભે ત્વષ્ટુર્બિભ્યતુર્જાયમાનાત્પ્રતીચી સિંહં પ્રતિ જોષયેતે ॥ ૧.૦૯૫.૦૫
ઉભે ભદ્રે જોષયેતે ન મેને ગાવો ન વાશ્રા ઉપ તસ્થુરેવૈઃ ।
સ દક્ષાણાં દક્ષપતિર્બભૂવાઞ્જન્તિ યં દક્ષિણતો હવિર્ભિઃ ॥ ૧.૦૯૫.૦૬
ઉદ્યંયમીતિ સવિતેવ બાહૂ ઉભે સિચૌ યતતે ભીમ ઋઞ્જન્ ।
ઉચ્છુક્રમત્કમજતે સિમસ્માન્નવા માતૃભ્યો વસના જહાતિ ॥ ૧.૦૯૫.૦૭
ત્વેષં રૂપં કૃણુત ઉત્તરં યત્સમ્પૃઞ્ચાનઃ સદને ગોભિરદ્ભિઃ ।
કવિર્બુધ્નં પરિ મર્મૃજ્યતે ધીઃ સા દેવતાતા સમિતિર્બભૂવ ॥ ૧.૦૯૫.૦૮
ઉરુ તે જ્રયઃ પર્યેતિ બુધ્નં વિરોચમાનં મહિષસ્ય ધામ ।
વિશ્વેભિરગ્ને સ્વયશોભિરિદ્ધોઽદબ્ધેભિઃ પાયુભિઃ પાહ્યસ્માન્ ॥ ૧.૦૯૫.૦૯
ધન્વન્સ્રોતઃ કૃણુતે ગાતુમૂર્મિં શુક્રૈરૂર્મિભિરભિ નક્ષતિ ક્ષામ્ ।
વિશ્વા સનાનિ જઠરેષુ ધત્તેઽન્તર્નવાસુ ચરતિ પ્રસૂષુ ॥ ૧.૦૯૫.૧૦
એવા નો અગ્ને સમિધા વૃધાનો રેવત્પાવક શ્રવસે વિ ભાહિ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૦૯૫.૧૧

સ પ્રત્નથા સહસા જાયમાનઃ સદ્યઃ કાવ્યાનિ બળધત્ત વિશ્વા ।

આપશ્ચ મિત્રં ધિષણા ચ સાધન્દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૧
સ પૂર્વયા નિવિદા કવ્યતાયોરિમાઃ પ્રજા અજનયન્મનૂનામ્ ।
વિવસ્વતા ચક્ષસા દ્યામપશ્ચ દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૨
તમીળત પ્રથમં યજ્ઞસાધં વિશ આરીરાહુતમૃઞ્જસાનમ્ ।
ઊર્જઃ પુત્રં ભરતં સૃપ્રદાનું દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૩
સ માતરિશ્વા પુરુવારપુષ્ટિર્વિદદ્ગાતું તનયાય સ્વર્વિત્ ।
વિશાં ગોપા જનિતા રોદસ્યોર્દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૪
નક્તોષાસા વર્ણમામેમ્યાને ધાપયેતે શિશુમેકં સમીચી ।
દ્યાવાક્ષામા રુક્મો અન્તર્વિ ભાતિ દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૫
રાયો બુધ્નઃ સંગમનો વસૂનાં યજ્ઞસ્ય કેતુર્મન્મસાધનો વેઃ ।
અમૃતત્વં રક્ષમાણાસ એનં દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૬
નૂ ચ પુરા ચ સદનં રયીણાં જાતસ્ય ચ જાયમાનસ્ય ચ ક્ષામ્ ।
સતશ્ચ ગોપાં ભવતશ્ચ ભૂરેર્દેવા અગ્નિં ધારયન્દ્રવિણોદામ્ ॥ ૧.૦૯૬.૦૭
દ્રવિણોદા દ્રવિણસસ્તુરસ્ય દ્રવિણોદાઃ સનરસ્ય પ્ર યંસત્ ।
દ્રવિણોદા વીરવતીમિષં નો દ્રવિણોદા રાસતે દીર્ઘમાયુઃ ॥ ૧.૦૯૬.૦૮
એવા નો અગ્ને સમિધા વૃધાનો રેવત્પાવક શ્રવસે વિ ભાહિ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૦૯૬.૦૯

અપ નઃ શોશુચદઘમગ્ને શુશુગ્ધ્યા રયિમ્ ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૧
સુક્ષેત્રિયા સુગાતુયા વસૂયા ચ યજામહે ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૨
પ્ર યદ્ભન્દિષ્ઠ એષાં પ્રાસ્માકાસશ્ચ સૂરયઃ ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૩
પ્ર યત્તે અગ્ને સૂરયો જાયેમહિ પ્ર તે વયમ્ ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૪
પ્ર યદગ્નેઃ સહસ્વતો વિશ્વતો યન્તિ ભાનવઃ ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૫

ત્વં હિ વિશ્વતોમુખ વિશ્વતઃ પરિભૂરસિ ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૬
દ્વિષો નો વિશ્વતોમુખાતિ નાવેવ પારય ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૭
સ નઃ સિન્ધુમિવ નાવયાતિ પર્ષા સ્વસ્તયે ।
અપ નઃ શોશુચદઘમ્ ॥ ૧.૦૯૭.૦૮
વૈશ્વાનરસ્ય સુમતૌ સ્યામ રાજા હિ કં ભુવનાનામભિશ્રીઃ ।
ઇતો જાતો વિશ્વમિદં વિ ચષ્ટે વૈશ્વાનરો યતતે સૂર્યેણ ॥ ૧.૦૯૮.૦૧
પૃષ્ટો દિવિ પૃષ્ટો અગ્નિઃ પૃથિવ્યાં પૃષ્ટો વિશ્વા ઓષધીરા વિવેશ ।
વૈશ્વાનરઃ સહસા પૃષ્ટો અગ્નિઃ સ નો દિવા સ રિષઃ પાતુ નક્તમ્ ॥ ૧.૦૯૮.૦૨
વૈશ્વાનર તવ તત્સત્યમસ્ત્વસ્માન્રાયો મઘવાનઃ સચન્તામ્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૦૯૮.૦૩
જાતવેદસે સુનવામ સોમમરાતીયતો નિ દહાતિ વેદઃ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું દુરિતાત્યગ્નિઃ ॥ ૧.૦૯૯.૦૧
સ યો વૃષા વૃષ્ણ્યેભિઃ સમોકા મહો દિવઃ પૃથિવ્યાશ્ચ સમ્રાટ્ ।
સતીનસત્વા હવ્યો ભરેષુ મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૧
યસ્યાનાપ્તઃ સૂર્યસ્યેવ યામો ભરેભરે વૃત્રહા શુષ્મો અસ્તિ ।
વૃષન્તમઃ સખિભિઃ સ્વેભિરેવૈર્મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૨
દિવો ન યસ્ય રેતસો દુઘાનાઃ પન્થાસો યન્તિ શવસાપરીતાઃ ।
તરદ્દ્વેષાઃ સાસહિઃ પૌંસ્યેભિર્મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૩
સો અઙ્ગિરોભિરઙ્ગિરસ્તમો ભૂદ્વૃષા વૃષભિઃ સખિભિઃ સખા સન્ ।
ઋગ્મિભિરૃગ્મી ગાતુભિર્જ્યેષ્ઠો મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૪
સ સૂનુભિર્ન રુદ્રેભિરૃભ્વા નૃષાહ્યે સાસહ્વાઁ અમિત્રાન્ ।
સનીળેભિઃ શ્રવસ્યાનિ તૂર્વન્મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૫
સ મન્યુમીઃ સમદનસ્ય કર્તાસ્માકેભિર્નૃભિઃ સૂર્યં સનત્ ।
અસ્મિન્નહન્સત્પતિઃ પુરુહૂતો મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૬
તમૂતયો રણયઞ્છૂરસાતૌ તં ક્ષેમસ્ય ક્ષિતયઃ કૃણ્વત ત્રામ્ ।

સ વિશ્વસ્ય કરુણસ્યેશ એકો મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૭

તમપ્સન્ત શવસ ઉત્સવેષુ નરો નરમવસે તં ધનાય ।

સો અન્ધે ચિત્તમસિ જ્યોતિર્વિદન્મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૮

સ સવ્યેન યમતિ વ્રાધતશ્ચિત્સ દક્ષિણે સંગૃભીતા કૃતાનિ ।

સ કીરિણા ચિત્સનિતા ધનાનિ મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૦૯

સ ગ્રામેભિઃ સનિતા સ રથેભિર્વિદે વિશ્વાભિઃ કૃષ્ટિભિર્ન્વદ્ય ।

સ પૌંસ્યેભિરભિભૂરશસ્તીર્મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૦

સ જામિભિર્યત્સમજાતિ મીળ્હેઽજામિભિર્વા પુરુહૂત એવૈઃ ।

અપાં તોકસ્ય તનયસ્ય જેષે મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૧

સ વજ્રભૃદ્દસ્યુહા ભીમ ઉગ્રઃ સહસ્રચેતાઃ શતનીથ ઋભ્વા ।

ચમ્રીષો ન શવસા પાઞ્ચજન્યો મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૨

તસ્ય વજ્રઃ ક્રન્દતિ સ્મત્સ્વર્ષા દિવો ન ત્વેષો રવથઃ શિમીવાન્ ।

તં સચન્તે સનયસ્તં ધનાનિ મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૩

યસ્યાજસ્રં શવસા માનમુક્થં પરિભુજદ્રોદસી વિશ્વતઃ સીમ્ ।

સ પારિષત્ક્રતુભિર્મન્દસાનો મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૪

ન યસ્ય દેવા દેવતા ન મર્તા આપશ્ચન શવસો અન્તમાપુઃ ।

સ પ્રરિક્વા ત્વક્ષસા ક્ષ્મો દિવશ્ચ મરુત્વાન્નો ભવત્વિન્દ્ર ઊતી ॥ ૧.૧૦૦.૧૫

રોહિચ્છ્યાવા સુમદંશુર્લલામીર્દ્યુક્ષા રાય ઋજ્રાશ્વસ્ય ।

વૃષણ્વન્તં બિભ્રતી ધૂર્ષુ રથં મન્દ્રા ચિકેત નાહુષીષુ વિક્ષુ ॥ ૧.૧૦૦.૧૬

એતત્ત્યત્ત ઇન્દ્ર વૃષ્ણ ઉક્થં વાર્ષાગિરા અભિ ગૃણન્તિ રાધઃ ।

ઋજ્રાશ્વઃ પ્રષ્ટિભિરમ્બરીષઃ સહદેવો ભયમાનઃ સુરાધાઃ ॥ ૧.૧૦૦.૧૭

દસ્યૂઞ્છિમ્યૂઁશ્ચ પુરુહૂત એવૈર્હત્વા પૃથિવ્યાં શર્વા નિ બર્હીત્ ।

સનત્ક્ષેત્રં સખિભિઃ શ્વિત્ન્યેભિઃ સનત્સૂર્યં સનદપઃ સુવજ્રઃ ॥ ૧.૧૦૦.૧૮

વિશ્વાહેન્દ્રો અધિવક્તા નો અસ્ત્વપરિહ્વૃતાઃ સનુયામ વાજમ્ ।

તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૦.૧૯

પ્ર મન્દિને પિતુમદર્ચતા વચો યઃ કૃષ્ણગર્ભા નિરહન્નૃજિશ્વના ।

અવસ્યવો વૃષણં વજ્રદક્ષિણં મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૧

યો વ્યંસં જાહૃષાણેન મન્યુના યઃ શમ્બરં યો અહન્પિપ્રુમવ્રતમ્ ।
ઇન્દ્રો યઃ શુષ્ણમશુષં ન્યાવૃણઙ્મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૨
યસ્ય દ્યાવાપૃથિવી પૌંસ્યં મહદ્યસ્ય વ્રતે વરુણો યસ્ય સૂર્યઃ ।
યસ્યેન્દ્રસ્ય સિન્ધવઃ સશ્ચતિ વ્રતં મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૩
યો અશ્વાનાં યો ગવાં ગોપતિર્વશી ય આરિતઃ કર્મણિકર્મણિ સ્થિરઃ ।
વીળોશ્ચિદિન્દ્રો યો અસુન્વતો વધો મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૪
યો વિશ્વસ્ય જગતઃ પ્રાણતસ્પતિર્યો બ્રહ્મણે પ્રથમો ગા અવિન્દત્ ।
ઇન્દ્રો યો દસ્યૂઁરધરાઁ અવાતિરન્મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૫
યઃ શૂરેભિર્હવ્યો યશ્ચ ભીરુભિર્યો ધાવદ્ભિર્હૂયતે યશ્ચ જિગ્યુભિઃ ।
ઇન્દ્રં યં વિશ્વા ભુવનાભિ સંદધુર્મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૬
રુદ્રાણામેતિ પ્રદિશા વિચક્ષણો રુદ્રેભિર્યોષા તનુતે પૃથુ જ્રયઃ ।
ઇન્દ્રં મનીષા અભ્યર્ચતિ શ્રુતં મરુત્વન્તં સખ્યાય હવામહે ॥ ૧.૧૦૧.૦૭
યદ્વા મરુત્વઃ પરમે સધસ્થે યદ્વાવમે વૃજને માદયાસે ।
અત આ યાહ્યધ્વરં નો અચ્છા ત્વાયા હવિશ્ચકૃમા સત્યરાધઃ ॥ ૧.૧૦૧.૦૮
ત્વાયેન્દ્ર સોમં સુષુમા સુદક્ષ ત્વાયા હવિશ્ચકૃમા બ્રહ્મવાહઃ ।
અધા નિયુત્વઃ સગણો મરુદ્ભિરસ્મિન્યજ્ઞે બર્હિષિ માદયસ્વ ॥ ૧.૧૦૧.૦૯
માદયસ્વ હરિભિર્યે ત ઇન્દ્ર વિ ષ્યસ્વ શિપ્રે વિ સૃજસ્વ ધેને ।
આ ત્વા સુશિપ્ર હરયો વહન્તૂશન્હવ્યાનિ પ્રતિ નો જુષસ્વ ॥ ૧.૧૦૧.૧૦
મરુત્સ્તોત્રસ્ય વૃજનસ્ય ગોપા વયમિન્દ્રેણ સનુયામ વાજમ્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૧.૧૧
ઇમાં તે ધિયં પ્ર ભરે મહો મહીમસ્ય સ્તોત્રે ધિષણા યત્ત આનજે ।
તમુત્સવે ચ પ્રસવે ચ સાસહિમિન્દ્રં દેવાસઃ શવસામદન્નનુ ॥ ૧.૧૦૨.૦૧
અસ્ય શ્રવો નદ્યઃ સપ્ત બિભ્રતિ દ્યાવાક્ષામા પૃથિવી દર્શતં વપુઃ ।
અસ્મે સૂર્યાચન્દ્રમસાભિચક્ષે શ્રદ્ધે કમિન્દ્ર ચરતો વિતર્તુરમ્ ॥ ૧.૧૦૨.૦૨
તં સ્મા રથં મઘવન્પ્રાવ સાતયે જૈત્રં યં તે અનુમદામ સંગમે ।
આજા ન ઇન્દ્ર મનસા પુરુષ્ટુત ત્વાયદ્ભ્યો મઘવઞ્છર્મ યચ્છ નઃ ॥ ૧.૧૦૨.૦૩
વયં જયેમ ત્વયા યુજા વૃતમસ્માકમંશમુદવા ભરેભરે ।

અસ્મભ્યમિન્દ્ર વરિવઃ સુગં કૃધિ પ્ર શત્રૂણાં મઘવન્વૃષ્ણ્યા રુજ ॥ ૧.૧૦૨.૦૪

નાના હિ ત્વા હવમાના જના ઇમે ધનાનાં ધર્તરવસા વિપન્યવઃ ।

અસ્માકં સ્મા રથમા તિષ્ઠ સાતયે જૈત્રં હીન્દ્ર નિભૃતં મનસ્તવ ॥ ૧.૧૦૨.૦૫

ગોજિતા બાહૂ અમિતક્રતુઃ સિમઃ કર્મન્કર્મઞ્છતમૂતિઃ ખજંકરઃ ।

અકલ્પ ઇન્દ્રઃ પ્રતિમાનમોજસાથા જના વિ હ્વયન્તે સિષાસવઃ ॥ ૧.૧૦૨.૦૬

ઉત્તે શતાન્મઘવન્નુચ્ચ ભૂયસ ઉત્સહસ્રાદ્રિરિચે કૃષ્ટિષુ શ્રવઃ ।

અમાત્રં ત્વા ધિષણા તિત્વિષે મહ્યધા વૃત્રાણિ જિઘ્નસે પુરંદર ॥ ૧.૧૦૨.૦૭

ત્રિવિષ્ટિધાતુ પ્રતિમાનમોજસસ્તિસ્રો ભૂમીર્નૃપતે ત્રીણિ રોચના ।

અતીદં વિશ્વં ભુવનં વવક્ષિથાશત્રુરિન્દ્ર જનુષા સનાદસિ ॥ ૧.૧૦૨.૦૮

ત્વાં દેવેષુ પ્રથમં હવામહે ત્વં બભૂથ પૃતનાસુ સાસહિઃ ।

સેમં નઃ કારુમુપમન્યુમુદ્ભિદમિન્દ્રઃ કૃણોતુ પ્રસવે રથં પુરઃ ॥ ૧.૧૦૨.૦૯

ત્વં જિગેથ ન ધના રુરોધિથાર્ભેષ્વાજા મઘવન્મહત્સુ ચ ।

ત્વામુગ્રમવસે સં શિશીમસ્યથા ન ઇન્દ્ર હવનેષુ ચોદય ॥ ૧.૧૦૨.૧૦

વિશ્વાહેન્દ્રો અધિવક્તા નો અસ્ત્વપરિહ્વૃતાઃ સનુયામ વાજમ્ ।

તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૨.૧૧

તત્ત ઇન્દ્રિયં પરમં પરાચૈરધારયન્ત કવયઃ પુરેદમ્ ।

ક્ષમેદમન્યદ્દિવ્ય૧ન્યદસ્ય સમી પૃચ્યતે સમનેવ કેતુઃ ॥ ૧.૧૦૩.૦૧

સ ધારયત્પૃથિવીં પપ્રથચ્ચ વજ્રેણ હત્વા નિરપઃ સસર્જ ।

અહન્નહિમભિનદ્રૌહિણં વ્યહન્વ્યંસં મઘવા શચીભિઃ ॥ ૧.૧૦૩.૦૨

સ જાતૂભર્મા શ્રદ્દધાન ઓજઃ પુરો વિભિન્દન્નચરદ્વિ દાસીઃ ।

વિદ્વાન્વજ્રિન્દસ્યવે હેતિમસ્યાર્યં સહો વર્ધયા દ્યુમ્નમિન્દ્ર ॥ ૧.૧૦૩.૦૩

તદૂચુષે માનુષેમા યુગાનિ કીર્તેન્યં મઘવા નામ બિભ્રત્ ।

ઉપપ્રયન્દસ્યુહત્યાય વજ્રી યદ્ધ સૂનુઃ શ્રવસે નામ દધે ॥ ૧.૧૦૩.૦૪

તદસ્યેદં પશ્યતા ભૂરિ પુષ્ટં શ્રદિન્દ્રસ્ય ધત્તન વીર્યાય ।

સ ગા અવિન્દત્સો અવિન્દદશ્વાન્સ ઓષધીઃ સો અપઃ સ વનાનિ ॥ ૧.૧૦૩.૦૫

ભૂરિકર્મણે વૃષભાય વૃષ્ણે સત્યશુષ્માય સુનવામ સોમમ્ ।

ય આદૃત્યા પરિપન્થીવ શૂરોઽયજ્વનો વિભજન્નેતિ વેદઃ ॥ ૧.૧૦૩.૦૬

તદિન્દ્ર પ્રેવ વીર્યં ચકર્થ યત્સસન્તં વજ્રેણાબોધયોઽહિમ્ ।
અનુ ત્વા પત્નીર્હૃષિતં વયશ્ચ વિશ્વે દેવાસો અમદન્નનુ ત્વા ॥ ૧.૧૦૩.૦૭
શુષ્ણં પિપ્રું કુયવં વૃત્રમિન્દ્ર યદાવધીર્વિ પુરઃ શમ્બરસ્ય ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૩.૦૮

યોનિષ્ટ ઇન્દ્ર નિષદે અકારિ તમા નિ ષીદ સ્વાનો નાર્વા ।
વિમુચ્યા વયોઽવસાયાશ્વાન્દોષા વસ્તોર્વહીયસઃ પ્રપિત્વે ॥ ૧.૧૦૪.૦૧
ઓ ત્યે નર ઇન્દ્રમૂતયે ગુર્નૂ ચિત્તાન્સદ્યો અધ્વનો જગમ્યાત્ ।
દેવાસો મન્યું દાસસ્ય શ્ચમ્નન્તે ન આ વક્ષન્સુવિતાય વર્ણમ્ ॥ ૧.૧૦૪.૦૨
અવ ત્મના ભરતે કેતવેદા અવ ત્મના ભરતે ફેનમુદન્ ।
ક્ષીરેણ સ્નાતઃ કુયવસ્ય યોષે હતે તે સ્યાતાં પ્રવણે શિફાયાઃ ॥ ૧.૧૦૪.૦૩
યુયોપ નાભિરુપરસ્યાયોઃ પ્ર પૂર્વાભિસ્તિરતે રાષ્ટિ શૂરઃ ।
અઞ્જસી કુલિશી વીરપત્ની પયો હિન્વાના ઉદભિર્ભરન્તે ॥ ૧.૧૦૪.૦૪
પ્રતિ યત્સ્યા નીથાદર્શિ દસ્યોરોકો નાચ્છા સદનં જાનતી ગાત્ ।
અધ સ્મા નો મઘવઞ્ચર્કૃતાદિન્મા નો મઘેવ નિષ્ષપી પરા દાઃ ॥ ૧.૧૦૪.૦૫
સ ત્વં ન ઇન્દ્ર સૂર્યે સો અપ્સ્વનાગાસ્ત્વ આ ભજ જીવશંસે ।
માન્તરાં ભુજમા રીરિષો નઃ શ્રદ્ધિતં તે મહત ઇન્દ્રિયાય ॥ ૧.૧૦૪.૦૬
અધા મન્યે શ્રત્તે અસ્મા અધાયિ વૃષા ચોદસ્વ મહતે ધનાય ।
મા નો અકૃતે પુરુહૂત યોનાવિન્દ્ર ક્ષુધ્યદ્ભ્યો વય આસુતિં દાઃ ॥ ૧.૧૦૪.૦૭
મા નો વધીરિન્દ્ર મા પરા દા મા નઃ પ્રિયા ભોજનાનિ પ્ર મોષીઃ ।
આણ્ડા મા નો મઘવઞ્છક્ર નિર્ભેન્મા નઃ પાત્રા ભેત્સહજાનુષાણિ ॥ ૧.૧૦૪.૦૮
અર્વાઙેહિ સોમકામં ત્વાહુરયં સુતસ્તસ્ય પિબા મદાય ।
ઉરુવ્યચા જઠર આ વૃષસ્વ પિતેવ નઃ શૃણુહિ હૂયમાનઃ ॥ ૧.૧૦૪.૦૯

ચન્દ્રમા અપ્સ્વન્તરા સુપર્ણો ધાવતે દિવિ ।
ન વો હિરણ્યનેમયઃ પદં વિન્દન્તિ વિદ્યુતો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૧
અર્થમિદ્વા ઉ અર્થિન આ જાયા યુવતે પતિમ્ ।
તુઞ્જાતે વૃષ્ણ્યં પયઃ પરિદાય રસં દુહે વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૨
મો ષુ દેવા અદઃ સ્વરવ પાદિ દિવસ્પરિ ।

મા સોમ્યસ્ય શમ્ભુવઃ શૂને ભૂમ કદા ચન વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૩
યજ્ઞં પૃચ્છામ્યવમં સ તદ્દૂતો વિ વોચતિ ।
ક્વ ઋતં પૂર્વ્યં ગતં કસ્તદ્બિભર્તિ નૂતનો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૪
અમી યે દેવાઃ સ્થન ત્રિષ્વા રોચને દિવઃ ।
કદ્વ ઋતં કદનૃતં ક્વ પ્રત્ના વ આહુતિર્વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૫
કદ્વ ઋતસ્ય ધર્ણસિ કદ્વરુણસ્ય ચક્ષણમ્ ।
કદર્યમ્ણો મહસ્પથાતિ ક્રામેમ દૂઢ્યો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૬
અહં સો અસ્મિ યઃ પુરા સુતે વદામિ કાનિ ચિત્ ।
તં મા વ્યન્ત્યાધ્યો૩ વૃકો ન તૃષ્ણજં મૃગં વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૭
સં મા તપન્ત્યભિતઃ સપત્નીરિવ પર્શવઃ ।
મૂષો ન શિશ્ના વ્યદન્તિ માધ્યઃ સ્તોતારં તે શતક્રતો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૮
અમી યે સપ્ત રશ્મયસ્તત્રા મે નાભિરાતતા ।
ત્રિતસ્તદ્વેદાપ્ત્યઃ સ જામિત્વાય રેભતિ વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૦૯
અમી યે પઞ્ચોક્ષણો મધ્યે તસ્થુર્મહો દિવઃ ।
દેવત્રા નુ પ્રવાચ્યં સધ્રીચીના નિ વાવૃતુર્વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૦
સુપર્ણા એત આસતે મધ્ય આરોધને દિવઃ ।
તે સેધન્તિ પથો વૃકં તરન્તં યહ્વતીરપો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૧
નવ્યં તદુક્થ્યં હિતં દેવાસઃ સુપ્રવાચનમ્ ।
ઋતમર્ષન્તિ સિન્ધવઃ સત્યં તાતાન સૂર્યો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૨
અગ્ને તવ ત્યદુક્થ્યં દેવેષ્વસ્ત્યાપ્યમ્ ।
સ નઃ સત્તો મનુષ્વદા દેવાન્યક્ષિ વિદુષ્ટરો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૩
સત્તો હોતા મનુષ્વદા દેવાઁ અચ્છા વિદુષ્ટરઃ ।
અગ્નિર્હવ્યા સુષૂદતિ દેવો દેવેષુ મેધિરો વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૪
બ્રહ્મા કૃણોતિ વરુણો ગાતુવિદં તમીમહે ।
વ્યૂર્ણોતિ હૃદા મતિં નવ્યો જાયતામૃતં વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૫
અસૌ યઃ પન્થા આદિત્યો દિવિ પ્રવાચ્યં કૃતઃ ।
ન સ દેવા અતિક્રમે તં મર્તાસો ન પશ્યથ વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૬

ત્રિતઃ કૂપેઽવહિતો દેવાન્હવત ઊતયે ।
તચ્છુશ્રાવ બૃહસ્પતિઃ કૃણ્વન્નંહૂરણાદુરુ વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૭
અરુણો મા સકૃદ્વૃકઃ પથા યન્તં દદર્શ હિ ।
ઉજ્જિહીતે નિચાય્યા તષ્ટેવ પૃષ્ટ્યામયી વિત્તં મે અસ્ય રોદસી ॥ ૧.૧૦૫.૧૮
એનાઙ્ગૂષેણ વયમિન્દ્રવન્તોઽભિ ષ્યામ વૃજને સર્વવીરાઃ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૫.૧૯
ઇન્દ્રં મિત્રં વરુણમગ્નિમૂતયે મારુતં શર્ધો અદિતિં હવામહે ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૧
ત આદિત્યા આ ગતા સર્વતાતયે ભૂત દેવા વૃત્રતૂર્યેષુ શમ્ભુવઃ ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૨
અવન્તુ નઃ પિતરઃ સુપ્રવાચના ઉત દેવી દેવપુત્રે ઋતાવૃધા ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૩
નરાશંસં વાજિનં વાજયન્નિહ ક્ષયદ્વીરં પૂષણં સુમ્નૈરીમહે ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૪
બૃહસ્પતે સદમિન્નઃ સુગં કૃધિ શં યોર્યત્તે મનુર્હિતં તદીમહે ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૫
ઇન્દ્રં કુત્સો વૃત્રહણં શચીપતિં કાટે નિબાળ્હ ઋષિરહ્વદૂતયે ।
રથં ન દુર્ગાદ્વસવઃ સુદાનવો વિશ્વસ્માન્નો અંહસો નિષ્પિપર્તન ॥ ૧.૧૦૬.૦૬
દેવૈર્નો દેવ્યદિતિર્નિ પાતુ દેવસ્ત્રાતા ત્રાયતામપ્રયુચ્છન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૬.૦૭
યજ્ઞો દેવાનાં પ્રત્યેતિ સુમ્નમાદિત્યાસો ભવતા મૃળયન્તઃ ।
આ વોઽર્વાચી સુમતિર્વવૃત્યાદંહોશ્ચિદ્યા વરિવોવિત્તરાસત્ ॥ ૧.૧૦૭.૦૧
ઉપ નો દેવા અવસા ગમન્ત્વઙ્ગિરસાં સામભિઃ સ્તૂયમાનાઃ ।
ઇન્દ્ર ઇન્દ્રિયૈર્મરુતો મરુદ્ભિરાદિત્યૈર્નો અદિતિઃ શર્મ યંસત્ ॥ ૧.૧૦૭.૦૨
તન્ન ઇન્દ્રસ્તદ્વરુણસ્તદગ્નિસ્તદર્યમા તત્સવિતા ચનો ધાત્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૭.૦૩
ય ઇન્દ્રાગ્ની ચિત્રતમો રથો વામભિ વિશ્વાનિ ભુવનાનિ ચષ્ટે ।

તેના યાતં સરથં  તસ્થિવાંસાથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૧

યાવદિદં ભુવનં  વિશ્વમસ્ત્યુરુવ્યચા  વરિમતા  ગભીરમ્ ।

તાવાઁ અયં પાતવે  સોમો  અસ્ત્વરમિન્દ્રાગ્ની  મનસે યુવભ્યામ્ ॥ ૧.૧૦૮.૦૨

ચક્રાથે  હિ સધ્ર્યઙ્નામ  ભદ્રં સધ્રીચીના વૃત્રહણા ઉત સ્થઃ  ।

તાવિન્દ્રાગ્ની સધ્ર્યઞ્ચા નિષદ્યા  વૃષ્ણઃ  સોમસ્ય વૃષણા વૃષેથામ્ ॥ ૧.૧૦૮.૦૩

સમિદ્ધેષ્વગ્નિષ્વાનજાના યતસ્રુચા બર્હિરુ  તિસ્તિરાણા ।

તીવ્રૈઃ સોમૈઃ  પરિષિક્તેભિરર્વાગેન્દ્રાગ્ની સૌમનસાય  યાતમ્ ॥ ૧.૧૦૮.૦૪

યાનીન્દ્રાગ્ની ચક્રથુર્વીર્યાણિ  યાનિ  રૂપાણ્યુત વૃષ્ણ્યાનિ ।

યા વાં  પ્રત્નાનિ  સખ્યા શિવાનિ  તેભિઃ  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૫

યદબ્રવં પ્રથમં વાં  વૃણાનોऽયં સોમો  અસુરૈર્નો વિહવ્યઃ  ।

તાં સત્યાં શ્રદ્ધામભ્યા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૬

યદિન્દ્રાગ્ની  મદથઃ  સ્વે દુરોણે યદ્બ્રહ્મણિ  રાજનિ વા યજત્રા ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૭

યદિન્દ્રાગ્ની  યદુષુ તુર્વશેષુ  યદ્દ્રુહ્યુષ્વનુષુ પૂરુષુ  સ્થઃ ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૮

યદિન્દ્રાગ્ની અવમસ્યાં  પૃથિવ્યાં મધ્યમસ્યાં  પરમસ્યામુત સ્થઃ ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૦૯

યદિન્દ્રાગ્ની પરમસ્યાં  પૃથિવ્યાં મધ્યમસ્યામવમસ્યામુત સ્થઃ ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૧૦

યદિન્દ્રાગ્ની દિવિ ષ્ઠો યત્પૃથિવ્યાં યત્પર્વતેષ્વોષધીષ્વપ્સુ ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૧૧

યદિન્દ્રાગ્ની  ઉદિતા  સૂર્યસ્ય  મધ્યે  દિવઃ સ્વધયા  માદયેથે ।

અતઃ  પરિ  વૃષણાવા હિ યાતમથા  સોમસ્ય પિબતં સુતસ્ય  ॥ ૧.૧૦૮.૧૨

એવેન્દ્રાગ્ની પપિવાંસા  સુતસ્ય  વિશ્વાસ્મભ્યં  સં જયતં  ધનાનિ ।

તન્નો  મિત્રો વરુણો મામહન્તામદિતિઃ  સિન્ધુઃ  પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૮.૧૩

વિ હ્યખ્યં  મનસા  વસ્ય  ઇચ્છન્નિન્દ્રાગ્ની જ્ઞાસ ઉત વા  સજાતાન્ ।

નાન્યા યુવત્પ્રમતિરસ્તિ  મહ્યં  સ વાં  ધિયં  વાજયન્તીમતક્ષમ્ ॥ ૧.૧૦૯.૦૧

અશ્રવં હિ ભૂરિદાવત્તરા વાં વિજામાતુરુત વા ઘા સ્યાલાત્ ।
અથા સોમસ્ય પ્રયતી યુવભ્યામિન્દ્રાગ્ની સ્તોમં જનયામિ નવ્યમ્ ॥ ૧.૧૦૯.૦૨
મા ચ્છેદ્મ રશ્મીઁરિતિ નાધમાનાઃ પિતૃણાં શક્તીરનુયચ્છમાનાઃ ।
ઇન્દ્રાગ્નિભ્યાં કં વૃષણો મદન્તિ તા હ્યદ્રી ધિષણાયા ઉપસ્થે ॥ ૧.૧૦૯.૦૩
યુવાભ્યાં દેવી ધિષણા મદાયેન્દ્રાગ્ની સોમમુશતી સુનોતિ ।
તાવશ્વિના ભદ્રહસ્તા સુપાણી આ ધાવતં મધુના પૃઙ્ક્તમપ્સુ ॥ ૧.૧૦૯.૦૪
યુવામિન્દ્રાગ્ની વસુનો વિભાગે તવસ્તમા શુશ્રવ વૃત્રહત્યે ।
તાવાસદ્યા બર્હિષિ યજ્ઞે અસ્મિન્પ્ર ચર્ષણી માદયેથાં સુતસ્ય ॥ ૧.૧૦૯.૦૫
પ્ર ચર્ષણિભ્યઃ પૃતનાહવેષુ પ્ર પૃથિવ્યા રિરિચાથે દિવશ્ચ ।
પ્ર સિન્ધુભ્યઃ પ્ર ગિરિભ્યો મહિત્વા પ્રેન્દ્રાગ્ની વિશ્વા ભુવનાત્યન્યા ॥ ૧.૧૦૯.૦૬
આ ભરતં શિક્ષતં વજ્રબાહૂ અસ્માઁ ઇન્દ્રાગ્ની અવતં શચીભિઃ ।
ઇમે નુ તે રશ્મયઃ સૂર્યસ્ય યેભિઃ સપિત્વં પિતરો ન આસન્ ॥ ૧.૧૦૯.૦૭
પુરંદરા શિક્ષતં વજ્રહસ્તાસ્માઁ ઇન્દ્રાગ્ની અવતં ભરેષુ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૦૯.૦૮

તતં મે અપસ્તદુ તાયતે પુનઃ સ્વાદિષ્ઠા ધીતિરુચથાય શસ્યતે ।
અયં સમુદ્ર ઇહ વિશ્વદેવ્યઃ સ્વાહાકૃતસ્ય સમુ તૃપ્ણુત ઋભવઃ ॥ ૧.૧૧૦.૦૧
આભોગયં પ્ર યદિચ્છન્ત ઐતનાપાકાઃ પ્રાઞ્ચો મમ કે ચિદાપયઃ ।
સૌધન્વનાસશ્ચરિતસ્ય ભૂમનાગચ્છત સવિતુર્દાશુષો ગૃહમ્ ॥ ૧.૧૧૦.૦૨
તત્સવિતા વોઽમૃતત્વમાસુવદગોહ્યં યચ્છ્રવયન્ત ઐતન ।
ત્યં ચિચ્ચમસમસુરસ્ય ભક્ષણમેકં સન્તમકૃણુતા ચતુર્વયમ્ ॥ ૧.૧૧૦.૦૩
વિષ્ટ્વી શમી તરણિત્વેન વાઘતો મર્તાસઃ સન્તો અમૃતત્વમાનશુઃ ।
સૌધન્વના ઋભવઃ સૂરચક્ષસઃ સંવત્સરે સમપૃચ્યન્ત ધીતિભિઃ ॥ ૧.૧૧૦.૦૪
ક્ષેત્રમિવ વિ મમુસ્તેજનેનઁ એકં પાત્રમૃભવો જેહમાનમ્ ।
ઉપસ્તુતા ઉપમં નાધમાના અમર્ત્યેષુ શ્રવ ઇચ્છમાનાઃ ॥ ૧.૧૧૦.૦૫
આ મનીષામન્તરિક્ષસ્ય નૃભ્યઃ સ્રુચેવ ઘૃતં જુહવામ વિદ્મના ।
તરણિત્વા યે પિતુરસ્ય સશ્ચિર ઋભવો વાજમરુહન્દિવો રજઃ ॥ ૧.૧૧૦.૦૬
ઋભુર્ન ઇન્દ્રઃ શવસા નવીયાનૃભુર્વાજેભિર્વસુભિર્વસુર્દદિઃ ।

યુષ્માકં દેવા અવસાહનિ પ્રિયેઽભિ તિષ્ઠેમ પૃત્સુતીરસુન્વતામ્ ॥ ૧.૧૧૦.૦૭
નિશ્ચર્મણ ઋભવો ગામપિંશત સં વત્સેનાસૃજતા માતરં પુનઃ ।
સૌધન્વનાસઃ સ્વપસ્યયા નરો જિવ્રી યુવાના પિતરાકૃણોતન ॥ ૧.૧૧૦.૦૮
વાજેભિર્નો વાજસાતાવવિડ્ઢ્યૃભુમાઁ ઇન્દ્ર ચિત્રમા દર્ષિ રાધઃ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૦.૦૯

તક્ષન્રથં સુવૃતં વિદ્મનાપસસ્તક્ષન્હરી ઇન્દ્રવાહા વૃષણ્વસૂ ।
તક્ષન્પિતૃભ્યામૃભવો યુવદ્વયસ્તક્ષન્વત્સાય માતરં સચાભુવમ્ ॥ ૧.૧૧૧.૦૧
આ નો યજ્ઞાય તક્ષત ઋભુમદ્વયઃ ક્રત્વે દક્ષાય સુપ્રજાવતીમિષમ્ ।
યથા ક્ષયામ સર્વવીરયા વિશા તન્નઃ શર્ધાય ધાસથા સ્વિન્દ્રિયમ્ ॥ ૧.૧૧૧.૦૨
આ તક્ષત સાતિમસ્મભ્યમૃભવઃ સાતિં રથાય સાતિમર્વતે નરઃ ।
સાતિં નો જૈત્રીં સં મહેત વિશ્વહા જામિમજામિં પૃતનાસુ સક્ષણિમ્ ॥ ૧.૧૧૧.૦૩
ઋભુક્ષણમિન્દ્રમા હુવ ઊતય ઋભૂન્વાજાન્મરુતઃ સોમપીતયે ।
ઉભા મિત્રાવરુણા નૂનમશ્વિના તે નો હિન્વન્તુ સાતયે ધિયે જિષે ॥ ૧.૧૧૧.૦૪
ઋભુર્ભરાય સં શિશાતુ સાતિં સમર્યજિદ્વાજો અસ્માઁ અવિષ્ટુ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૧.૦૫

ઈળે દ્યાવાપૃથિવી પૂર્વચિત્તયેઽગ્નિં ઘર્મં સુરુચં યામન્નિષ્ટયે ।
યાભિર્ભરે કારમંશાય જિન્વથસ્તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૧
યુવોર્દાનાય સુભરા અસશ્ચતો રથમા તસ્થુર્વચસં ન મન્તવે ।
યાભિર્ધિયોઽવથઃ કર્મન્નિષ્ટયે તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૨
યુવં તાસાં દિવ્યસ્ય પ્રશાસને વિશાં ક્ષયથો અમૃતસ્ય મજ્મના ।
યાભિર્ધેનુમસ્વં પિન્વથો નરા તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૩
યાભિઃ પરિજ્મા તનયસ્ય મજ્મના દ્વિમાતા તૂર્ષુ તરણિર્વિભૂષતિ ।
યાભિસ્ત્રિમન્તુરભવદ્વિચક્ષણસ્તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૪
યાભી રેભં નિવૃતં સિતમદ્ભ્ય ઉદ્વન્દનમૈરયતં સ્વર્દૃશે ।
યાભિઃ કણ્વં પ્ર સિષાસન્તમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૫
યાભિરન્તકં જસમાનમારણે ભુજ્યું યાભિરવ્યથિભિર્જિજિન્વથુઃ ।
યાભિઃ કર્કન્ધું વય્યં ચ જિન્વથસ્તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૬

યાભિઃ શુચન્તિં ધનસાં સુષંસદં તપ્તં ઘર્મમોમ્યાવન્તમત્રયે ।
યાભિઃ પૃશ્નિગું પુરુકુત્સમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૭
યાભિઃ શચીભિર્વૃષણા પરાવૃજં પ્રાન્ધં શ્રોણં ચક્ષસ એતવે કૃથઃ ।
યાભિર્વર્તિકાં ગ્રસિતામમુઞ્ચતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૮
યાભિઃ સિન્ધું મધુમન્તમસશ્ચતં વસિષ્ઠં યાભિરજરાવજિન્વતમ્ ।
યાભિઃ કુત્સં શ્રુતર્યં નર્યમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૦૯
યાભિર્વિશ્પલાં ધનસામથર્વ્યં સહસ્રમીળ્હ આજાવજિન્વતમ્ ।
યાભિર્વશમશ્વ્યં પ્રેણિમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૦
યાભિઃ સુદાનૂ ઔશિજાય વણિજે દીર્ઘશ્રવસે મધુ કોશો અક્ષરત્ ।
કક્ષીવન્તં સ્તોતારં યાભિરાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૧
યાભી રસાં ક્ષોદસોદ્નઃ પિપિન્વથુરનશ્વં યાભી રથમાવતં જિષે ।
યાભિસ્ત્રિશોક ઉસ્રિયા ઉદાજત તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૨
યાભિઃ સૂર્યં પરિયાથઃ પરાવતિ મન્ધાતારં ક્ષૈત્રપત્યેષ્વાવતમ્ ।
યાભિર્વિપ્રં પ્ર ભરદ્વાજમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૩
યાભિર્મહામતિથિગ્વં કશોજુવં દિવોદાસં શમ્બરહત્ય આવતમ્ ।
યાભિઃ પૂર્ભિદ્યે ત્રસદસ્યુમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૪
યાભિર્વમ્રં વિપિપાનમુપસ્તુતં કલિં યાભિર્વિત્તજાનિં દુવસ્યથઃ ।
યાભિર્વ્યશ્વમુત પૃથિમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૫
યાભિર્નરા શયવે યાભિરત્રયે યાભિઃ પુરા મનવે ગાતુમીષથુઃ ।
યાભિઃ શારીરાજતં સ્યૂમરશ્મયે તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૬
યાભિઃ પઠર્વા જઠરસ્ય મજ્મનાગ્નિર્નાદીદેચ્ચિત ઇદ્ધો અજ્મન્ના ।
યાભિઃ શર્યાતમવથો મહાધને તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૭
યાભિરઙ્ગિરો મનસા નિરણ્યથોઽગ્રં ગચ્છથો વિવરે ગોઅર્ણસઃ ।
યાભિર્મનું શૂરમિષા સમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૮
યાભિઃ પત્નીર્વિમદાય ન્યૂહથુરા ઘ વા યાભિરરુણીરશિક્ષતમ્ ।
યાભિઃ સુદાસ ઊહથુઃ સુદેવ્યં૧ તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૧૯
યાભિઃ શંતાતી ભવથો દદાશુષે ભુજ્યું યાભિરવથો યાભિરધ્રિગુમ્ ।

ઓમ્યાવતીં સુભરામૃતસ્તુભં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૨૦
યાભિઃ કૃશાનુમસને દુવસ્યથો જવે યાભિર્યૂનો અર્વન્તમાવતમ્ ।
મધુ પ્રિયં ભરથો યત્સરડ્ભ્યસ્તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૨૧
યાભિર્નરં ગોષુયુધં નૃષાહ્યે ક્ષેત્રસ્ય સાતા તનયસ્ય જિન્વથઃ ।
યાભી રથાઁ અવથો યાભિરર્વતસ્તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૨૨
યાભિઃ કુત્સમાર્જુનેયં શતક્રતૂ પ્ર તુર્વીતિં પ્ર ચ દભીતિમાવતમ્ ।
યાભિર્ધ્વસન્તિં પુરુષન્તિમાવતં તાભિરૂ ષુ ઊતિભિરશ્વિના ગતમ્ ॥ ૧.૧૧૨.૨૩
અપ્નસ્વતીમશ્વિના વાચમસ્મે કૃતં નો દસ્રા વૃષણા મનીષામ્ ।
અદ્યૂત્યેઽવસે નિ હ્વયે વાં વૃધે ચ નો ભવતં વાજસાતૌ ॥ ૧.૧૧૨.૨૪
દ્યુભિરક્તુભિઃ પરિ પાતમસ્માનરિષ્ટેભિરશ્વિના સૌભગેભિઃ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૨.૨૫

ઇદં શ્રેષ્ઠં જ્યોતિષાં જ્યોતિરાગાચ્ચિત્રઃ પ્રકેતો અજનિષ્ટ વિભ્વા ।
યથા પ્રસૂતા સવિતુઃ સવાયઁ એવા રાત્ર્યુષસે યોનિમારૈક્ ॥ ૧.૧૧૩.૦૧
રુશદ્વત્સા રુશતી શ્વેત્યાગાદારૈગુ કૃષ્ણા સદનાન્યસ્યાઃ ।
સમાનબન્ધૂ અમૃતે અનૂચી દ્યાવા વર્ણં ચરત આમિનાને ॥ ૧.૧૧૩.૦૨
સમાનો અધ્વા સ્વસ્રોરનન્તસ્તમન્યાન્યા ચરતો દેવશિષ્ટે ।
ન મેથેતે ન તસ્થતુઃ સુમેકે નક્તોષાસા સમનસા વિરૂપે ॥ ૧.૧૧૩.૦૩
ભાસ્વતી નેત્રી સૂનૃતાનામચેતિ ચિત્રા વિ દુરો ન આવઃ ।
પ્રાર્પ્યા જગદ્વ્યુ નો રાયો અખ્યદુષા અજીગર્ભુવનાનિ વિશ્વા ॥ ૧.૧૧૩.૦૪
જિહ્મશ્યેરુ ચરિતવે મઘોન્યાભોગય ઇષ્ટયે રાય ઉ ત્વમ્ ।
દભ્રં પશ્યદ્ભ્ય ઉર્વિયા વિચક્ષ ઉષા અજીગર્ભુવનાનિ વિશ્વા ॥ ૧.૧૧૩.૦૫
ક્ષત્રાય ત્વં શ્રવસે ત્વં મહીયા ઇષ્ટયે ત્વમર્થમિવ ત્વમિત્યૈ ।
વિસદૃશા જીવિતાભિપ્રચક્ષ ઉષા અજીગર્ભુવનાનિ વિશ્વા ॥ ૧.૧૧૩.૦૬
એષા દિવો દુહિતા પ્રત્યદર્શિ વ્યુચ્છન્તી યુવતિઃ શુક્રવાસાઃ ।
વિશ્વસ્યેશાના પાર્થિવસ્ય વસ્વ ઉષો અદ્યેહ સુભગે વ્યુચ્છ ॥ ૧.૧૧૩.૦૭
પરાયતીનામન્વેતિ પાથ આયતીનાં પ્રથમા શશ્વતીનામ્ ।
વ્યુચ્છન્તી જીવમુદીરયન્ત્યુષા મૃતં કં ચન બોધયન્તી ॥ ૧.૧૧૩.૦૮

ઉષો યદગ્નિં સમિધે ચકર્થ વિ યદાવશ્ચક્ષસા સૂર્યસ્ય ।
યન્માનુષાન્યક્ષ્યમાણાઁ અજીગસ્તદ્દેવેષુ ચકૃષે ભદ્રમપ્નઃ ॥ ૧.૧૧૩.૦૯
કિયાત્યા યત્સમયા ભવાતિ યા વ્યૂષુર્યાશ્ચ નૂનં વ્યુચ્છાન્ ।
અનુ પૂર્વાઃ કૃપતે વાવશાના પ્રદીધ્યાના જોષમન્યાભિરેતિ ॥ ૧.૧૧૩.૧૦
ઈયુષ્ટે યે પૂર્વતરામપશ્યન્વ્યુચ્છન્તીમુષસં મર્ત્યાસઃ ।
અસ્માભિરૂ નુ પ્રતિચક્ષ્યાભૂદો તે યન્તિ યે અપરીષુ પશ્યાન્ ॥ ૧.૧૧૩.૧૧
યાવયદ્દ્વેષા ઋતપા ઋતેજાઃ સુમ્નાવરી સૂનૃતા ઈરયન્તી ।
સુમઙ્ગલીર્બિભ્રતી દેવવીતિમિહાદ્યોષઃ શ્રેષ્ઠતમા વ્યુચ્છ ॥ ૧.૧૧૩.૧૨
શશ્વત્પુરોષા વ્યુવાસ દેવ્યથો અદ્યેદં વ્યાવો મઘોની ।
અથો વ્યુચ્છાદુત્તરાઁ અનુ દ્યૂનજરામૃતા ચરતિ સ્વધાભિઃ ॥ ૧.૧૧૩.૧૩
વ્યઞ્જિભિર્દિવ આતાસ્વદ્યૌદપ કૃષ્ણાં નિર્ણિજં દેવ્યાવઃ ।
પ્રબોધયન્ત્યરુણેભિરશ્વૈરોષા યાતિ સુયુજા રથેન ॥ ૧.૧૧૩.૧૪
આવહન્તી પોષ્યા વાર્યાણિ ચિત્રં કેતું કૃણુતે ચેકિતાના ।
ઈયુષીણામુપમા શશ્વતીનાં વિભાતીનાં પ્રથમોષા વ્યશ્વૈત્ ॥ ૧.૧૧૩.૧૫
ઉદીર્ધ્વં જીવો અસુર્ન આગાદપ પ્રાગાત્તમ આ જ્યોતિરેતિ ।
આરૈક્પન્થાં યાતવે સૂર્યાયાગન્મ યત્ર પ્રતિરન્ત આયુઃ ॥ ૧.૧૧૩.૧૬
સ્યૂમના વાચ ઉદિયર્તિ વહ્નિઃ સ્તવાનો રેભ ઉષસો વિભાતીઃ ।
અદ્યા તદુચ્છ ગૃણતે મઘોન્યસ્મે આયુર્નિ દિદીહિ પ્રજાવત્ ॥ ૧.૧૧૩.૧૭
યા ગોમતીરુષસઃ સર્વવીરા વ્યુચ્છન્તિ દાશુષે મર્ત્યાય ।
વાયોરિવ સૂનૃતાનામુદર્કે તા અશ્વદા અશ્નવત્સોમસુત્વા ॥ ૧.૧૧૩.૧૮
માતા દેવાનામદિતેરનીકં યજ્ઞસ્ય કેતુર્બૃહતી વિ ભાહિ ।
પ્રશસ્તિકૃદ્બ્રહ્મણે નો વ્યુચ્છા નો જને જનય વિશ્વવારે ॥ ૧.૧૧૩.૧૯
યચ્ચિત્રમપ્ન ઉષસો વહન્તીજાનાય શશમાનાય ભદ્રમ્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૩.૨૦

ઇમા રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્ર ભરામહે મતીઃ ।
યથા શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ ॥ ૧.૧૧૪.૦૧
મૃળા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।

યચ્છં ચ યોશ્ચ મનુરાયેજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતિષુ ॥ ૧.૧૧૪.૦૨
અશ્યામ તે સુમતિં દેવયજ્યયા ક્ષયદ્વીરસ્ય તવ રુદ્ર મીઢ્વઃ ।
સુમ્નાયન્નિદ્વિશો અસ્માકમા ચરારિષ્ટવીરા જુહવામ તે હવિઃ ॥ ૧.૧૧૪.૦૩
ત્વેષં વયં રુદ્રં યજ્ઞસાધં વઙ્કું કવિમવસે નિ હ્વયામહે ।
આરે અસ્મદ્દૈવ્યં હેળો અસ્યતુ સુમતિમિદ્વયમસ્યા વૃણીમહે ॥ ૧.૧૧૪.૦૪
દિવો વરાહમરુષં કપર્દિનં ત્વેષં રૂપં નમસા નિ હ્વયામહે ।
હસ્તે બિભ્રદ્ભેષજા વાર્યાણિ શર્મ વર્મ ચ્છર્દિરસ્મભ્યં યંસત્ ॥ ૧.૧૧૪.૦૫
ઇદં પિત્રે મરુતામુચ્યતે વચઃ સ્વાદોઃ સ્વાદીયો રુદ્રાય વર્ધનમ્ ।
રાસ્વા ચ નો અમૃત મર્તભોજનં ત્મને તોકાય તનયાય મૃળ ॥ ૧.૧૧૪.૦૬
મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નો વધીઃ પિતરં મોત માતરં મા નઃ પ્રિયાસ્તન્વો રુદ્ર રીરિષઃ ॥ ૧.૧૧૪.૦૭
મા નસ્તોકે તનયે મા ન આયૌ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તઃ સદમિત્ત્વા હવામહે ॥ ૧.૧૧૪.૦૮
ઉપ તે સ્તોમાન્પશુપા ઇવાકરં રાસ્વા પિતર્મરુતાં સુમ્નમસ્મે ।
ભદ્રા હિ તે સુમતિર્મૃળયત્તમાથા વયમવ ઇત્તે વૃણીમહે ॥ ૧.૧૧૪.૦૯
આરે તે ગોઘ્નમુત પૂરુષઘ્નં ક્ષયદ્વીર સુમ્નમસ્મે તે અસ્તુ ।
મૃળા ચ નો અધિ ચ બ્રૂહિ દેવાધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ ૧.૧૧૪.૧૦
અવોચામ નમો અસ્મા અવસ્યવઃ શ઼ૃણોતુ નો હવં રુદ્રો મરુત્વાન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૪.૧૧

ચિત્રં દેવાનામુદગાદનીકં ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ ।
આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષં સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ ॥ ૧.૧૧૫.૦૧
સૂર્યો દેવીમુષસં રોચમાનાં મર્યો ન યોષામભ્યેતિ પશ્ચાત્ ।
યત્રા નરો દેવયન્તો યુગાનિ વિતન્વતે પ્રતિ ભદ્રાય ભદ્રમ્ ॥ ૧.૧૧૫.૦૨
ભદ્રા અશ્વા હરિતઃ સૂર્યસ્ય ચિત્રા એતગ્વા અનુમાદ્યાસઃ ।
નમસ્યન્તો દિવ આ પૃષ્ઠમસ્થુઃ પરિ દ્યાવાપૃથિવી યન્તિ સદ્યઃ ॥ ૧.૧૧૫.૦૩
તત્સૂર્યસ્ય દેવત્વં તન્મહિત્વં મધ્યા કર્તોર્વિતતં સં જભાર ।
યદેદયુક્ત હરિતઃ સધસ્થાદાદ્રાત્રી વાસસ્તનુતે સિમસ્મૈ ॥ ૧.૧૧૫.૦૪

તન્મિત્રસ્ય વરુણસ્યાભિચક્ષે સૂર્યો રૂપં કૃણુતે દ્યોરુપસ્થે ।
અનન્તમન્યદ્રુશદસ્ય પાજઃ કૃષ્ણમન્યદ્ધરિતઃ સં ભરન્તિ ॥ ૧.૧૧૫.૦૫
અદ્યા દેવા ઉદિતા સૂર્યસ્ય નિરંહસઃ પિપૃતા નિરવદ્યાત્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૫.૦૬
નાસત્યાભ્યાં બર્હિરિવ પ્ર વૃઞ્જે સ્તોમાઁ ઇયર્મ્યભ્રિયેવ વાતઃ ।
યાવર્ભગાય વિમદાય જાયાં સેનાજુવા ન્યૂહતૂ રથેન ॥ ૧.૧૧૬.૦૧
વીળુપત્મભિરાશુહેમભિર્વા દેવાનાં વા જૂતિભિઃ શાશદાના ।
તદ્રાસભો નાસત્યા સહસ્રમાજા યમસ્ય પ્રધને જિગાય ॥ ૧.૧૧૬.૦૨
તુગ્રો હ ભુજ્યુમશ્વિનોદમેઘે રયિં ન કશ્ચિન્મમૃવાઁ અવાહાઃ ।
તમૂહથુર્નૌભિરાત્મન્વતીભિરન્તરિક્ષપ્રુદ્ભિરપોદકાભિઃ ॥ ૧.૧૧૬.૦૩
તિસ્રઃ ક્ષપસ્ત્રિરહાતિવ્રજદ્ભિર્નાસત્યા ભુજ્યુમૂહથુઃ પતંગૈઃ ।
સમુદ્રસ્ય ધન્વન્નાર્દ્રસ્ય પારે ત્રિભી રથૈઃ શતપદ્ભિઃ ષળશ્વૈઃ ॥ ૧.૧૧૬.૦૪
અનારમ્ભણે તદવીરયેથામનાસ્થાને અગ્રભણે સમુદ્રે ।
યદશ્વિના ઊહથુર્ભુજ્યુમસ્તં શતારિત્રાં નાવમાતસ્થિવાંસમ્ ॥ ૧.૧૧૬.૦૫
યમશ્વિના દદથુઃ શ્વેતમશ્વમઘાશ્વાય શશ્વદિત્સ્વસ્તિ ।
તદ્વાં દાત્રં મહિ કીર્તેન્યં ભૂત્પૈદ્વો વાજી સદમિદ્ધવ્યો અર્યઃ ॥ ૧.૧૧૬.૦૬
યુવં નરા સ્તુવતે પજ્રિયાય કક્ષીવતે અરદતં પુરંધિમ્ ।
કારોતરાચ્છફાદશ્વસ્ય વૃષ્ણઃ શતં કુમ્ભાઁ અસિઞ્ચતં સુરાયાઃ ॥ ૧.૧૧૬.૦૭
હિમેનાગ્નિં ઘ્રંસમવારયેથાં પિતુમતીમૂર્જમસ્મા અધત્તમ્ ।
ઋબીસે અત્રિમશ્વિનાવનીતમુન્નિન્યથુઃ સર્વગણં સ્વસ્તિ ॥ ૧.૧૧૬.૦૮
પરાવતં નાસત્યાનુદેથામુચ્ચાબુધ્નં ચક્રથુર્જિહ્મબારમ્ ।
ક્ષરન્નાપો ન પાયનાય રાયે સહસ્રાય તૃષ્યતે ગોતમસ્ય ॥ ૧.૧૧૬.૦૯
જુજુરુષો નાસત્યોત વવ્રિં પ્રામુઞ્ચતં દ્રાપિમિવ ચ્યવાનાત્ ।
પ્રાતિરતં જહિતસ્યાયુર્દસ્રાદિત્પતિમકૃણુતં કનીનામ્ ॥ ૧.૧૧૬.૧૦
તદ્વાં નરા શંસ્યં રાધ્યં ચાભિષ્ટિમન્નાસત્યા વરૂથમ્ ।
યદ્વિદ્વાંસા નિધિમિવાપગૂળ્હમુદ્દર્શતાદૂપથુર્વન્દનાય ॥ ૧.૧૧૬.૧૧
તદ્વાં નરા સનયે દંસ ઉગ્રમાવિષ્કૃણોમિ તન્યતુર્ન વૃષ્ટિમ્ ।

દધ્યઙ્હ યન્મધ્વાથર્વણો વામશ્વસ્ય શીષ્ણાં પ્ર યદીમુવાચ ॥ ૧.૧૧૬.૧૨
અજોહવીન્નાસત્યા કરા વાં મહે યામન્પુરુભુજા પુરંધિઃ ।
શ્રુતં તચ્છાસુરિવ વધ્રિમત્યા હિરણ્યહસ્તમશ્વિનાવદત્તમ્ ॥ ૧.૧૧૬.૧૩
આસ્નો વૃકસ્ય વર્તિકામભીકે યુવં નરા નાસત્યામુમુક્તમ્ ।
ઉતો કવિં પુરુભુજા યુવં હ કૃપમાણમકૃણુતં વિચક્ષે ॥ ૧.૧૧૬.૧૪
ચરિત્રં હિ વેરિવાચ્છેદિ પર્ણમાજા ખેલસ્ય પરિતક્મ્યાયામ્ ।
સદ્યો જઙ્ઘામાયસીં વિશ્પલાયૈ ધને હિતે સર્તવે પ્રત્યધત્તમ્ ॥ ૧.૧૧૬.૧૫
શતં મેષાન્વૃક્યે ચક્ષદાનમૃજાશ્વં તં પિતાન્ધં ચકાર ।
તસ્મા અક્ષી નાસત્યા વિચક્ષ આધત્તં દસ્રા ભિષજાવનર્વન્ ॥ ૧.૧૧૬.૧૬
આ વાં રથં દુહિતા સૂર્યસ્ય કાર્ષ્મેવાતિષ્ઠદર્વતા જયન્તી ।
વિશ્વે દેવા અન્વમન્યન્ત હૃદ્ભિઃ સમુ શ્રિયા નાસત્યા સચેથે ॥ ૧.૧૧૬.૧૭
યદયાતં દિવોદાસાય વર્તિર્ભરદ્વાજાયાશ્વિના હયન્તા ।
રેવદુવાહ સચનો રથો વાં વૃષભશ્ચ શિંશુમારશ્ચ યુક્તા ॥ ૧.૧૧૬.૧૮
રયિં સુક્ષત્રં સ્વપત્યમાયુઃ સુવીર્યં નાસત્યા વહન્તા ।
આ જહ્નાવીં સમનસોપ વાજૈસ્ત્રિરહ્નો ભાગં દધતીમયાતમ્ ॥ ૧.૧૧૬.૧૯
પરિવિષ્ટં જાહુષં વિશ્વતઃ સીં સુગેભિર્નક્તમૂહથૂ રજોભિઃ ।
વિભિન્દુના નાસત્યા રથેન વિ પર્વતાઁ અજરયૂ અયાતમ્ ॥ ૧.૧૧૬.૨૦
એકસ્યા વસ્તોરાવતં રણાય વશમશ્વિના સનયે સહસ્રા ।
નિરહતં દુચ્છુના ઇન્દ્રવન્તા પૃથુશ્રવસો વૃષણાવરાતીઃ ॥ ૧.૧૧૬.૨૧
શરસ્ય ચિદાર્ચત્કસ્યાવતાદા નીચાદુચ્ચા ચક્રથુઃ પાતવે વાઃ ।
શયવે ચિન્નાસત્યા શચીભિર્જસુરયે સ્તર્યં પિપ્યથુર્ગામ્ ॥ ૧.૧૧૬.૨૨
અવસ્યતે સ્તુવતે કૃષ્ણિયાય ઋજૂયતે નાસત્યા શચીભિઃ ।
પશું ન નષ્ટમિવ દર્શનાય વિષ્ણાપ્વં દદથુર્વિશ્વકાય ॥ ૧.૧૧૬.૨૩
દશ રાત્રીરશિવેના નવ દ્યૂનવનદ્ધં શ્નથિતમપ્સ્વ૧ન્તઃ ।
વિપ્રુતં રેભમુદનિ પ્રવૃક્તમુન્નિન્યથુઃ સોમમિવ સ્રુવેણ ॥ ૧.૧૧૬.૨૪
પ્ર વાં દંસાંસ્યશ્વિનાવવોચમસ્ય પતિઃ સ્યાં સુગવઃ સુવીરઃ ।
ઉત પશ્યન્નશ્નુવન્દીર્ઘમાયુરસ્તમિવેજ્જરિમાણં જગમ્યામ્ ॥ ૧.૧૧૬.૨૫

મધ્વઃ સોમસ્યાશ્વિના મદાય પ્રત્નો હોતા વિવાસતે વામ્ ।
બર્હિષ્મતી રાતિર્વિશ્રિતા ગીરિષા યાતં નાસત્યોપ વાજૈઃ ॥ ૧.૧૧૭.૦૧
યો વામશ્વિના મનસો જવીયાન્રથઃ સ્વશ્વો વિશ આજિગાતિ ।
યેન ગચ્છથઃ સુકૃતો દુરોણં તેન નરા વર્તિરસ્મભ્યં યાતમ્ ॥ ૧.૧૧૭.૦૨
ઋષિં નરાવંહસઃ પાઞ્ચજન્યમૃબીસાદત્રિં મુઞ્ચથો ગણેન ।
મિનન્તા દસ્યોરશિવસ્ય માયા અનુપૂર્વં વૃષણા ચોદયન્તા ॥ ૧.૧૧૭.૦૩
અશ્વં ન ગૂળ્હમશ્વિના દુરેવૈરૃષિં નરા વૃષણા રેભમપ્સુ ।
સં તં રિણીથો વિપ્રુતં દંસોભિર્ન વાં જૂર્યન્તિ પૂર્વ્યા કૃતાનિ ॥ ૧.૧૧૭.૦૪
સુષુપ્વાંસં ન નિરૃતેરુપસ્થે સૂર્યં ન દસ્રા તમસિ ક્ષિયન્તમ્ ।
શુભે રુક્મં ન દર્શતં નિખાતમુદૂપથુરશ્વિના વન્દનાય ॥ ૧.૧૧૭.૦૫
તદ્વાં નરા શંસ્યં પજ્રિયેણ કક્ષીવતા નાસત્યા પરિજ્મન્ ।
શફાદશ્વસ્ય વાજિનો જનાય શતં કુમ્ભાઁ અસિઞ્ચતં મધૂનામ્ ॥ ૧.૧૧૭.૦૬
યુવં નરા સ્તુવતે કૃષ્ણિયાય વિષ્ણાપ્વં દદથુર્વિશ્વકાય ।
ઘોષાયૈ ચિત્પિતૃષદે દુરોણે પતિં જૂર્યન્ત્યા અશ્વિનાવદત્તમ્ ॥ ૧.૧૧૭.૦૭
યુવં શ્યાવાય રુશતીમદત્તં મહઃ ક્ષોણસ્યાશ્વિના કણ્વાય ।
પ્રવાચ્યં તદ્વૃષણા કૃતં વાં યન્નાર્ષદાય શ્રવો અધ્યધત્તમ્ ॥ ૧.૧૧૭.૦૮
પુરૂ વર્પાંસ્યશ્વિના દધાના નિ પેદવ ઊહથુરાશુમશ્વમ્ ।
સહસ્રસાં વાજિનમપ્રતીતમહિહનં શ્રવસ્યં૧ તરુત્રમ્ ॥ ૧.૧૧૭.૦૯
એતાનિ વાં શ્રવસ્યા સુદાનૂ બ્રહ્માઙ્ગૂષં સદનં રોદસ્યોઃ ।
યદ્વાં પજ્રાસો અશ્વિના હવન્તે યાતમિષા ચ વિદુષે ચ વાજમ્ ॥ ૧.૧૧૭.૧૦
સૂનોર્માનેનાશ્વિના ગૃણાના વાજં વિપ્રાય ભુરણા રદન્તા ।
અગસ્ત્યે બ્રહ્મણા વાવૃધાના સં વિશ્પલાં નાસત્યારિણીતમ્ ॥ ૧.૧૧૭.૧૧
કુહ યાન્તા સુષ્ટુતિં કાવ્યસ્ય દિવો નપાતા વૃષણા શયુત્રા ।
હિરણ્યસ્યેવ કલશં નિખાતમુદૂપથુર્દશમે અશ્વિનાહન્ ॥ ૧.૧૧૭.૧૨
યુવં ચ્યવાનમશ્વિના જરન્તં પુનર્યુવાનં ચક્રથુઃ શચીભિઃ ।
યુવો રથં દુહિતા સૂર્યસ્ય સહ શ્રિયા નાસત્યાવૃણીત ॥ ૧.૧૧૭.૧૩
યુવં તુગ્રાય પૂર્વ્યેભિરેવૈઃ પુનર્મન્યાવભવતં યુવાના ।

યુવં ભુજ્યુમર્ણસો નિઃ સમુદ્રાદ્વિભિરૂહથુરૃજ્રેભિરશ્વૈઃ ॥ ૧.૧૧૭.૧૪
અજોહવીદશ્વિના તૌગ્ર્યો વાં પ્રોળ્હઃ સમુદ્રમવ્યથિર્જગન્વાન્ ।
નિષ્ટમૂહથુઃ સુયુજા રથેન મનોજવસા વૃષણા સ્વસ્તિ ॥ ૧.૧૧૭.૧૫
અજોહવીદશ્વિના વર્તિકા વામાસ્નો યત્સીમમુઞ્ચતં વૃકસ્ય ।
વિ જયુષા યયથુઃ સાન્વદ્રેર્જાતં વિષ્વાચો અહતં વિષેણ ॥ ૧.૧૧૭.૧૬
શતં મેષાન્વૃક્યે મામહાનં તમઃ પ્રણીતમશિવેન પિત્રા ।
આક્ષી ઋજ્રાશ્વે અશ્વિનાવધત્તં જ્યોતિરન્ધાય ચક્રથુર્વિચક્ષે ॥ ૧.૧૧૭.૧૭
શુનમન્ધાય ભરમહ્વયત્સા વૃકીરશ્વિના વૃષણા નરેતિ ।
જારઃ કનીન ઇવ ચક્ષદાન ઋજ્રાશ્વઃ શતમેકં ચ મેષાન્ ॥ ૧.૧૧૭.૧૮
મહી વામૂતિરશ્વિના મયોભૂરુત સ્રામં ધિષ્ણ્યા સં રિણીથઃ ।
અથા યુવામિદહ્વયત્પુરંધિરાગચ્છતં સીં વૃષણાવવોભિઃ ॥ ૧.૧૧૭.૧૯
અધેનું દસ્રા સ્તર્યં૧ વિષક્તામપિન્વતં શયવે અશ્વિના ગામ્ ।
યુવં શચીભિર્વિમદાય જાયાં ન્યૂહથુઃ પુરુમિત્રસ્ય યોષામ્ ॥ ૧.૧૧૭.૨૦
યવં વૃકેણાશ્વિના વપન્તેષં દુહન્તા મનુષાય દસ્રા ।
અભિ દસ્યું બકુરેણા ધમન્તોરુ જ્યોતિશ્ચક્રથુરાર્યાય ॥ ૧.૧૧૭.૨૧
આથર્વણાયાશ્વિના દધીચેઽશ્વ્યં શિરઃ પ્રત્યૈરયતમ્ ।
સ વાં મધુ પ્ર વોચદૃતાયન્ત્વાષ્ટ્રં યદ્દસ્રાવપિકક્ષ્યં વામ્ ॥ ૧.૧૧૭.૨૨
સદા કવી સુમતિમા ચકે વાં વિશ્વા ધિયો અશ્વિના પ્રાવતં મે ।
અસ્મે રયિં નાસત્યા બૃહન્તમપત્યસાચં શ્રુત્યં રરાથામ્ ॥ ૧.૧૧૭.૨૩
હિરણ્યહસ્તમશ્વિના રરાણા પુત્રં નરા વધ્રિમત્યા અદત્તમ્ ।
ત્રિધા હ શ્યાવમશ્વિના વિકસ્તમુજ્જીવસ ઐરયતં સુદાનૂ ॥ ૧.૧૧૭.૨૪
એતાનિ વામશ્વિના વીર્યાણિ પ્ર પૂર્વ્યાણ્યાયવોઽવોચન્ ।
બ્રહ્મ કૃણ્વન્તો વૃષણા યુવભ્યાં સુવીરાસો વિદથમા વદેમ ॥ ૧.૧૧૭.૨૫

આ વાં રથો અશ્વિના શ્યેનપત્વા સુમૃળીકઃ સ્વવાઁ યાત્વર્વાઙ્ ।
યો મર્ત્યસ્ય મનસો જવીયાન્ત્રિવન્ધુરો વૃષણા વાતરંહાઃ ॥ ૧.૧૧૮.૦૧
ત્રિવન્ધુરેણ ત્રિવૃતા રથેન ત્રિચક્રેણ સુવૃતા યાતમર્વાક્ ।
પિન્વતં ગા જિન્વતમર્વતો નો વર્ધયતમશ્વિના વીરમસ્મે ॥ ૧.૧૧૮.૦૨

પ્રવદ્યામના સુવૃતા રથેન દસ્રાવિમં શ઼ૃણુતં શ્લોકમદ્રેઃ ।
કિમઙ્ગ વાં પ્રત્યવર્તિં ગમિષ્ઠાહુર્વિપ્રાસો અશ્વિના પુરાજાઃ ॥ ૧.૧૧૮.૦૩
આ વાં શ્યેનાસો અશ્વિના વહન્તુ રથે યુક્તાસ આશવઃ પતંગાઃ ।
યે અપ્તુરો દિવ્યાસો ન ગૃધ્રા અભિ પ્રયો નાસત્યા વહન્તિ ॥ ૧.૧૧૮.૦૪
આ વાં રથં યુવતિસ્તિષ્ઠદત્ર જુષ્ટ્વી નરા દુહિતા સૂર્યસ્ય ।
પરિ વામશ્વા વપુષઃ પતંગા વયો વહન્ત્વરુષા અભીકે ॥ ૧.૧૧૮.૦૫
ઉદ્વન્દનમૈરતં દંસનાભિરુદ્રેભં દસ્રા વૃષણા શચીભિઃ ।
નિષ્ટૌગ્ર્યં પારયથઃ સમુદ્રાત્પુનશ્ચ્યવાનં ચક્રથુર્યુવાનમ્ ॥ ૧.૧૧૮.૦૬
યુવમત્રયેઽવનીતાય તપ્તમૂર્જમોમાનમશ્વિનાવધત્તમ્ ।
યુવં કણ્વાયાપિરિપ્તાય ચક્ષુઃ પ્રત્યધત્તં સુષ્ટુતિં જુજુષાણા ॥ ૧.૧૧૮.૦૭
યુવં ધેનું શયવે નાધિતાયાપિન્વતમશ્વિના પૂર્વ્યાય ।
અમુઞ્ચતં વર્તિકામંહસો નિઃ પ્રતિ જઙ્ઘાં વિશ્પલાયા અધત્તમ્ ॥ ૧.૧૧૮.૦૮
યુવં શ્વેતં પેદવ ઇન્દ્રજૂતમહિહનમશ્વિનાદત્તમશ્વમ્ ।
જોહૂત્રમર્યો અભિભૂતિમુગ્રં સહસ્રસાં વૃષણં વીડ્વઙ્ગમ્ ॥ ૧.૧૧૮.૦૯
તા વાં નરા સ્વવસે સુજાતા હવામહે અશ્વિના નાધમાનાઃ ।
આ ન ઉપ વસુમતા રથેન ગિરો જુષાણા સુવિતાય યાતમ્ ॥ ૧.૧૧૮.૧૦
આ શ્યેનસ્ય જવસા નૂતનેનાસ્મે યાતં નાસત્યા સજોષાઃ ।
હવે હિ વામશ્વિના રાતહવ્યઃ શશ્વત્તમાયા ઉષસો વ્યુષ્ટૌ ॥ ૧.૧૧૮.૧૧
આ વાં રથં પુરુમાયં મનોજુવં જીરાશ્વં યજ્ઞિયં જીવસે હુવે ।
સહસ્રકેતું વનિનં શતદ્વસું શ્રુષ્ટીવાનં વરિવોધામભિ પ્રયઃ ॥ ૧.૧૧૯.૦૧
ઊર્ધ્વા ધીતિઃ પ્રત્યસ્ય પ્રયામન્યધાયિ શસ્મન્સમયન્ત આ દિશઃ ।
સ્વદામિ ઘર્મં પ્રતિ યન્ત્યૂતય આ વામૂર્જાની રથમશ્વિનારુહત્ ॥ ૧.૧૧૯.૦૨
સં યન્મિથઃ પસ્પૃધાનાસો અગ્મત શુભે મખા અમિતા જાયવો રણે ।
યુવોરહ પ્રવણે ચેકિતે રથો યદશ્વિના વહથઃ સૂરિમા વરમ્ ॥ ૧.૧૧૯.૦૩
યુવં ભુજ્યું ભુરમાણં વિભિર્ગતં સ્વયુક્તિભિર્નિવહન્તા પિતૃભ્ય આ ।
યાસિષ્ટં વર્તિર્વૃષણા વિજેન્યં૧ દિવોદાસાય મહિ ચેતિ વામવઃ ॥ ૧.૧૧૯.૦૪
યુવોરશ્વિના વપુષે યુવાયુજં રથં વાણી યેમતુરસ્ય શર્ધ્યમ્ ।

આ વાં પતિત્વં સખ્યાય જગ્મુષી યોષાવૃણીત જેન્યા યુવાં પતી ॥ ૧.૧૧૯.૦૫
યુવં રેભં પરિષૂતેરુરુષ્યથો હિમેન ઘર્મં પરિતપ્તમત્રયે ।
યુવં શયોરવસં પિપ્યથુર્ગવિ પ્ર દીર્ઘેણ વન્દનસ્તાર્યાયુષા ॥ ૧.૧૧૯.૦૬
યુવં વન્દનં નિરૃતં જરણ્યયા રથં ન દસ્રા કરણા સમિન્વથઃ ।
ક્ષેત્રાદા વિપ્રં જનથો વિપન્યયા પ્ર વામત્ર વિધતે દંસના ભુવત્ ॥ ૧.૧૧૯.૦૭
અગચ્છતં કૃપમાણં પરાવતિ પિતુઃ સ્વસ્ય ત્યજસા નિબાધિતમ્ ।
સ્વર્વતીરિત ઊતીર્યુવોરહ ચિત્રા અભીકે અભવન્નભિષ્ટયઃ ॥ ૧.૧૧૯.૦૮
ઉત સ્યા વાં મધુમન્મક્ષિકારપન્મદે સોમસ્યૌશિજો હુવન્યતિ ।
યુવં દધીચો મન આ વિવાસથોઽથા શિરઃ પ્રતિ વામશ્વ્યં વદત્ ॥ ૧.૧૧૯.૦૯
યુવં પેદવે પુરુવારમશ્વિના સ્પૃધાં શ્વેતં તરુતારં દુવસ્યથઃ ।
શર્યૈરભિદ્યું પૃતનાસુ દુષ્ટરં ચર્કૃત્યમિન્દ્રમિવ ચર્ષણીસહમ્ ॥ ૧.૧૧૯.૧૦
કા રાધદ્ધોત્રાશ્વિના વાં કો વાં જોષ ઉભયોઃ ।
કથા વિધાત્યપ્રચેતાઃ ॥ ૧.૧૨૦.૦૧
વિદ્વાંસાવિદ્દુરઃ પૃચ્છેદવિદ્વાનિત્થાપરો અચેતાઃ ।
નૂ ચિન્નુ મર્તે અક્રૌ ॥ ૧.૧૨૦.૦૨
તા વિદ્વાંસા હવામહે વાં તા નો વિદ્વાંસા મન્મ વોચેતમદ્ય ।
પ્રાર્ચદ્દયમાનો યુવાકુઃ ॥ ૧.૧૨૦.૦૩
વિ પૃચ્છામિ પાક્યાઉ ન દેવાન્વષટ્કૃતસ્યાદ્ભુતસ્ય દસ્રા ।
પાતં ચ સહ્યસો યુવં ચ રભ્યસો નઃ ॥ ૧.૧૨૦.૦૪
પ્ર યા ઘોષે ભૃગવાણે ન શોભે યયા વાચા યજતિ પજ્રિયો વામ્ ।
પ્રૈષયુર્ન વિદ્વાન્ ॥ ૧.૧૨૦.૦૫
શ્રુતં ગાયત્રં તકવાનસ્યાહં ચિદ્ધિ રિરેભાશ્વિના વામ્ ।
આક્ષી શુભસ્પતી દન્ ॥ ૧.૧૨૦.૦૬
યુવં હ્યાસ્તં મહો રન્યુવં વા યન્નિરતતંસતમ્ ।
તા નો વસૂ સુગોપા સ્યાતં પાતં નો વૃકાદઘાયોઃ ॥ ૧.૧૨૦.૦૭
મા કસ્મૈ ધાતમભ્યમિત્રિણે નો માકુત્રા નો ગૃહેભ્યો ધેનવો ગુઃ ।
સ્તનાભુજો અશિશ્વીઃ ॥ ૧.૧૨૦.૦૮

દુહીયન્મિત્રધિતયે યુવાકુ  રાયે ચ  નો મિમીતં વાજવત્યૈ ।
ઇષે ચ  નો મિમીતં ધેનુમત્યૈ  ॥ ૧.૧૨૦.૦૯

અશ્વિનોરસનં  રથમનશ્વં વાજિનીવતોઃ ।
તેનાહં ભૂરિ  ચાકન ॥ ૧.૧૨૦.૧૦

અયં સમહ મા તનૂહ્યાતે  જનાઁ અનુ  ।
સોમપેયં  સુખો રથઃ  ॥ ૧.૧૨૦.૧૧

અધ  સ્વપ્નસ્ય  નિર્વિદેઽભુઞ્જતશ્ચ રેવતઃ  ।
ઉભા તા બસ્રિ  નશ્યતઃ ॥ ૧.૧૨૦.૧૨

કદિત્થા નૄઁઃ પાત્રં  દેવયતાં શ્રવદ્ગિરો  અઙ્ગિરસાં તુરણ્યન્ ।
પ્ર યદાનડ્વિશ  આ હર્મ્યસ્યોરુ ક્રંસતે અધ્વરે યજત્રઃ ॥ ૧.૧૨૧.૦૧

સ્તમ્ભીદ્ધ  દ્યાં સ ધરુણં  પ્રુષાયદૃભુર્વાજાય  દ્રવિણં  નરો  ગોઃ ।
અનુ  સ્વજાં મહિષશ્ચક્ષત  વ્રાં મેનામશ્વસ્ય  પરિ  માતરં  ગોઃ ॥ ૧.૧૨૧.૦૨

નક્ષદ્ધવમરુણીઃ પૂર્વ્યં રાટ્ તુરો વિશામઙ્ગિરસામનુ  દ્યૂન્ ।
તક્ષદ્વજ્રં  નિયુતં તસ્તમ્ભદ્દ્યાં ચતુષ્પદે  નર્યાય દ્વિપાદે  ॥ ૧.૧૨૧.૦૩

અસ્ય મદે  સ્વર્યં  દા ઋતાયાપીવૃતમુસ્રિયાણામનીકમ્ ।
યદ્ધ  પ્રસર્ગે  ત્રિકકુમ્નિવર્તદપ  દ્રુહો  માનુષસ્ય  દુરો  વઃ ॥ ૧.૧૨૧.૦૪

તુભ્યં  પયો  યત્પિતરાવનીતાં  રાધઃ  સુરેતસ્તુરણે  ભુરણ્યૂ ।
શુચિ  યત્તે  રેક્ણ  આયજન્ત સબર્દુઘાયાઃ  પય  ઉસ્રિયાયાઃ ॥ ૧.૧૨૧.૦૫

અધ  પ્ર જજ્ઞે તરણિર્મમત્તુ  પ્ર રોચ્યસ્યા ઉષસો  ન સૂરઃ  ।
ઇન્દુર્યેભિરાષ્ટ  સ્વેદુહવ્યૈઃ સ્રુવેણ  સિઞ્ચઞ્જરણાભિ ધામ  ॥ ૧.૧૨૧.૦૬

સ્વિધ્મા યદ્વનધિતિરપસ્યાત્સૂરો  અધ્વરે પરિ  રોધના  ગોઃ ।
યદ્ધ  પ્રભાસિ  કૃત્વ્યાઁ અનુ  દ્યૂનનર્વિશે પશ્વિષે  તુરાય  ॥ ૧.૧૨૧.૦૭

અષ્ટા મહો દિવ આદો  હરી  ઇહ દ્યુમ્નાસાહમભિ યોધાન ઉત્સમ્ ।
હરિં  યત્તે  મન્દિનં  દુક્ષન્વૃધે ગોરભસમદ્રિભિર્વાતાપ્યમ્ ॥ ૧.૧૨૧.૦૮

ત્વમાયસં પ્રતિ  વર્તયો  ગોર્દિવો અશ્માનમુપનીતમૃભ્વા  ।
કુત્સાય  યત્ર  પુરુહૂત વન્વઞ્છુષ્ણમનન્તૈઃ પરિયાસિ  વધૈઃ ॥ ૧.૧૨૧.૦૯

પુરા યત્સૂરસ્તમસો  અપીતેસ્તમદ્રિવઃ ફલિગં હેતિમસ્ય ।

શુષ્ણસ્ય ચિત્પરિહિતં યદોજો દિવસ્પરિ સુગ્રથિતં તદાદઃ ॥ ૧.૧૨૧.૧૦
અનુ ત્વા મહી પાજસી અચક્રે દ્યાવાક્ષામા મદતામિન્દ્ર કર્મન્ ।
ત્વં વૃત્રમાશયાનં સિરાસુ મહો વજ્રેણ સિષ્વપો વરાહુમ્ ॥ ૧.૧૨૧.૧૧
ત્વમિન્દ્ર નર્યો યાઁ અવો નૄન્તિષ્ઠા વાતસ્ય સુયુજો વહિષ્ઠાન્ ।
યં તે કાવ્ય ઉશના મન્દિનં દાદ્વૃત્રહણં પાર્યં તતક્ષ વજ્રમ્ ॥ ૧.૧૨૧.૧૨
ત્વં સૂરો હરિતો રામયો નૄન્ભરચ્ચક્રમેતશો નાયમિન્દ્ર ।
પ્રાસ્ય પારં નવતિં નાવ્યાનામપિ કર્તમવર્તયોઽયજ્યૂન્ ॥ ૧.૧૨૧.૧૩
ત્વં નો અસ્યા ઇન્દ્ર દુર્હણાયાઃ પાહિ વજ્રિવો દુરિતાદભીકે ।
પ્ર નો વાજાન્રથ્યોઉ અશ્વબુધ્યાનિષે યન્ધિ શ્રવસે સૂનૃતાયૈ ॥ ૧.૧૨૧.૧૪
મા સા તે અસ્મત્સુમતિર્વિ દસદ્વાજપ્રમહઃ સમિષો વરન્ત ।
આ નો ભજ મઘવન્ગોષ્વર્યો મંહિષ્ઠાસ્તે સધમાદઃ સ્યામ ॥ ૧.૧૨૧.૧૫

પ્ર વઃ પાન્તં રઘુમન્યવોઽન્ધો યજ્ઞં રુદ્રાય મીળ્હુષે ભરધ્વમ્ ।
દિવો અસ્તોષ્યસુરસ્ય વીરૈરિષુધ્યેવ મરુતો રોદસ્યોઃ ॥ ૧.૧૨૨.૦૧
પત્નીવ પૂર્વહૂતિં વાવૃધધ્યા ઉષાસાનક્તા પુરુધા વિદાને ।
સ્તરીર્નાત્કં વ્યુતં વસાના સૂર્યસ્ય શ્રિયા સુદૃશી હિરણ્યૈઃ ॥ ૧.૧૨૨.૦૨
મમત્તુ નઃ પરિજ્મા વસર્હા મમત્તુ વાતો અપાં વૃષણ્વાન્ ।
શિશીતમિન્દ્રાપર્વતા યુવં નસ્તન્નો વિશ્વે વરિવસ્યન્તુ દેવાઃ ॥ ૧.૧૨૨.૦૩
ઉત ત્યા મે યશસા શ્વેતનાયૈ વ્યન્તા પાન્તૌશિજો હુવધ્યૈ ।
પ્ર વો નપાતમપાં કૃણુધ્વં પ્ર માતરા રાસ્પિનસ્યાયોઃ ॥ ૧.૧૨૨.૦૪
આ વો રુવણ્યુમૌશિજો હુવધ્યૈ ઘોષેવ શંસમર્જુનસ્ય નંશે ।
પ્ર વઃ પૂષ્ણે દાવન આઁ અચ્છા વોચેય વસુતાતિમગ્નેઃ ॥ ૧.૧૨૨.૦૫
શ્રુતં મે મિત્રાવરુણા હવેમોત શ્રુતં સદને વિશ્વતઃ સીમ્ ।
શ્રોતુ નઃ શ્રોતુરાતિઃ સુશ્રોતુઃ સુક્ષેત્રા સિન્ધુરદ્ભિઃ ॥ ૧.૧૨૨.૦૬
સ્તુષે સા વાં વરુણ મિત્ર રાતિર્ગવાં શતા પૃક્ષયામેષુ પજ્રે ।
શ્રુતરથે પ્રિયરથે દધાનાઃ સદ્યઃ પુષ્ટિં નિરુન્ધાનાસો અગ્મન્ ॥ ૧.૧૨૨.૦૭
અસ્ય સ્તુષે મહિમઘસ્ય રાધઃ સચા સનેમ નહુષઃ સુવીરાઃ ।
જનો યઃ પજ્રેભ્યો વાજિનીવાનશ્વાવતો રથિનો મહ્યં સૂરિઃ ॥ ૧.૧૨૨.૦૮

જનો યો મિત્રાવરુણાવભિધ્રુગપો ન વાં સુનોત્યક્ષ્ણયાધ્રુક્ ।
સ્વયં સ યક્ષ્મં હૃદયે નિ ધત્ત આપ યદીં હોત્રાભિરૃતાવા ॥ ૧.૧૨૨.૦૯
સ વ્રાધતો નહુષો દંસુજૂતઃ શર્ધસ્તરો નરાં ગૂર્તશ્રવાઃ ।
વિસૃષ્ટરાતિર્યાતિ બાળ્હસૃત્વા વિશ્વાસુ પૃત્સુ સદમિચ્છૂરઃ ॥ ૧.૧૨૨.૧૦
અધ ગ્મન્તા નહુષો હવં સૂરેઃ શ્રોતા રાજાનો અમૃતસ્ય મન્દ્રાઃ ।
નભોજુવો યન્નિરવસ્ય રાધઃ પ્રશસ્તયે મહિના રથવતે ॥ ૧.૧૨૨.૧૧
એતં શર્ધં ધામ યસ્ય સૂરેરિત્યવોચન્દશતયસ્ય નંશે ।
દ્યુમ્નાનિ યેષુ વસુતાતી રારન્વિશ્વે સન્વન્તુ પ્રભૃથેષુ વાજમ્ ॥ ૧.૧૨૨.૧૨
મન્દામહે દશતયસ્ય ધાસેર્દ્વિર્યત્પઞ્ચ બિભ્રતો યન્ત્યન્ના ।
કિમિષ્ટાશ્વ ઇષ્ટરશ્મિરેત ઈશાનાસસ્તરુષ ઋઞ્જતે નૄન્ ॥ ૧.૧૨૨.૧૩
હિરણ્યકર્ણં મણિગ્રીવમર્ણસ્તન્નો વિશ્વે વરિવસ્યન્તુ દેવાઃ ।
અર્યો ગિરઃ સદ્ય આ જગ્મુષીરોસ્રાશ્ચાકન્તૂભયેષ્વસ્મે ॥ ૧.૧૨૨.૧૪
ચત્વારો મા મશર્શારસ્ય શિશ્વસ્ત્રયો રાજ્ઞ આયવસસ્ય જિષ્ણોઃ ।
રથો વાં મિત્રાવરુણા દીર્ઘાપ્સાઃ સ્યૂમગભસ્તિઃ સૂરો નાદ્યૌત્ ॥ ૧.૧૨૨.૧૫

પૃથૂ રથો દક્ષિણાયા અયોજ્યૈનં દેવાસો અમૃતાસો અસ્થુઃ ।
કૃષ્ણાદુદસ્થાદર્યા૩ વિહાયાશ્ચિકિત્સન્તી માનુષાય ક્ષયાય ॥ ૧.૧૨૩.૦૧
પૂર્વા વિશ્વસ્માદ્ભુવનાદબોધિ જયન્તી વાજં બૃહતી સનુત્રી ।
ઉચ્ચા વ્યખ્યદ્યુવતિઃ પુનર્ભૂરોષા અગન્પ્રથમા પૂર્વહૂતૌ ॥ ૧.૧૨૩.૦૨
યદદ્ય ભાગં વિભજાસિ નૃભ્ય ઉષો દેવિ મર્ત્યત્રા સુજાતે ।
દેવો નો અત્ર સવિતા દમૂના અનાગસો વોચતિ સૂર્યાય ॥ ૧.૧૨૩.૦૩
ગૃહંગૃહમહના યાત્યચ્છા દિવેદિવે અધિ નામા દધાના ।
સિષાસન્તી દ્યોતના શશ્વદાગાદગ્રમગ્રમિદ્ભજતે વસૂનામ્ ॥ ૧.૧૨૩.૦૪
ભગસ્ય સ્વસા વરુણસ્ય જામિરુષઃ સૂનૃતે પ્રથમા જરસ્વ ।
પશ્ચા સ દધ્યા યો અઘસ્ય ધાતા જયેમ તં દક્ષિણયા રથેન ॥ ૧.૧૨૩.૦૫
ઉદીરતાં સૂનૃતા ઉત્પુરંધીરુદગ્નયઃ શુશુચાનાસો અસ્થુઃ ।
સ્પાર્હા વસૂનિ તમસાપગૂળ્હાવિષ્કૃણ્વન્ત્યુષસો વિભાતીઃ ॥ ૧.૧૨૩.૦૬
અપાન્યદેત્યભ્યન્યદેતિ વિષુરૂપે અહની સં ચરેતે ।

પરિક્ષિતોસ્તમો અન્યા ગુહાકરદ્યૌદુષાઃ શોશુચતા રથેન ॥ ૧.૧૨૩.૦૭
સદૃશીરદ્ય સદૃશીરિદુ શ્વો દીર્ઘં સચન્તે વરુણસ્ય ધામ ।
અનવદ્યાસ્ત્રિંશતં યોજનાન્યેકૈકા ક્રતું પરિ યન્તિ સદ્યઃ ॥ ૧.૧૨૩.૦૮
જાનત્યહ્નઃ પ્રથમસ્ય નામ શુક્રા કૃષ્ણાદજનિષ્ટ શ્વિતીચી ।
ઋતસ્ય યોષા ન મિનાતિ ધામાહરહર્નિષ્કૃતમાચરન્તી ॥ ૧.૧૨૩.૦૯
કન્યેવ તન્વાઉ શાશદાનાઁ એષિ દેવિ દેવમિયક્ષમાણમ્ ।
સંસ્મયમાના યુવતિઃ પુરસ્તાદાવિર્વક્ષાંસિ કૃણુષે વિભાતી ॥ ૧.૧૨૩.૧૦
સુસંકાશા માતૃમૃષ્ટેવ યોષાવિસ્તન્વં કૃણુષે દૃશે કમ્ ।
ભદ્રા ત્વમુષો વિતરં વ્યુચ્છ ન તત્તે અન્યા ઉષસો નશન્ત ॥ ૧.૧૨૩.૧૧
અશ્વાવતીર્ગોમતીર્વિશ્વવારા યતમાના રશ્મિભિઃ સૂર્યસ્ય ।
પરા ચ યન્તિ પુનરા ચ યન્તિ ભદ્રા નામ વહમાના ઉષાસઃ ॥ ૧.૧૨૩.૧૨
ઋતસ્ય રશ્મિમનુયચ્છમાના ભદ્રમ્ભદ્રં ક્રતુમસ્માસુ ધેહિ ।
ઉષો નો અદ્ય સુહવા વ્યુચ્છાસ્માસુ રાયો મઘવત્સુ ચ સ્યુઃ ॥ ૧.૧૨૩.૧૩

ઉષા ઉચ્છન્તી સમિધાને અગ્ના ઉદ્યન્સૂર્ય ઉર્વિયા જ્યોતિરશ્રેત્ ।
દેવો નો અત્ર સવિતા ન્વર્થં પ્રાસાવીદ્દ્વિપત્પ્ર ચતુષ્પદિત્યૈ ॥ ૧.૧૨૪.૦૧
અમિનતી દૈવ્યાનિ વ્રતાનિ પ્રમિનતી મનુષ્યા યુગાનિ ।
ઈયુષીણામુપમા શશ્વતીનામાયતીનાં પ્રથમોષા વ્યદ્યૌત્ ॥ ૧.૧૨૪.૦૨
એષા દિવો દુહિતા પ્રત્યદર્શિ જ્યોતિર્વસાના સમના પુરસ્તાત્ ।
ઋતસ્ય પન્થામન્વેતિ સાધુ પ્રજાનતીવ ન દિશો મિનાતિ ॥ ૧.૧૨૪.૦૩
ઉપો અદર્શિ શુન્ધ્યુવો ન વક્ષો નોધા ઇવાવિરકૃત પ્રિયાણિ ।
અદ્મસન્ન સસતો બોધયન્તી શશ્વત્તમાગાત્પુનરેયુષીણામ્ ॥ ૧.૧૨૪.૦૪
પૂર્વે અર્ધે રજસો અપ્ત્યસ્ય ગવાં જનિત્ર્યકૃત પ્ર કેતુમ્ ।
વ્યુ પ્રથતે વિતરં વરીય ઓભા પૃણન્તી પિત્રોરુપસ્થા ॥ ૧.૧૨૪.૦૫
એવેદેષા પુરુતમા દૃશે કં નાજામિં ન પરિ વૃણક્તિ જામિમ્ ।
અરેપસા તન્વાઉ શાશદાના નાર્ભાદીષતે ન મહો વિભાતી ॥ ૧.૧૨૪.૦૬
અભ્રાતેવ પુંસ એતિ પ્રતીચી ગર્તારુગિવ સનયે ધનાનામ્ ।
જાયેવ પત્ય ઉશતી સુવાસા ઉષા હસ્રેવ નિ રિણીતે અપ્સઃ ॥ ૧.૧૨૪.૦૭

સ્વસા સ્વસ્રે જ્યાયસ્યૈ યોનિમારૈગપૈત્યસ્યાઃ પ્રતિચક્ષ્યેવ ।
વ્યુચ્છન્તી રશ્મિભિઃ સૂર્યસ્યાઞ્જ્યઙ્ક્તે સમનગા ઇવ વ્રાઃ ॥ ૧.૧૨૪.૦૮
આસાં પૂર્વાસામહસુ સ્વસૄણામપરા પૂર્વામભ્યેતિ પશ્ચાત્ ।
તાઃ પ્રત્નવન્નવ્યસીર્નૂનમસ્મે રેવદુચ્છન્તુ સુદિના ઉષાસઃ ॥ ૧.૧૨૪.૦૯
પ્ર બોધયોષઃ પૃણતો મઘોન્યબુધ્યમાનાઃ પણયઃ સસન્તુ ।
રેવદુચ્છ મઘવદ્ભ્યો મઘોનિ રેવત્સ્તોત્રે સૂનૃતે જારયન્તી ॥ ૧.૧૨૪.૧૦
અવેયમશ્વૈદ્યુવતિઃ પુરસ્તાદ્યુઙ્ક્તે ગવામરુણાનામનીકમ્ ।
વિ નૂનમુચ્છાદસતિ પ્ર કેતુર્ગૃહંગૃહમુપ તિષ્ઠાતે અગ્નિઃ ॥ ૧.૧૨૪.૧૧
ઉત્તે વયશ્ચિદ્વસતેરપપ્તન્નરશ્ચ યે પિતુભાજો વ્યુષ્ટૌ ।
અમા સતે વહસિ ભૂરિ વામમુષો દેવિ દાશુષે મર્ત્યાય ॥ ૧.૧૨૪.૧૨
અસ્તોઢ્વં સ્તોમ્યા બ્રહ્મણા મેઽવીવૃધધ્વમુશતીરુષાસઃ ।
યુષ્માકં દેવીરવસા સનેમ સહસ્રિણં ચ શતિનં ચ વાજમ્ ॥ ૧.૧૨૪.૧૩
પ્રાતા રત્નં પ્રાતરિત્વા દધાતિ તં ચિકિત્વાન્પ્રતિગૃહ્યા નિ ધત્તે ।
તેન પ્રજાં વર્ધયમાન આયૂ રાયસ્પોષેણ સચતે સુવીરઃ ॥ ૧.૧૨૫.૦૧
સુગુરસત્સુહિરણ્યઃ સ્વશ્વો બૃહદસ્મૈ વય ઇન્દ્રો દધાતિ ।
યસ્ત્વાયન્તં વસુના પ્રાતરિત્વો મુક્ષીજયેવ પદિમુત્સિનાતિ ॥ ૧.૧૨૫.૦૨
આયમદ્ય સુકૃતં પ્રાતરિચ્છન્નિષ્ટેઃ પુત્રં વસુમતા રથેન ।
અંશોઃ સુતં પાયય મત્સરસ્ય ક્ષયદ્વીરં વર્ધય સૂનૃતાભિઃ ॥ ૧.૧૨૫.૦૩
ઉપ ક્ષરન્તિ સિન્ધવો મયોભુવ ઈજાનં ચ યક્ષ્યમાણં ચ ધેનવઃ ।
પૃણન્તં ચ પપુરિં ચ શ્રવસ્યવો ઘૃતસ્ય ધારા ઉપ યન્તિ વિશ્વતઃ ॥ ૧.૧૨૫.૦૪
નાકસ્ય પૃષ્ઠે અધિ તિષ્ઠતિ શ્રિતો યઃ પૃણાતિ સ હ દેવેષુ ગચ્છતિ ।
તસ્મા આપો ઘૃતમર્ષન્તિ સિન્ધવસ્તસ્મા ઇયં દક્ષિણા પિન્વતે સદા ॥ ૧.૧૨૫.૦૫
દક્ષિણાવતામિદિમાનિ ચિત્રા દક્ષિણાવતાં દિવિ સૂર્યાસઃ ।
દક્ષિણાવન્તો અમૃતં ભજન્તે દક્ષિણાવન્તઃ પ્ર તિરન્ત આયુઃ ॥ ૧.૧૨૫.૦૬
મા પૃણન્તો દુરિતમેન આરન્મા જારિષુઃ સૂરયઃ સુવ્રતાસઃ ।
અન્યસ્તેષાં પરિધિરસ્તુ કશ્ચિદપૃણન્તમભિ સં યન્તુ શોકાઃ ॥ ૧.૧૨૫.૦૭
અમન્દાન્સ્તોમાન્પ્ર ભરે મનીષા સિન્ધાવધિ ક્ષિયતો ભાવ્યસ્ય ।

યો મે સહસ્રમમિમીત સવાનતૂર્તો રાજા શ્રવ ઇચ્છમાનઃ ॥ ૧.૧૨૬.૦૧
શતં રાજ્ઞો નાધમાનસ્ય નિષ્કાઞ્છતમશ્વાન્પ્રયતાન્સદ્ય આદમ્ ।
શતં કક્ષીવાઁ અસુરસ્ય ગોનાં દિવિ શ્રવોઽજરમા તતાન ॥ ૧.૧૨૬.૦૨
ઉપ મા શ્યાવાઃ સ્વનયેન દત્તા વધૂમન્તો દશ રથાસો અસ્થુઃ ।
ષષ્ટિઃ સહસ્રમનુ ગવ્યમાગાત્સનત્કક્ષીવાઁ અભિપિત્વે અહ્નામ્ ॥ ૧.૧૨૬.૦૩
ચત્વારિંશદ્દશરથસ્ય શોણાઃ સહસ્રસ્યાગ્રે શ્રેણિં નયન્તિ ।
મદચ્યુતઃ કૃશનાવતો અત્યાન્કક્ષીવન્ત ઉદમૃક્ષન્ત પજ્રાઃ ॥ ૧.૧૨૬.૦૪
પૂર્વામનુ પ્રયતિમા દદે વસ્ત્રીન્યુક્તાઁ અષ્ટાવરિધાયસો ગાઃ ।
સુબન્ધવો યે વિશ્યા ઇવ વ્રા અનસ્વન્તઃ શ્રવ ઐષન્ત પજ્રાઃ ॥ ૧.૧૨૬.૦૫
આગધિતા પરિગધિતા યા કશીકેવ જઙ્ગહે ।
દદાતિ મહ્યં યાદુરી યાશૂનાં ભોજ્યા શતા ॥ ૧.૧૨૬.૦૬
ઉપોપ મે પરા મૃશ મા મે દભ્રાણિ મન્યથાઃ ।
સર્વાહમસ્મિ રોમશા ગન્ધારીણામિવાવિકા ॥ ૧.૧૨૬.૦૭

અગ્નિં હોતારં મન્યે દાસ્વન્તં વસું સૂનું સહસો જાતવેદસં વિપ્રં ન જાતવેદસમ્ ।
ય ઊર્ધ્વયા સ્વધ્વરો દેવો દેવાચ્યા કૃપા ।
ઘૃતસ્ય વિભ્રાષ્ટિમનુ વષ્ટિ શોચિષાજુહ્વાનસ્ય સર્પિષઃ ॥ ૧.૧૨૭.૦૧
યજિષ્ઠં ત્વા યજમાના હુવેમ જ્યેષ્ઠમઙ્ગિરસાં વિપ્ર મન્મભિર્વિપ્રેભિઃ શુક્ર મન્મભિઃ ।
પરિજ્માનમિવ દ્યાં હોતારં ચર્ષણીનામ્ ।
શોચિષ્કેશં વૃષણં યમિમા વિશઃ પ્રાવન્તુ જૂતયે વિશઃ ॥ ૧.૧૨૭.૦૨
સ હિ પુરૂ ચિદોજસા વિરુક્મતા દીદ્યાનો ભવતિ દ્રુહંતરઃ પરશુર્ન દ્રુહંતરઃ ।
વીળુ ચિદ્યસ્ય સમૃતૌ શ્રુવદ્વનેવ યત્સ્થિરમ્ ।
નિઃષહમાણો યમતે નાયતે ધન્વાસહા નાયતે ॥ ૧.૧૨૭.૦૩
દૃળ્હા ચિદસ્મા અનુ દુર્યથા વિદે તેજિષ્ઠાભિરરણિભિર્દાષ્ટ્યવસેઽગ્નયે દાષ્ટ્યવસે ।
પ્ર યઃ પુરૂણિ ગાહતે તક્ષદ્વનેવ શોચિષા ।
સ્થિરા ચિદન્ના નિ રિણાત્યોજસા નિ સ્થિરાણિ ચિદોજસા ॥ ૧.૧૨૭.૦૪
તમસ્ય પૃક્ષમુપરાસુ ધીમહિ નક્તં યઃ સુદર્શતરો દિવાતરાદપ્રાયુષે દિવાતરાત્ ।
આદસ્યાયુર્ગ્રભણવદ્વીળુ શર્મ ન સૂનવે ।

ભક્તમભક્તમવો વ્યન્તો અજરા અગ્નયો વ્યન્તો અજરાઃ ॥ ૧.૧૨૭.૦૫
સ હિ શર્ધો ન મારુતં તુવિષ્વણિરપ્નસ્વતીષૂર્વરાસ્વિષ્ટનિરાર્તનાસ્વિષ્ટનિઃ ।
આદદ્ધવ્યાન્યાદદિર્યજ્ઞસ્ય કેતુરર્હણા ।
અધ સ્માસ્ય હર્ષતો હૃષીવતો વિશ્વે જુષન્ત પન્થાં નરઃ શુભે ન પન્થામ્ ॥ ૧.૧૨૭.૦૬
દ્વિતા યદીં કીસ્તાસો અભિદ્યવો નમસ્યન્ત ઉપવોચન્ત ભૃગવો મથ્નન્તો દાશા ભૃગવઃ ।
અગ્નિરીશે વસૂનાં શુચિર્યો ધર્ણિરેષામ્ ।
પ્રિયાઁ અપિધીઁર્વનિષીષ્ટ મેધિર આ વનિષીષ્ટ મેધિરઃ ॥ ૧.૧૨૭.૦૭
વિશ્વાસાં ત્વા વિશાં પતિં હવામહે સર્વાસાં સમાનં દમ્પતિં ભુજે સત્યગિર્વાહસં ભુજે ।
અતિથિં માનુષાણાં પિતુર્ન યસ્યાસયા ।
અમી ચ વિશ્વે અમૃતાસ આ વયો હવ્યા દેવેષ્વા વયઃ ॥ ૧.૧૨૭.૦૮
ત્વમગ્ને સહસા સહન્તમઃ શુષ્મિન્તમો જાયસે દેવતાતયે રયિર્ન દેવતાતયે ।
શુષ્મિન્તમો હિ તે મદો દ્યુમ્નિન્તમ ઉત ક્રતુઃ ।
અધ સ્મા તે પરિ ચરન્ત્યજર શ્રુષ્ટીવાનો નાજર ॥ ૧.૧૨૭.૦૯
પ્ર વો મહે સહસા સહસ્વત ઉષર્બુધે પશુષે નાગ્નયે સ્તોમો બભૂત્વગ્નયે ।
પ્રતિ યદીં હવિષ્માન્વિશ્વાસુ ક્ષાસુ જોગુવે ।
અગ્રે રેભો ન જરત ઋષૂણાં જૂર્ણિર્હોત ઋષૂણામ્ ॥ ૧.૧૨૭.૧૦
સ નો નેદિષ્ઠં દદૃશાન આ ભરાગ્ને દેવેભિઃ સચનાઃ સુચેતુના મહો રાયઃ સુચેતુના ।
મહિ શવિષ્ઠ નસ્કૃધિ સંચક્ષે ભુજે અસ્યૈ ।
મહિ સ્તોતૃભ્યો મઘવન્સુવીર્યં મથીરુગ્રો ન શવસા ॥ ૧.૧૨૭.૧૧
અયં જાયત મનુષો ધરીમણિ હોતા યજિષ્ઠ ઉશિજામનુ વ્રતમગ્નિઃ સ્વમનુ વ્રતમ્ ।
વિશ્વશ્રુષ્ટિઃ સખીયતે રયિરિવ શ્રવસ્યતે ।
અદબ્ધો હોતા નિ ષદદિળસ્પદે પરિવીત ઇળસ્પદે ॥ ૧.૧૨૮.૦૧
તં યજ્ઞસાધમપિ વાતયામસ્યૃતસ્ય પથા નમસા હવિષ્મતા દેવતાતા હવિષ્મતા ।
સ ન ઊર્જામુપાભૃત્યયા કૃપા ન જૂર્યતિ ।
યં માતરિશ્વા મનવે પરાવતો દેવં ભાઃ પરાવતઃ ॥ ૧.૧૨૮.૦૨
એવેન સદ્યઃ પર્યેતિ પાર્થિવં મુહુર્ગી રેતો વૃષભઃ કનિક્રદદ્દધદ્રેતઃ કનિક્રદત્ ।
શતં ચક્ષાણો અક્ષભિર્દેવો વનેષુ તુર્વણિઃ ।

સદો દધાન ઉપરેષુ સાનુષ્વગ્નિઃ પરેષુ સાનુષુ ॥ ૧.૧૨૮.૦૩
સ સુક્રતુઃ પુરોહિતો દમેદમેઽગ્નિર્યજ્ઞસ્યાધ્વરસ્ય ચેતતિ ક્રત્વા યજ્ઞસ્ય ચેતતિ ।
ક્રત્વા વેધા ઇષૂયતે વિશ્વા જાતાનિ પસ્પશે ।
યતો ઘૃતશ્રીરતિથિરજાયત વહ્નિર્વેધા અજાયત ॥ ૧.૧૨૮.૦૪
ક્રત્વા યદસ્ય તવિષીષુ પૃઞ્ચતેઽગ્નેરવેણ મરુતાં ન ભોજ્યેષિરાય ન ભોજ્યા ।
સ હિ ષ્મા દાનમિન્વતિ વસૂનાં ચ મજ્મના ।
સ નસ્ત્રાસતે દુરિતાદભિહ્રુતઃ શંસાદઘાદભિહ્રુતઃ ॥ ૧.૧૨૮.૦૫
વિશ્વો વિહાયા અરતિર્વસુર્દધે હસ્તે દક્ષિણે તરણિર્ન શિશ્રથચ્છ્રવસ્યયા ન શિશ્રથત્ ।
વિશ્વસ્મા ઇદિષુધ્યતે દેવત્રા હવ્યમોહિષે ।
વિશ્વસ્મા ઇત્સુકૃતે વારમૃણ્વત્યગ્નિર્દ્વારા વ્યૃણ્વતિ ॥ ૧.૧૨૮.૦૬
સ માનુષે વૃજને શંતમો હિતોઽગ્નિર્યજ્ઞેષુ જેન્યો ન વિશ્પતિઃ પ્રિયો યજ્ઞેષુ વિશ્પતિઃ ।
સ હવ્યા માનુષાણામિળા કૃતાનિ પત્યતે ।
સ નસ્ત્રાસતે વરુણસ્ય ધૂર્તેર્મહો દેવસ્ય ધૂર્તેઃ ॥ ૧.૧૨૮.૦૭
અગ્નિં હોતારમીળતે વસુધિતિં પ્રિયં ચેતિષ્ઠમરતિં ન્યેરિરે હવ્યવાહં ન્યેરિરે ।
વિશ્વાયું વિશ્વવેદસં હોતારં યજતં કવિમ્ ।
દેવાસો રણ્વમવસે વસૂયવો ગીર્ભી રણ્વં વસૂયવઃ ॥ ૧.૧૨૮.૦૮
યં ત્વં રથમિન્દ્ર મેધસાતયેઽપાકા સન્તમિષિર પ્રણયસિ પ્રાનવદ્ય નયસિ ।
સદ્યશ્ચિત્તમભિષ્ટયે કરો વશશ્ચ વાજિનમ્ ।
સાસ્માકમનવદ્ય તૂતુજાન વેધસામિમાં વાચં ન વેધસામ્ ॥ ૧.૧૨૯.૦૧
સ શ્રુધિ યઃ સ્મા પૃતનાસુ કાસુ ચિદ્દક્ષાય્ય ઇન્દ્ર ભરહૂતયે નૃભિરસિ પ્રતૂર્તયે નૃભિઃ ।
યઃ શૂરૈઃ સ્વ૧ઃ સનિતા યો વિપ્રૈર્વાજં તરુતા ।
તમીશાનાસ ઇરધન્ત વાજિનં પૃક્ષમત્યં ન વાજિનમ્ ॥ ૧.૧૨૯.૦૨
દસ્મો હિ ષ્મા વૃષણં પિન્વસિ ત્વચં કં ચિદ્યાવીરરરું શૂર મર્ત્યં પરિવૃણક્ષિ મર્ત્યમ્ ।
ઇન્દ્રોત તુભ્યં તદ્દિવે તદ્રુદ્રાય સ્વયશસે ।
મિત્રાય વોચં વરુણાય સપ્રથઃ સુમૃળીકાય સપ્રથઃ ॥ ૧.૧૨૯.૦૩
અસ્માકં વ ઇન્દ્રમુશ્મસીષ્ટયે સખાયં વિશ્વાયું પ્રાસહં યુજં વાજેષુ પ્રાસહં યુજમ્ ।
અસ્માકં બ્રહ્મોતયેઽવા પૃત્સુષુ કાસુ ચિત્ ।

નહિ ત્વા શત્રુઃ સ્તરતે સ્તૃણોષિ યં વિશ્વં શત્રું સ્તૃણોષિ યમ્ ॥ ૧.૧૨૯.૦૪

નિ ષૂ નમાતિમતિં કયસ્ય ચિત્તેજિષ્ઠાભિરરણિભિર્નોતિભિરુગ્રાભિરુગ્રોતિભિઃ ।

નેષિ ણો યથા પુરાનેનાઃ શૂર મન્યસે ।

વિશ્વાનિ પૂરોરપ પર્ષિ વહ્નિરાસા વહ્નિર્નો અચ્છ ॥ ૧.૧૨૯.૦૫

પ્ર તદ્વોચેયં ભવ્યાયેન્દવે હવ્યો ન ય ઇષવાન્મન્મ રેજતિ રક્ષોહા મન્મ રેજતિ ।

સ્વયં સો અસ્મદા નિદો વધૈરજેત દુર્મતિમ્ ।

અવ સ્રવેદઘશંસોઽવતરમવ ક્ષુદ્રમિવ સ્રવેત્ ॥ ૧.૧૨૯.૦૬

વનેમ તદ્ધોત્રયા ચિતન્ત્યા વનેમ રયિં રયિવઃ સુવીર્યં રણ્વં સન્તં સુવીર્યમ્ ।

દુર્મન્માનં સુમન્તુભિરેમિષા પૃચીમહિ ।

આ સત્યાભિરિન્દ્રં દ્યુમ્નહૂતિભિર્યજત્રં દ્યુમ્નહૂતિભિઃ ॥ ૧.૧૨૯.૦૭

પ્રપ્રા વો અસ્મે સ્વયશોભિરૂતી પરિવર્ગ ઇન્દ્રો દુર્મતીનાં દરીમન્દુર્મતીનામ્ ।

સ્વયં સા રિષયધ્યૈ યા ન ઉપેષે અત્રૈઃ ।

હતેમસન્ન વક્ષતિ ક્ષિપ્તા જૂર્ણિર્ન વક્ષતિ ॥ ૧.૧૨૯.૦૮

ત્વં ન ઇન્દ્ર રાયા પરીણસા યાહિ પથઁ અનેહસા પુરો યાહ્યરક્ષસા ।

સચસ્વ નઃ પરાક આ સચસ્વાસ્તમીક આ ।

પાહિ નો દૂરાદારાદભિષ્ટિભિઃ સદા પાહ્યભિષ્ટિભિઃ ॥ ૧.૧૨૯.૦૯

ત્વં ન ઇન્દ્ર રાયા તરૂષસોગ્રં ચિત્ત્વા મહિમા સક્ષદવસે મહે મિત્રં નાવસે ।

ઓજિષ્ઠ ત્રાતરવિતા રથં કં ચિદમર્ત્ય ।

અન્યમસ્મદ્રિરિષેઃ કં ચિદદ્રિવો રિરિક્ષન્તં ચિદદ્રિવઃ ॥ ૧.૧૨૯.૧૦

પાહિ ન ઇન્દ્ર સુષ્ટુત સ્રિધોઽવયાતા સદમિદ્દુર્મતીનાં દેવઃ સન્દુર્મતીનામ્ ।

હન્તા પાપસ્ય રક્ષસસ્ત્રાતા વિપ્રસ્ય માવતઃ ।

અધા હિ ત્વા જનિતા જીજનદ્વસો રક્ષોહણં ત્વા જીજનદ્વસો ॥ ૧.૧૨૯.૧૧

એન્દ્ર યાહ્યુપ નઃ પરાવતો નાયમચ્છા વિદથાનીવ સત્પતિરસ્તં રાજેવ સત્પતિઃ ।

હવામહે ત્વા વયં પ્રયસ્વન્તઃ સુતે સચા ।

પુત્રાસો ન પિતરં વાજસાતયે મંહિષ્ઠં વાજસાતયે ॥ ૧.૧૩૦.૦૧

પિબા સોમમિન્દ્ર સુવાનમદ્રિભિઃ કોશેન સિક્તમવતં ન વંસગસ્તાતૃષાણો ન વંસગઃ ।

મદાય હર્યતાય તે તુવિષ્ટમાય ધાયસે ।

આ ત્વા યચ્છન્તુ હરિતો ન સૂર્યમહા વિશ્વેવ સૂર્યમ્ ॥ ૧.૧૩૦.૦૨
અવિન્દદ્દિવો નિહિતં ગુહા નિધિં વેર્ન ગર્ભં પરિવીતમશ્મન્યનન્તે અન્તરશ્મનિ ।
વ્રજં વજ્રી ગવામિવ સિષાસન્નઙ્ગિરસ્તમઃ ।
અપાવૃણોદિષ ઇન્દ્રઃ પરીવૃતા દ્વાર ઇષઃ પરીવૃતાઃ ॥ ૧.૧૩૦.૦૩
દાદૃહાણો વજ્રમિન્દ્રો ગભસ્ત્યોઃ ક્ષદ્મેવ તિગ્મમસનાય સં શ્યદહિહત્યાય સં શ્યત્ ।
સંવિવ્યાન ઓજસા શવોભિરિન્દ્ર મજ્મના ।
તષ્ટેવ વૃક્ષં વનિનો નિ વૃશ્ચસિ પરશ્વેવ નિ વૃશ્ચસિ ॥ ૧.૧૩૦.૦૪
ત્વં વૃથા નદ્ય ઇન્દ્ર સર્તવેઽચ્છા સમુદ્રમસૃજો રથાઁ ઇવ વાજયતો રથાઁ ઇવ ।
ઇત ઊતીરયુઞ્જત સમાનમર્થમક્ષિતમ્ ।
ધેનૂરિવ મનવે વિશ્વદોહસો જનાય વિશ્વદોહસઃ ॥ ૧.૧૩૦.૦૫
ઇમાં તે વાચં વસૂયન્ત આયવો રથં ન ધીરઃ સ્વપા અતક્ષિષુઃ સુમ્નાય ત્વામતક્ષિષુઃ ।
શુમ્ભન્તો જેન્યં યથા વાજેષુ વિપ્ર વાજિનમ્ ।
અત્યમિવ શવસે સાતયે ધના વિશ્વા ધનાનિ સાતયે ॥ ૧.૧૩૦.૦૬
ભિનત્પુરો નવતિમિન્દ્ર પૂરવે દિવોદાસાય મહિ દાશુષે નૃતો વજ્રેણ દાશુષે નૃતો ।
અતિથિગ્વાય શમ્બરં ગિરેરુગ્રો અવાભરત્ ।
મહો ધનાનિ દયમાન ઓજસા વિશ્વા ધનાન્યોજસા ॥ ૧.૧૩૦.૦૭
ઇન્દ્રઃ સમત્સુ યજમાનમાર્યં પ્રાવદ્વિશ્વેષુ શતમૂતિરાજિષુ સ્વર્મીળ્હેષ્વાજિષુ ।
મનવે શાસદવ્રતાન્ત્વચં કૃષ્ણામરન્ધયત્ ।
દક્ષન્ન વિશ્વં તતૃષાણમોષતિ ન્યર્શસાનમોષતિ ॥ ૧.૧૩૦.૦૮
સૂરશ્ચક્રં પ્ર વૃહજ્જાત ઓજસા પ્રપિત્વે વાચમરુણો મુષાયતીશાન આ મુષાયતિ ।
ઉશના યત્પરાવતોઽજગન્નૂતયે કવે ।
સુમ્નાનિ વિશ્વા મનુષેવ તુર્વણિરહા વિશ્વેવ તુર્વણિઃ ॥ ૧.૧૩૦.૦૯
સ નો નવ્યેભિર્વૃષકર્મન્નુક્થૈઃ પુરાં દર્તઃ પાયુભિઃ પાહિ શગ્મૈઃ ।
દિવોદાસેભિરિન્દ્ર સ્તવાનો વાવૃધીથા અહોભિરિવ દ્યૌઃ ॥ ૧.૧૩૦.૧૦
ઇન્દ્રાય હિ દ્યૌરસુરો અનમ્નતેન્દ્રાય મહી પૃથિવી વરીમભિર્દ્યુમ્નસાતા વરીમભિઃ ।
ઇન્દ્રં વિશ્વે સજોષસો દેવાસો દધિરે પુરઃ ।
ઇન્દ્રાય વિશ્વા સવનાનિ માનુષા રાતાનિ સન્તુ માનુષા ॥ ૧.૧૩૧.૦૧

વિશ્વેષુ હિ ત્વા સવનેષુ તુઞ્જતે સમાનમેકં વૃષમણ્યવઃ પૃથક્સ્વઃ સનિષ્યવઃ પૃથક્ ।
તં ત્વા નાવં ન પર્ષણિં શૂષસ્ય ધુરિ ધીમહિ ।
ઇન્દ્રં ન યજ્ઞૈશ્ચિતયન્ત આયવઃ સ્તોમેભિરિન્દ્રમાયવઃ ॥ ૧.૧૩૧.૦૨
વિ ત્વા તતસ્રે મિથુના અવસ્યવો વ્રજસ્ય સાતા ગવ્યસ્ય નિઃસૃજઃ સક્ષન્ત ઇન્દ્ર નિઃસૃજઃ ।
યદ્ગવ્યન્તા દ્વા જના સ્વર્યન્તા સમૂહસિ ।
આવિષ્કરિક્રદ્વૃષણં સચાભુવં વજ્રમિન્દ્ર સચાભુવમ્ ॥ ૧.૧૩૧.૦૩
વિદુષ્ટે અસ્ય વીર્યસ્ય પૂરવઃ પુરો યદિન્દ્ર શારદીરવાતિરઃ સાસહાનો અવાતિરઃ ।
શાસસ્તમિન્દ્ર મર્ત્યમયજ્યું શવસસ્પતે ।
મહીમમુષ્ણાઃ પૃથિવીમિમા અપો મન્દસાન ઇમા અપઃ ॥ ૧.૧૩૧.૦૪
આદિત્તે અસ્ય વીર્યસ્ય ચર્કિરન્મદેષુ વૃષન્નુશિજો યદાવિથ સખીયતો યદાવિથ ।
ચકર્થ કારમેભ્યઃ પૃતનાસુ પ્રવન્તવે ।
તે અન્યામન્યાં નદ્યં સનિષ્ણત શ્રવસ્યન્તઃ સનિષ્ણત ॥ ૧.૧૩૧.૦૫
ઉતો નો અસ્યા ઉષસો જુષેત હ્યર્કસ્ય બોધિ હવિષો હવીમભિઃ સ્વર્ષાતા હવીમભિઃ ।
યદિન્દ્ર હન્તવે મૃધો વૃષા વજ્રિઞ્ચિકેતસિ ।
આ મે અસ્ય વેધસો નવીયસો મન્મ શ્રુધિ નવીયસઃ ॥ ૧.૧૩૧.૦૬
ત્વં તમિન્દ્ર વાવૃધાનો અસ્મયુરમિત્રયન્તં તુવિજાત મર્ત્યં વજ્રેણ શૂર મર્ત્યમ્ ।
જહિ યો નો અઘાયતિ શ◌ૃણુષ્વ સુશ્રવસ્તમઃ ।
રિષ્ટં ન યામન્નપ ભૂતુ દુર્મતિર્વિશ્વાપ ભૂતુ દુર્મતિઃ ॥ ૧.૧૩૧.૦૭
ત્વયા વયં મઘવન્પૂર્વ્યે ધન ઇન્દ્રત્વોતાઃ સાસહ્યામ પૃતન્યતો વનુયામ વનુષ્યતઃ ।
નેદિષ્ઠે અસ્મિન્નહન્યધિ વોચા નુ સુન્વતે ।
અસ્મિન્યજ્ઞે વિ ચયેમા ભરે કૃતં વાજયન્તો ભરે કૃતમ્ ॥ ૧.૧૩૨.૦૧
સ્વર્જેષે ભર આપ્રસ્ય વક્મન્યુષર્બુધઃ સ્વસ્મિન્નઞ્જસિ ક્રાણસ્ય સ્વસ્મિન્નઞ્જસિ ।
અહન્નિન્દ્રો યથા વિદે શીર્ષ્ણાશીર્ષ્ણોપવાચ્યઃ ।
અસ્મત્રા તે સધ્ર્યક્સન્તુ રાતયો ભદ્રા ભદ્રસ્ય રાતયઃ ॥ ૧.૧૩૨.૦૨
તત્તુ પ્રયઃ પ્રત્નથા તે શુશુક્વનં યસ્મિન્યજ્ઞે વારમકૃણ્વત ક્ષયમૃતસ્ય વારસિ ક્ષયમ્ ।
વિ તદ્વોચેરધ દ્વિતાન્તઃ પશ્યન્તિ રશ્મિભિઃ ।
સ ઘા વિદે અન્વિન્દ્રો ગવેષણો બન્ધુક્ષિદ્ભ્યો ગવેષણઃ ॥ ૧.૧૩૨.૦૩

નૂ ઇત્થા તે પૂર્વથા ચ પ્રવાચ્યં યદઙ્ગિરોભ્યોઽવૃણોરપ વ્રજમિન્દ્ર શિક્ષન્નપ વ્રજમ્ ।
ઐભ્યઃ સમાન્યા દિશાસ્મભ્યં જેષિ યોત્સિ ચ ।
સુન્વદ્ભ્યો રન્ધયા કં ચિદવ્રતં હૃણાયન્તં ચિદવ્રતમ્ ॥ ૧.૧૩૨.૦૪
સં યજ્જનાન્ક્રતુભિઃ શૂર ઈક્ષયદ્ધને હિતે તરુષન્ત શ્રવસ્યવઃ પ્ર યક્ષન્ત શ્રવસ્યવઃ ।
તસ્મા આયુઃ પ્રજાવદિદ્બાધે અર્ચન્ત્યોજસા ।
ઇન્દ્ર ઓક્યં દિધિષન્ત ધીતયો દેવાઁ અચ્છા ન ધીતયઃ ॥ ૧.૧૩૨.૦૫
યુવં તમિન્દ્રાપર્વતા પુરોયુધા યો નઃ પૃતન્યાદપ તંતમિદ્ધતં વજ્રેણ તંતમિદ્ધતમ્ ।
દૂરે ચત્તાય ચ્છન્ત્સદ્ગહનં યદિનક્ષત્ ।
અસ્માકં શત્રૂન્પરિ શૂર વિશ્વતો દર્મા દર્ષીષ્ટ વિશ્વતઃ ॥ ૧.૧૩૨.૦૬

ઉભે પુનામિ રોદસી ઋતેન દ્રુહો દહામિ સં મહીરનિન્દ્રાઃ ।
અભિવ્લગ્ય યત્ર હતા અમિત્રા વૈલસ્થાનં પરિ તૃળ્હા અશેરન્ ॥ ૧.૧૩૩.૦૧
અભિવ્લગ્યા ચિદદ્રિવઃ શીર્ષા યાતુમતીનામ્ ।
છિન્ધિ વટૂરિણા પદા મહાવટૂરિણા પદા ॥ ૧.૧૩૩.૦૨
અવાસાં મઘવઞ્જહિ શર્ધો યાતુમતીનામ્ ।
વૈલસ્થાનકે અર્મકે મહાવૈલસ્થે અર્મકે ॥ ૧.૧૩૩.૦૩
યાસાં તિસ્રઃ પઞ્ચાશતોઽભિવ્લઙ્ગૈરપાવપઃ ।
તત્સુ તે મનાયતિ તકત્સુ તે મનાયતિ ॥ ૧.૧૩૩.૦૪
પિશઙ્ગભૃષ્ટિમમ્ભૃણં પિશાચિમિન્દ્ર સં મૃણ ।
સર્વં રક્ષો નિ બર્હય ॥ ૧.૧૩૩.૦૫
અવર્મહ ઇન્દ્ર દાદૃહિ શ્રુધી નઃ શુશોચ હિ દ્યૌઃ ક્ષા ન ભીષાઁ અદ્રિવો ઘૃણાન્ન ભીષાઁ અદ્રિવઃ ।
શુષ્મિન્તમો હિ શુષ્મિભિર્વધૈરુગ્રેભિરીયસે ।
અપૂરુષઘ્નો અપ્રતીત શૂર સત્વભિસ્ત્રિસપ્તૈઃ શૂર સત્વભિઃ ॥ ૧.૧૩૩.૦૬
વનોતિ હિ સુન્વન્ક્ષયં પરીણસઃ સુન્વાનો હિ ષ્મા યજત્યવ દ્વિષો દેવાનામવ દ્વિષઃ ।
સુન્વાન ઇત્સિષાસતિ સહસ્રા વાજ્યવૃતઃ ।
સુન્વાનાયેન્દ્રો દદાત્યાભુવં રયિં દદાત્યાભુવમ્ ॥ ૧.૧૩૩.૦૭

આ ત્વા જુવો રારહાણા અભિ પ્રયો વાયો વહન્ત્વિહ પૂર્વપીતયે સોમસ્ય પૂર્વપીતયે ।
ઊર્ધ્વા તે અનુ સૂનૃતા મનસ્તિષ્ઠતુ જાનતી ।

નિયુત્વતા રથેના યાહિ દાવને વાયો મખસ્ય દાવને ॥ ૧.૧૩૪.૦૧
મન્દન્તુ ત્વા મન્દિનો વાયવિન્દવોઽસ્મત્ક્રાણાસઃ સુકૃતા અભિદ્યવો ગોભિઃ ક્રાણા અભિદ્યવઃ ।
યદ્ધ ક્રાણા ઇરધ્યૈ દક્ષં સચન્ત ઊતયઃ ।
સધ્રીચીના નિયુતો દાવને ધિય ઉપ બ્રુવત ઈં ધિયઃ ॥ ૧.૧૩૪.૦૨
વાયુર્યુઙ્ક્તે રોહિતા વાયુરરુણા વાયૂ રથે અજિરા ધુરિ વોળ્હવે વહિષ્ઠા ધુરિ વોળ્હવે ।
પ્ર બોધયા પુરંધિં જાર આ સસતીમિવ ।
પ્ર ચક્ષય રોદસી વાસયોષસઃ શ્રવસે વાસયોષસઃ ॥ ૧.૧૩૪.૦૩
તુભ્યમુષાસઃ શુચયઃ પરાવતિ ભદ્રા વસ્ત્રા તન્વતે દંસુ રશ્મિષુ ચિત્રા નવ્યેષુ રશ્મિષુ ।
તુભ્યં ધેનુઃ સબર્દુઘા વિશ્વા વસૂનિ દોહતે ।
અજનયો મરુતો વક્ષણાભ્યો દિવ આ વક્ષણાભ્યઃ ॥ ૧.૧૩૪.૦૪
તુભ્યં શુક્રાસઃ શુચયસ્તુરણ્યવો મદેષૂગ્રા ઇષણન્ત ભુર્વણ્યપામિષન્ત ભુર્વણિ ।
ત્વાં ત્સારી દસમાનો ભગમીટ્ટે તક્વવીયે ।
ત્વં વિશ્વસ્માદ્ભુવનાત્પાસિ ધર્મણાસુર્યાત્પાસિ ધર્મણા ॥ ૧.૧૩૪.૦૫
ત્વં નો વાયવેષામપૂર્વ્યઃ સોમાનાં પ્રથમઃ પીતિમર્હસિ સુતાનાં પીતિમર્હસિ ।
ઉતો વિહુત્મતીનાં વિશાં વવર્જુષીણામ્ ।
વિશ્વા ઇત્તે ધેનવો દુહ્ર આશિરં ઘૃતં દુહ્રત આશિરમ્ ॥ ૧.૧૩૪.૦૬
સ્તીર્ણં બર્હિરુપ નો યાહિ વીતયે સહસ્રેણ નિયુતા નિયુત્વતે શતિનીભિર્નિયુત્વતે ।
તુભ્યં હિ પૂર્વપીતયે દેવા દેવાય યેમિરે ।
પ્ર તે સુતાસો મધુમન્તો અસ્થિરન્મદાય ક્રત્વે અસ્થિરન્ ॥ ૧.૧૩૫.૦૧
તુભ્યાયં સોમઃ પરિપૂતો અદ્રિભિઃ સ્પાર્હા વસાનઃ પરિ કોશમર્ષતિ શુક્રા વસાનો અર્ષતિ ।
તવાયં ભાગ આયુષુ સોમો દેવેષુ હૂયતે ।
વહ વાયો નિયુતો યાહ્યસ્મયુર્જુષાણો યાહ્યસ્મયુઃ ॥ ૧.૧૩૫.૦૨
આ નો નિયુદ્ભિઃ શતિનીભિરધ્વરં સહસ્રિણીભિરુપ યાહિ વીતયે વાયો હવ્યાનિ વીતયે ।
તવાયં ભાગ ઋત્વિયઃ સરશ્મિઃ સૂર્યે સચા ।
અધ્વર્યુભિર્ભરમાણા અયંસત વાયો શુક્રા અયંસત ॥ ૧.૧૩૫.૦૩
આ વાં રથો નિયુત્વાન્વક્ષદવસેઽભિ પ્રયાંસિ સુધિતાનિ વીતયે વાયો હવ્યાનિ વીતયે ।
પિબતં મધ્વો અન્ધસઃ પૂર્વપેયં હિ વાં હિતમ્ ।

વાયવા ચન્દ્રેણ રાધસા ગતમિન્દ્રશ્ચ રાધસા ગતમ્ ॥ ૧.૧૩૫.૦૪
આ વાં ધિયો વવૃત્યુરધ્વરાઁ ઉપેમમિન્દું મર્મૃજન્ત વાજિનમાશુમત્યં ન વાજિનમ્ ।
તેષાં પિબતમસ્મયૂ આ નો ગન્તમિહોત્યા ।
ઇન્દ્રવાયૂ સુતાનામદ્રિભિર્યુવં મદાય વાજદા યુવમ્ ॥ ૧.૧૩૫.૦૫
ઇમે વાં સોમા અપ્સ્વા સુતા ઇહાધ્વર્યુભિર્ભરમાણા અયંસત વાયો શુક્રા અયંસત ।
એતે વામભ્યસૃક્ષત તિરઃ પવિત્રમાશવઃ ।
યુવાયવોઽતિ રોમાણ્યવ્યયા સોમાસો અત્યવ્યયા ॥ ૧.૧૩૫.૦૬
અતિ વાયો સસતો યાહિ શશ્વતો યત્ર ગ્રાવા વદતિ તત્ર ગચ્છતં ગૃહમિન્દ્રશ્ચ ગચ્છતમ્ ।
વિ સૂનૃતા દદૃશે રીયતે ઘૃતમા પૂર્ણયા નિયુતા યાથો અધ્વરમિન્દ્રશ્ચ યાથો અધ્વરમ્ ॥ ૧.૧૩૫.૦૭
અત્રાહ તદ્વહેથે મધ્વ આહુતિં યમશ્વત્થમુપતિષ્ઠન્ત જાયવોઽસ્મે તે સન્તુ જાયવઃ ।
સાકં ગાવઃ સુવતે પચ્યતે યવો ન તે વાય ઉપ દસ્યન્તિ ધેનવો નાપ દસ્યન્તિ ધેનવઃ ॥ ૧.૧૩૫.૦૮
ઇમે યે તે સુ વાયો બાહ્વોજસોઽન્તર્નદી તે પતયન્ત્યુક્ષણો મહિ વ્રાધન્ત ઉક્ષણઃ ।
ધન્વઞ્ચિદ્યે અનાશવો જીરાશ્ચિદગિરૌકસઃ ।
સૂર્યસ્યેવ રશ્મયો દુર્નિયન્તવો હસ્તયોર્દુર્નિયન્તવઃ ॥ ૧.૧૩૫.૦૯
પ્ર સુ જ્યેષ્ઠં નિચિરાભ્યાં બૃહન્નમો હવ્યં મતિં ભરતા મૃળયદ્ભ્યાં સ્વાદિષ્ઠં મૃળયદ્ભ્યામ્ ।
તા સમ્રાજા ઘૃતાસુતી યજ્ઞેયજ્ઞ ઉપસ્તુતા ।
અથૈનોઃ ક્ષત્રં ન કુતશ્ચનાધૃષે દેવત્વં નૂ ચિદાધૃષે ॥ ૧.૧૩૬.૦૧
અદર્શિ ગાતુરુરવે વરીયસી પન્થા ઋતસ્ય સમયંસ્ત રશ્મિભિશ્ચક્ષુર્ભગસ્ય રશ્મિભિઃ ।
દ્યુક્ષં મિત્રસ્ય સાદનમર્યમ્ણો વરુણસ્ય ચ ।
અથા દધાતે બૃહદુક્થ્યં૧ વય ઉપસ્તુત્યં બૃહદ્વયઃ ॥ ૧.૧૩૬.૦૨
જ્યોતિષ્મતીમદિતિં ધારયત્ક્ષિતિં સ્વર્વતીમા સચેતે દિવેદિવે જાગૃવાંસા દિવેદિવે ।
જ્યોતિષ્મત્ક્ષત્રમાશાતે આદિત્યા દાનુનસ્પતી ।
મિત્રસ્તયોર્વરુણો યાતયજ્જનોઽર્યમા યાતયજ્જનઃ ॥ ૧.૧૩૬.૦૩
અયં મિત્રાય વરુણાય શંતમઃ સોમો ભૂત્વવપાનેષ્વાભગો દેવો દેવેષ્વાભગઃ ।
તં દેવાસો જુષેરત વિશ્વે અદ્ય સજોષસઃ ।
તથા રાજાના કરથો યદીમહ ઋતાવાના યદીમહે ॥ ૧.૧૩૬.૦૪
યો મિત્રાય વરુણાયાવિધજ્જનોઽનર્વાણં તં પરિ પાતો અંહસો દાશ્વાંસં મર્તમંહસઃ ।

તમર્યમાભિ રક્ષત્યૃજૂયન્તમનુ વ્રતમ્ ।

ઉક્થૈર્ય એનોઃ પરિભૂષતિ વ્રતં સ્તોમૈરાભૂષતિ વ્રતમ્ ॥ ૧.૧૩૬.૦૫

નમો દિવે બૃહતે રોદસીભ્યાં મિત્રાય વોચં વરુણાય મીળ્હુષે સુમૃળીકાય મીળ્હુષે ।

ઇન્દ્રમગ્નિમુપ સ્તુહિ દ્યુક્ષમર્યમણં ભગમ્ ।

જ્યોગ્જીવન્તઃ પ્રજયા સચેમહિ સોમસ્યોતી સચેમહિ ॥ ૧.૧૩૬.૦૬

ઊતી દેવાનાં વયમિન્દ્રવન્તો મંસીમહિ સ્વયશસો મરુદ્ભિઃ ।

અગ્નિર્મિત્રો વરુણઃ શર્મ યંસન્તદશ્યામ મઘવાનો વયં ચ ॥ ૧.૧૩૬.૦૭

સુષુમા યાતમદ્રિભિર્ગોશ્રીતા મત્સરા ઇમે સોમાસો મત્સરા ઇમે ।

આ રાજાના દિવિસ્પૃશાસ્મત્રા ગન્તમુપ નઃ ।

ઇમે વાં મિત્રાવરુણા ગવાશિરઃ સોમાઃ શુક્રા ગવાશિરઃ ॥ ૧.૧૩૭.૦૧

ઇમ આ યાતમિન્દવઃ સોમાસો દધ્યાશિરઃ સુતાસો દધ્યાશિરઃ ।

ઉત વામુષસો બુધિ સાકં સૂર્યસ્ય રશ્મિભિઃ ।

સુતો મિત્રાય વરુણાય પીતયે ચારુરૃતાય પીતયે ॥ ૧.૧૩૭.૦૨

તાં વાં ધેનું ન વાસરીમંશું દુહન્ત્યદ્રિભિઃ સોમં દુહન્ત્યદ્રિભિઃ ।

અસ્મત્રા ગન્તમુપ નોઽર્વાઞ્ચા સોમપીતયે ।

અયં વાં મિત્રાવરુણા નૃભિઃ સુતઃ સોમ આ પીતયે સુતઃ ॥ ૧.૧૩૭.૦૩

પ્રપ્ર પૂષ્ણસ્તુવિજાતસ્ય શસ્યતે મહિત્વમસ્ય તવસો ન તન્દતે સ્તોત્રમસ્ય ન તન્દતે ।

અર્ચામિ સુમ્નયન્નહમન્ત્યૂતિં મયોભુવમ્ ।

વિશ્વસ્ય યો મન આયુયુવે મખો દેવ આયુયુવે મખઃ ॥ ૧.૧૩૮.૦૧

પ્ર હિ ત્વા પૂષન્નજિરં ન યામનિ સ્તોમેભિઃ કૃણ્વ ઋણવો યથા મૃધ ઉષ્ટ્રો ન પીપરો મૃધઃ ।

હુવે યત્ત્વા મયોભુવં દેવં સખ્યાય મર્ત્યઃ ।

અસ્માકમાઙ્ગૂષાન્દ્યુમ્નિનસ્કૃધિ વાજેષુ દ્યુમ્નિનસ્કૃધિ ॥ ૧.૧૩૮.૦૨

યસ્ય તે પૂષન્સખ્યે વિપન્યવઃ ક્રત્વા ચિત્સન્તોઽવસા બુભુજ્રિર ઇતિ ક્રત્વા બુભુજ્રિરે ।

તામનુ ત્વા નવીયસીં નિયુતં રાય ઈમહે ।

અહેળમાન ઉરુશંસ સરી ભવ વાજેવાજે સરી ભવ ॥ ૧.૧૩૮.૦૩

અસ્યા ઊ ષુ ણ ઉપ સાતયે ભુવોઽહેળમાનો રરિવાઁ અજાશ્વ શ્રવસ્યતામજાશ્વ ।

ઓ ષુ ત્વા વવૃતીમહિ સ્તોમેભિર્દસ્મ સાધુભિઃ ।

નહિ ત્વા પૂષન્નતિમન્ય આઘૃણે ન તે સખ્યમપહ્નુવે ॥ ૧.૧૩૮.૦૪

અસ્તુ શ્રૌષટ્ પુરો અગ્નિં ધિયા દધ આ નુ તચ્છર્ધો દિવ્યં વૃણીમહ ઇન્દ્રવાયૂ વૃણીમહે ।
યદ્ધ ક્રાણા વિવસ્વતિ નાભા સંદાયિ નવ્યસી ।
અધ પ્ર સૂ ન ઉપ યન્તુ ધીતયો દેવાઁ અચ્છા ન ધીતયઃ ॥ ૧.૧૩૯.૦૧

યદ્ધ ત્યન્મિત્રાવરુણાવૃતાદધ્યાદદાથે અનૃતં સ્વેન મન્યુના દક્ષસ્ય સ્વેન મન્યુના ।
યુવોરિત્થાધિ સદ્મસ્વપશ્યામ હિરણ્યયમ્ ।
ધીભિશ્ચન મનસા સ્વેભિરક્ષભિઃ સોમસ્ય સ્વેભિરક્ષભિઃ ॥ ૧.૧૩૯.૦૨

યુવાં સ્તોમેભિર્દેવયન્તો અશ્વિનાશ્રાવયન્ત ઇવ શ્લોકમાયવો યુવાં હવ્યાભ્યા૩યવઃ ।
યુવોર્વિશ્વા અધિ શ્રિયઃ પૃક્ષશ્ચ વિશ્વવેદસા ।
પ્રુષાયન્તે વાં પવયો હિરણ્યયે રથે દસ્રા હિરણ્યયે ॥ ૧.૧૩૯.૦૩

અચેતિ દસ્રા વ્યુ૧ નાકમૃણ્વથો યુઞ્જતે વાં રથયુજો દિવિષ્ટિષ્વધ્વસ્માનો દિવિષ્ટિષુ ।
અધિ વાં સ્થામ વન્ધુરે રથે દસ્રા હિરણ્યયે ।
પથેવ યન્તાવનુશાસતા રજોઽઞ્જસા શાસતા રજઃ ॥ ૧.૧૩૯.૦૪

શચીભિર્નઃ શચીવસૂ દિવા નક્તં દશસ્યતમ્ ।
મા વાં રાતિરુપ દસત્કદા ચનાસ્મદ્રાતિઃ કદા ચન ॥ ૧.૧૩૯.૦૫

વૃષન્નિન્દ્ર વૃષપાણાસ ઇન્દવ ઇમે સુતા અદ્રિષુતાસ ઉદ્‌ભિદસ્તુભ્યં સુતાસ ઉદ્‌ભિદઃ ।
તે ત્વા મન્દન્તુ દાવને મહે ચિત્રાય રાધસે ।
ગીર્ભિર્ગિર્વાહઃ સ્તવમાન આ ગહિ સુમૃળીકો ન આ ગહિ ॥ ૧.૧૩૯.૦૬

ઓ ષૂ ણો અગ્ને શૃણુહિ ત્વમીળિતો દેવેભ્યો બ્રવસિ યજ્ઞિયેભ્યો રાજભ્યો યજ્ઞિયેભ્યઃ ।
યદ્ધ ત્યામઙ્ગિરોભ્યો ધેનું દેવા અદત્તન ।
વિ તાં દુહ્રે અર્યમા કર્તરી સચાઁ એષ તાં વેદ મે સચા ॥ ૧.૧૩૯.૦૭

મો ષુ વો અસ્મદભિ તાનિ પૌંસ્યા સના ભૂવન્દ્યુમ્નાનિ મોત જારિષુરસ્મત્પુરોત જારિષુઃ ।
યદ્વશ્ચિત્રં યુગેયુગે નવ્યં ઘોષાદમર્ત્યમ્ ।
અસ્માસુ તન્મરુતો યચ્ચ દુષ્ટરં દિધૃતા યચ્ચ દુષ્ટરમ્ ॥ ૧.૧૩૯.૦૮

દધ્યઙ્હ મે જનુષં પૂર્વો અઙ્ગિરાઃ પ્રિયમેધઃ કણ્વો અત્રિર્મનુર્વિદુસ્તે મે પૂર્વે મનુર્વિદુઃ ।
તેષાં દેવેષ્વાયતિરસ્માકં તેષુ નાભયઃ ।
તેષાં પદેન મહ્યા નમે ગિરેન્દ્રાગ્ની આ નમે ગિરા ॥ ૧.૧૩૯.૦૯

હોતા યક્ષદ્વનિનો વન્ત વાર્યં બૃહસ્પતિર્યજતિ વેન ઉક્ષભિઃ પુરુવારેભિરુક્ષભિઃ ।
જગૃભ્મા દૂરાદિશં શ્લોકમદ્રેરધ ત્મના ।
અધારયદરરિન્દાનિ સુક્રતુઃ પુરૂ સદ્માનિ સુક્રતુઃ ॥ ૧.૧૩૯.૧૦
યે દેવાસો દિવ્યેકાદશ સ્થ પૃથિવ્યામધ્યેકાદશ સ્થ ।
અપ્સુક્ષિતો મહિનૈકાદશ સ્થ તે દેવાસો યજ્ઞમિમં જુષધ્વમ્ ॥ ૧.૧૩૯.૧૧
વેદિષદે પ્રિયધામાય સુદ્યુતે ધાસિમિવ પ્ર ભરા યોનિમગ્નયે ।
વસ્ત્રેણેવ વાસયા મન્મના શુચિં જ્યોતીરથં શુક્રવર્ણં તમોહનમ્ ॥ ૧.૧૪૦.૦૧
અભિ દ્વિજન્મા ત્રિવૃદન્નમૃજ્યતે સંવત્સરે વાવૃધે જગ્ધમી પુનઃ ।
અન્યસ્યાસા જિહ્વયા જેન્યો વૃષા ન્યન્યેન વનિનો મૃષ્ટ વારણઃ ॥ ૧.૧૪૦.૦૨
કૃષ્ણપ્રુતૌ વેવિજે અસ્ય સક્ષિતા ઉભા તરેતે અભિ માતરા શિશુમ્ ।
પ્રાચાજિહ્વં ધ્વસયન્તં તૃષુચ્યુતમા સાચ્યં કુપયં વર્ધનં પિતુઃ ॥ ૧.૧૪૦.૦૩
મુમુક્ષ્વોઉ મનવે માનવસ્યતે રઘુદ્રુવઃ કૃષ્ણસીતાસ ઊ જુવઃ ।
અસમના અજિરાસો રઘુષ્યદો વાતજૂતા ઉપ યુજ્યન્ત આશવઃ ॥ ૧.૧૪૦.૦૪
આદસ્ય તે ધ્વસયન્તો વૃથેરતે કૃષ્ણમભ્વં મહિ વર્પઃ કરિક્રતઃ ।
યત્સીં મહીમવનિં પ્રાભિ મર્મૃશદભિશ્વસન્સ્તનયન્નેતિ નાનદત્ ॥ ૧.૧૪૦.૦૫
ભૂષન્ન યોઽધિ બભ્રૂષુ નમ્નતે વૃષેવ પત્નીરભ્યેતિ રોરુવત્ ।
ઓજાયમાનસ્તન્વશ્ચ શુમ્ભતે ભીમો ન શ◌ृઙ્ગા દવિધાવ દુર્ગૃભિઃ ॥ ૧.૧૪૦.૦૬
સ સંસ્તિરો વિષ્ટિરઃ સં ગૃભાયતિ જાનન્નેવ જાનતીર્નિત્ય આ શયે ।
પુનર્વર્ધન્તે અપિ યન્તિ દેવ્યમન્યદ્વર્પઃ પિત્રોઃ કૃણ્વતે સચા ॥ ૧.૧૪૦.૦૭
તમગ્રુવઃ કેશિનીઃ સં હિ રેભિર ઊર્ધ્વાસ્તસ્થુર્મમ્રુષીઃ પ્રાયવે પુનઃ ।
તાસાં જરાં પ્રમુઞ્ચન્નેતિ નાનદદસું પરં જનયઞ્જીવમસ્તૃતમ્ ॥ ૧.૧૪૦.૦૮
અધીવાસં પરિ માતૂ રિહન્નહ તુવિગ્રેભિઃ સત્વભિર્યાતિ વિ જ્રયઃ ।
વયો દધત્પદ્વતે રેરિહત્સદાનુ શ્યેની સચતે વર્તનીરહ ॥ ૧.૧૪૦.૦૯
અસ્માકમગ્ને મઘવત્સુ દીદિહ્યધ શ્વસીવાન્વૃષભો દમૂનાઃ ।
અવાસ્યા શિશુમતીરદીદેર્વર્મેવ યુત્સુ પરિજર્ભુરાણઃ ॥ ૧.૧૪૦.૧૦
ઇદમગ્ને સુધિતં દુર્ધિતાદધિ પ્રિયાદુ ચિન્મન્મનઃ પ્રેયો અસ્તુ તે ।
યત્તે શુક્રં તન્વોઉ રોચતે શુચિ તેનાસ્મભ્યં વનસે રત્નમા ત્વમ્ ॥ ૧.૧૪૦.૧૧

રથાય નાવમુત નો ગૃહાય નિત્યારિત્રાં પદ્વતીં રાસ્યગ્ને ।
અસ્માકં વીરાઁ ઉત નો મઘોનો જનાઁશ્ચ યા પારયાચ્છર્મ યા ચ ॥ ૧.૧૪૦.૧૨
અભી નો અગ્ન ઉક્થમિજ્જુગુર્યા દ્યાવાક્ષામા સિન્ધવશ્ચ સ્વગૂર્તાઃ ।
ગવ્યં યવ્યં યન્તો દીર્ઘાહેષં વરમરુણ્યો વરન્ત ॥ ૧.૧૪૦.૧૩

બળિત્થા તદ્વપુષે ધાયિ દર્શતં દેવસ્ય ભર્ગઃ સહસો યતો જનિ ।
યદીમુપ હ્વરતે સાધતે મતિરૃતસ્ય ધેના અનયન્ત સસ્રુતઃ ॥ ૧.૧૪૧.૦૧
પૃક્ષો વપુઃ પિતુમાન્નિત્ય આ શયે દ્વિતીયમા સપ્તશિવાસુ માતૃષુ ।
તૃતીયમસ્ય વૃષભસ્ય દોહસે દશપ્રમતિં જનયન્ત યોષણઃ ॥ ૧.૧૪૧.૦૨
નિર્યદીં બુધ્નાન્મહિષસ્ય વર્પસ ઈશાનાસઃ શવસા ક્રન્ત સૂરયઃ ।
યદીમનુ પ્રદિવો મધ્વ આધવે ગુહા સન્તં માતરિશ્વા મથાયતિ ॥ ૧.૧૪૧.૦૩
પ્ર યત્પિતુઃ પરમાન્નીયતે પર્યા પૃક્ષુધો વીરુધો દંસુ રોહતિ ।
ઉભા યદસ્ય જનુષં યદિન્વત આદિદ્યવિષ્ઠો અભવદ્ઘૃણા શુચિઃ ॥ ૧.૧૪૧.૦૪
આદિન્માતૃરાવિશદ્યાસ્વા શુચિરહિંસ્યમાન ઉર્વિયા વિ વાવૃધે ।
અનુ યત્પૂર્વા અરુહત્સનાજુવો નિ નવ્યસીષ્વવરાસુ ધાવતે ॥ ૧.૧૪૧.૦૫
આદિદ્ધોતારં વૃણતે દિવિષ્ટિષુ ભગમિવ પપૃચાનાસ ઋઞ્જતે ।
દેવાન્યત્ક્રત્વા મજ્મના પુરુષ્ટુતો મર્તં શંસં વિશ્વધા વેતિ ધાયસે ॥ ૧.૧૪૧.૦૬
વિ યદસ્થાદ્યજતો વાતચોદિતો હ્વારો ન વક્વા જરણા અનાકૃતઃ ।
તસ્ય પત્મન્દક્ષુષઃ કૃષ્ણજંહસઃ શુચિજન્મનો રજ આ વ્યધ્વનઃ ॥ ૧.૧૪૧.૦૭
રથો ન યાતઃ શિક્વભિઃ કૃતો દ્યામઙ્ગેભિરરુષેભિરીયતે ।
આદસ્ય તે કૃષ્ણાસો દક્ષિ સૂરયઃ શૂરસ્યેવ ત્વેષથાદીષતે વયઃ ॥ ૧.૧૪૧.૦૮
ત્વયા હ્યગ્ને વરુણો ધૃતવ્રતો મિત્રઃ શાશદ્રે અર્યમા સુદાનવઃ ।
યત્સીમનુ ક્રતુના વિશ્વથા વિભુરરાન્ન નેમિઃ પરિભૂરજાયથાઃ ॥ ૧.૧૪૧.૦૯
ત્વમગ્ને શશમાનાય સુન્વતે રત્નં યવિષ્ઠ દેવતાતિમિન્વસિ ।
તં ત્વા નુ નવ્યં સહસો યુવન્વયં ભગં ન કારે મહિરત્ન ધીમહિ ॥ ૧.૧૪૧.૧૦
અસ્મે રયિં ન સ્વર્થં દમૂનસં ભગં દક્ષં ન પપૃચાસિ ધર્ણસિમ્ ।
રશ્મીઁરિવ યો યમતિ જન્મની ઉભે દેવાનાં શંસમૃત આ ચ સુક્રતુઃ ॥ ૧.૧૪૧.૧૧
ઉત નઃ સુદ્યોત્મા જીરાશ્વો હોતા મન્દ્રઃ શૃણવચ્ચન્દ્રરથઃ ।

સ નો નેષન્નેષતમૈરમૂરોऽગ્નિર્વામં સુવિતં વસ્યો અચ્છ ॥ ૧.૧૪૧.૧૨
અસ્તાવ્યગ્નિઃ શિમીવદ્ભિરર્કૈઃ સામ્રાજ્યાય પ્રતરં દધાનઃ ।
અમી ચ યે મઘવાનો વયં ચ મિહં ન સૂરો અતિ નિષ્ટતન્યુઃ ॥ ૧.૧૪૧.૧૩
સમિદ્ધો અગ્ન આ વહ દેવાઁ અદ્ય યતસ્રુચે ।
તન્તું તનુષ્વ પૂર્વ્યં સુતસોમાય દાશુષે ॥ ૧.૧૪૨.૦૧
ઘૃતવન્તમુપ માસિ મધુમન્તં તનૂનપાત્ ।
યજ્ઞં વિપ્રસ્ય માવતઃ શશમાનસ્ય દાશુષઃ ॥ ૧.૧૪૨.૦૨
શુચિઃ પાવકો અદ્ભુતો મધ્વા યજ્ઞં મિમિક્ષતિ ।
નરાશંસસ્ત્રિરા દિવો દેવો દેવેષુ યજ્ઞિયઃ ॥ ૧.૧૪૨.૦૩
ઈળિતો અગ્ન આ વહેન્દ્રં ચિત્રમિહ પ્રિયમ્ ।
ઇયં હિ ત્વા મતિર્મમાચ્છા સુજિહ્વ વચ્યતે ॥ ૧.૧૪૨.૦૪
સ્તૃણાનાસો યતસ્રુચો બર્હિર્યજ્ઞે સ્વધ્વરે ।
વૃઞ્જે દેવવ્યચસ્તમમિન્દ્રાય શર્મ સપ્રથઃ ॥ ૧.૧૪૨.૦૫
વિ શ્રયન્તામૃતાવૃધઃ પ્રયૈ દેવેભ્યો મહીઃ ।
પાવકાસઃ પુરુસ્પૃહો દ્વારો દેવીરસશ્ચતઃ ॥ ૧.૧૪૨.૦૬
આ ભન્દમાને ઉપાકે નક્તોષાસા સુપેશસા ।
યહ્વી ઋતસ્ય માતરા સીદતાં બર્હિરા સુમત્ ॥ ૧.૧૪૨.૦૭
મન્દ્રજિહ્વા જુગુર્વણી હોતારા દૈવ્યા કવી ।
યજ્ઞં નો યક્ષતામિમં સિધ્રમદ્ય દિવિસ્પૃશમ્ ॥ ૧.૧૪૨.૦૮
શુચિર્દેવેષ્વર્પિતા હોત્રા મરુત્સુ ભારતી ।
ઇળા સરસ્વતી મહી બર્હિઃ સીદન્તુ યજ્ઞિયાઃ ॥ ૧.૧૪૨.૦૯
તન્નસ્તુરીપમદ્ભુતં પુરુ વારં પુરુ ત્મના ।
ત્વષ્ટા પોષાય વિ ષ્યતુ રાયે નાભા નો અસ્મયુઃ ॥ ૧.૧૪૨.૧૦
અવસૃજન્નુપ ત્મના દેવાન્યક્ષિ વનસ્પતે ।
અગ્નિર્હવ્યા સુષૂદતિ દેવો દેવેષુ મેધિરઃ ॥ ૧.૧૪૨.૧૧
પૂષણ્વતે મરુત્વતે વિશ્વદેવાય વાયવે ।
સ્વાહા ગાયત્રવેપસે હવ્યમિન્દ્રાય કર્તન ॥ ૧.૧૪૨.૧૨

સ્વાહાકૃતાન્યા ગહ્યુપ હવ્યાનિ વીતયે ।
ઇન્દ્રા ગહિ શ્રુધી હવં ત્વાં હવન્તે અધ્વરે ॥ ૧.૧૪૨.૧૩

પ્ર તવ્યસીં નવ્યસીં ધીતિમગ્નયે વાચો મતિં સહસઃ સૂનવે ભરે ।
અપાં નપાદ્યો વસુભિઃ સહ પ્રિયો હોતા પૃથિવ્યાં ન્યસીદદૃત્વિયઃ ॥ ૧.૧૪૩.૦૧
સ જાયમાનઃ પરમે વ્યોમન્યાવિરગ્નિરભવન્માતરિશ્વને ।
અસ્ય ક્રત્વા સમિધાનસ્ય મજ્મના પ્ર દ્યાવા શોચિઃ પૃથિવી અરોચયત્ ॥ ૧.૧૪૩.૦૨
અસ્ય ત્વેષા અજરા અસ્ય ભાનવઃ સુસંદૃશઃ સુપ્રતીકસ્ય સુદ્યુતઃ ।
ભાત્વક્ષસો અત્યક્તુર્ન સિન્ધવોઽગ્ને રેજન્તે અસસન્તો અજરાઃ ॥ ૧.૧૪૩.૦૩
યમેરિરે ભૃગવો વિશ્વવેદસં નાભા પૃથિવ્યા ભુવનસ્ય મજ્મના ।
અગ્નિં તં ગીર્ભિર્હિનુહિ સ્વ આ દમે ય એકો વસ્વો વરુણો ન રાજતિ ॥ ૧.૧૪૩.૦૪
ન યો વરાય મરુતામિવ સ્વનઃ સેનેવ સૃષ્ટા દિવ્યા યથાશનિઃ ।
અગ્નિર્જમ્ભૈસ્તિગિતૈરત્તિ ભર્વતિ યોધો ન શત્રૂન્સ વના ન્યૃઞ્જતે ॥ ૧.૧૪૩.૦૫
કુવિન્નો અગ્નિરુચથસ્ય વીરસદ્વસુષ્કુવિદ્વસુભિઃ કામમાવરત્ ।
ચોદઃ કુવિત્તુતુજ્યાત્સાતયે ધિયઃ શુચિપ્રતીકં તમયા ધિયા ગૃણે ॥ ૧.૧૪૩.૦૬
ઘૃતપ્રતીકં વ ઋતસ્ય ધૂર્ષદમગ્નિં મિત્રં ન સમિધાન ઋઞ્જતે ।
ઇન્ધાનો અક્રો વિદથેષુ દીદ્યચ્છુક્રવર્ણામુદુ નો યંસતે ધિયમ્ ॥ ૧.૧૪૩.૦૭
અપ્રયુચ્છન્નપ્રયુચ્છદ્ભિરગ્ને શિવેભિર્નઃ પાયુભિઃ પાહિ શગ્મૈઃ ।
અદબ્ધેભિરદૃપિતેભિરિષ્ટેઽનિમિષદ્ભિઃ પરિ પાહિ નો જાઃ ॥ ૧.૧૪૩.૦૮

એતિ પ્ર હોતા વ્રતમસ્ય માયયોર્ધ્વાં દધાનઃ શુચિપેશસં ધિયમ્ ।
અભિ સ્રુચઃ ક્રમતે દક્ષિણાવૃતો યા અસ્ય ધામ પ્રથમં હ નિંસતે ॥ ૧.૧૪૪.૦૧
અભીમૃતસ્ય દોહના અનૂષત યોનૌ દેવસ્ય સદને પરીવૃતાઃ ।
અપામુપસ્થે વિભૃતો યદાવસદધ સ્વધા અધયદ્યાભિરીયતે ॥ ૧.૧૪૪.૦૨
યુયૂષતઃ સવયસા તદિદ્વપુઃ સમાનમર્થં વિતરિત્રતા મિથઃ ।
આદીં ભગો ન હવ્યઃ સમસ્મદા વોળ્હુર્ન રશ્મીન્સમયંસ્ત સારથિઃ ॥ ૧.૧૪૪.૦૩
યમીં દ્વા સવયસા સપર્યતઃ સમાને યોના મિથુના સમોકસા ।
દિવા ન નક્તં પલિતો યુવાજનિ પુરૂ ચરન્નજરો માનુષા યુગા ॥ ૧.૧૪૪.૦૪
તમીં હિન્વન્તિ ધીતયો દશ વ્રિશો દેવં મર્તાસ ઊતયે હવામહે ।

ધનોરધિ પ્રવત આ સ ઋણ્વત્યભિવ્રજદ્ભિર્વયુના નવાધિત ॥ ૧.૧૪૪.૦૫
ત્વં હ્યગ્ને દિવ્યસ્ય રાજસિ ત્વં પાર્થિવસ્ય પશુપા ઇવ ત્મના ।
એની ત એતે બૃહતી અભિશ્રિયા હિરણ્યયી વક્વરી બર્હિરાશાતે ॥ ૧.૧૪૪.૦૬
અગ્ને જુષસ્વ પ્રતિ હર્ય તદ્વચો મન્દ્ર સ્વધાવ ઋતજાત સુક્રતો ।
યો વિશ્વતઃ પ્રત્યઙ્ઙસિ દર્શતો રણ્વઃ સંદૃષ્ટૌ પિતુમાઁ ઇવ ક્ષયઃ ॥ ૧.૧૪૪.૦૭

તં પૃચ્છતા સ જગામા સ વેદ સ ચિકિત્વાઁ ઈયતે સા ન્વીયતે ।
તસ્મિન્સન્તિ પ્રશિષસ્તસ્મિન્નિષ્ટયઃ સ વાજસ્ય શવસઃ શુષ્મિણસ્પતિઃ ॥ ૧.૧૪૫.૦૧
તમિત્પૃચ્છન્તિ ન સિમો વિ પૃચ્છતિ સ્વેનેવ ધીરો મનસા યદગ્રભીત્ ।
ન મૃષ્યતે પ્રથમં નાપરં વચોઽસ્ય ક્રત્વા સચતે અપ્રદૃપિતઃ ॥ ૧.૧૪૫.૦૨
તમિદ્ગચ્છન્તિ જુહ્વ૧સ્તમર્વતીર્વિશ્વાન્યેકઃ શ‌ૃણવદ્વચાંસિ મે ।
પુરુપ્રૈષસ્તતુરિર્યજ્ઞસાધનોઽચ્છિદ્રોતિઃ શિશુરાદત્ત સં રભઃ ॥ ૧.૧૪૫.૦૩
ઉપસ્થાયં ચરતિ યત્સમારત સદ્યો જાતસ્તત્સાર યુજ્યેભિઃ ।
અભિ શ્વાન્તં મૃશતે નાન્દ્યે મુદે યદીં ગચ્છન્ત્યુશતીરપિષ્ઠિતમ્ ॥ ૧.૧૪૫.૦૪
સ ઈં મૃગો અપ્યો વનર્ગુરુપ ત્વચ્યુપમસ્યાં નિ ધાયિ ।
વ્યબ્રવીદ્વયુના મર્ત્યેભ્યોઽગ્નિર્વિદ્વાઁ ઋતચિદ્ધિ સત્યઃ ॥ ૧.૧૪૫.૦૫

ત્રિમૂર્ધાનં સપ્તરશ્મિં ગૃણીષેઽનૂનમગ્નિં પિત્રોરુપસ્થે ।
નિષત્તમસ્ય ચરતો ધ્રુવસ્ય વિશ્વા દિવો રોચનાપપ્રિવાંસમ્ ॥ ૧.૧૪૬.૦૧
ઉક્ષા મહાઁ અભિ વવક્ષ એને અજરસ્તસ્થાવિતઊતિરૃષ્વઃ ।
ઉર્વ્યાઃ પદો નિ દધાતિ સાનૌ રિહન્ત્યૂધો અરુષાસો અસ્ય ॥ ૧.૧૪૬.૦૨
સમાનં વત્સમભિ સંચરન્તી વિષ્વગ્ધેનૂ વિ ચરતઃ સુમેકે ।
અનપવૃજ્યાઁ અધ્વનો મિમાને વિશ્વાન્કેતાઁ અધિ મહો દધાને ॥ ૧.૧૪૬.૦૩
ધીરાસઃ પદં કવયો નયન્તિ નાના હૃદા રક્ષમાણા અજુર્યમ્ ।
સિષાસન્તઃ પર્યપશ્યન્ત સિન્ધુમાવિરેભ્યો અભવત્સૂર્યો નૄન્ ॥ ૧.૧૪૬.૦૪
દિદૃક્ષેણ્યઃ પરિ કાષ્ઠાસુ જેન્ય ઈળેન્યો મહો અર્ભાય જીવસે ।
પુરુત્રા યદભવત્સૂરહૈભ્યો ગર્ભેભ્યો મઘવા વિશ્વદર્શતઃ ॥ ૧.૧૪૬.૦૫

કથા તે અગ્ને શુચયન્ત આયોર્દદાશુર્વાજેભિરાશુષાણાઃ ।
ઉભે યત્તોકે તનયે દધાના ઋતસ્ય સામન્રણયન્ત દેવાઃ ॥ ૧.૧૪૭.૦૧

બોધા મે અસ્ય વચસો યવિષ્ઠ મંહિષ્ઠસ્ય પ્રભૃતસ્ય સ્વધાવઃ ।
પીયતિ ત્વો અનુ ત્વો ગૃણાતિ વન્દારુસ્તે તન્વં વન્દે અગ્ને ॥ ૧.૧૪૭.૦૨
યે પાયવો મામતેયં તે અગ્ને પશ્યન્તો અન્ધં દુરિતાદરક્ષન્ ।
રરક્ષ તાન્સુકૃતો વિશ્વવેદા દિપ્સન્ત ઇદ્રિપવો નાહ દેભુઃ ॥ ૧.૧૪૭.૦૩
યો નો અગ્ને અરરિવાઁ અઘાયુરરાતીવા મર્ચયતિ દ્વયેન ।
મન્ત્રો ગુરુઃ પુનરસ્તુ સો અસ્મા અનુ મૃક્ષીષ્ટ તન્વં દુરુક્તૈઃ ॥ ૧.૧૪૭.૦૪
ઉત વા યઃ સહસ્ય પ્રવિદ્વાન્મર્તો મર્તં મર્ચયતિ દ્વયેન ।
અતઃ પાહિ સ્તવમાન સ્તુવન્તમગ્ને માકિર્નો દુરિતાય ધાયીઃ ॥ ૧.૧૪૭.૦૫

મથીદ્યદીં વિષ્ટો માતરિશ્વા હોતારં વિશ્વાપ્સું વિશ્વદેવ્યમ્ ।
નિ યં દધુર્મનુષ્યાસુ વિક્ષુ સ્વ૧ર્ણ ચિત્રં વપુષે વિભાવમ્ ॥ ૧.૧૪૮.૦૧
દદાનમિન્ન દદભન્ત મન્માગ્નિર્વરૂથં મમ તસ્ય ચાકન્ ।
જુષન્ત વિશ્વાન્યસ્ય કર્મોપસ્તુતિં ભરમાણસ્ય કારોઃ ॥ ૧.૧૪૮.૦૨
નિત્યે ચિન્નુ યં સદને જગૃભ્રે પ્રશસ્તિભિર્દધિરે યજ્ઞિયાસઃ ।
પ્ર સૂ નયન્ત ગૃભયન્ત ઇષ્ટાવશ્વાસો ન રથ્યો રારહાણાઃ ॥ ૧.૧૪૮.૦૩
પુરૂણિ દસ્મો નિ રિણાતિ જમ્ભૈરાદ્રોચતે વન આ વિભાવા ।
આદસ્ય વાતો અનુ વાતિ શોચિરસ્તુર્ન શર્યામસનામનુ દ્યૂન્ ॥ ૧.૧૪૮.૦૪
ન યં રિપવો ન રિષણ્યવો ગર્ભે સન્તં રેષણા રેષયન્તિ ।
અન્ધા અપશ્યા ન દભન્નભિખ્યા નિત્યાસ ઈં પ્રેતારો અરક્ષન્ ॥ ૧.૧૪૮.૦૫

મહઃ સ રાય એષતે પતિર્દન્નિન ઇનસ્ય વસુનઃ પદ આ ।
ઉપ ધ્રજન્તમદ્રયો વિધન્નિત્ ॥ ૧.૧૪૯.૦૧
સ યો વૃષા નરાં ન રોદસ્યોઃ શ્રવોભિરસ્તિ જીવપીતસર્ગઃ ।
પ્ર યઃ સસ્રાણઃ શિશ્રીત યોનૌ ॥ ૧.૧૪૯.૦૨
આ યઃ પુરં નાર્મિણીમદીદેદત્યઃ કવિર્નભન્યો૩ નાર્વા ।
સૂરો ન રુરુક્વાઞ્છતાત્મા ॥ ૧.૧૪૯.૦૩
અભિ દ્વિજન્મા ત્રી રોચનાનિ વિશ્વા રજાંસિ શુશુચાનો અસ્થાત્ ।
હોતા યજિષ્ઠો અપાં સધસ્થે ॥ ૧.૧૪૯.૦૪
અયં સ હોતા યો દ્વિજન્મા વિશ્વા દધે વાર્યાણિ શ્રવસ્યા ।

મર્તો યો અસ્મૈ સુતુકો દદાશ ॥ ૧.૧૪૯.૦૫

પુરુ ત્વા દાશ્વાન્વોચેઽરિરગ્ને તવ સ્વિદા ।
તોદસ્યેવ શરણ આ મહસ્ય ॥ ૧.૧૫૦.૦૧
વ્યનિનસ્ય ધનિનઃ પ્રહોષે ચિદરરુષઃ ।
કદા ચન પ્રજિગતો અદેવયોઃ ॥ ૧.૧૫૦.૦૨
સ ચન્દ્રો વિપ્ર મર્ત્યો મહો વ્રાધન્તમો દિવિ ।
પ્રપ્રેત્તે અગ્ને વનુષઃ સ્યામ ॥ ૧.૧૫૦.૦૩

મિત્રં ન યં શિમ્યા ગોષુ ગવ્યવઃ સ્વાધ્યો વિદથે અપ્સુ જીજનન્ ।
અરેજેતાં રોદસી પાજસા ગિરા પ્રતિ પ્રિયં યજતં જનુષામવઃ ॥ ૧.૧૫૧.૦૧
યદ્ધ ત્યદ્વાં પુરુમીળ્હસ્ય સોમિનઃ પ્ર મિત્રાસો ન દધિરે સ્વાભુવઃ ।
અધ ક્રતું વિદતં ગાતુમર્ચત ઉત શ્રુતં વૃષણા પસ્ત્યાવતઃ ॥ ૧.૧૫૧.૦૨
આ વાં ભૂષન્ક્ષિતયો જન્મ રોદસ્યોઃ પ્રવાચ્યં વૃષણા દક્ષસે મહે ।
યદીમૃતાય ભરથો યદર્વતે પ્ર હોત્રયા શિમ્યા વીથો અધ્વરમ્ ॥ ૧.૧૫૧.૦૩
પ્ર સા ક્ષિતિરસુર યા મહિ પ્રિય ઋતાવાનાવૃતમા ઘોષથો બૃહત્ ।
યુવં દિવો બૃહતો દક્ષમાભુવં ગાં ન ધુર્યુપ યુઞ્જાથે અપઃ ॥ ૧.૧૫૧.૦૪
મહી અત્ર મહિના વારમૃણ્વથોઽરેણવસ્તુજ આ સદ્મન્ધેનવઃ ।
સ્વરન્તિ તા ઉપરતાતિ સૂર્યમા નિમ્રુચ ઉષસસ્તક્વવીરિવ ॥ ૧.૧૫૧.૦૫
આ વામૃતાય કેશિનીરનૂષત મિત્ર યત્ર વરુણ ગાતુમર્ચથઃ ।
અવ ત્મના સૃજતં પિન્વતં ધિયો યુવં વિપ્રસ્ય મન્મનામિરજ્યથઃ ॥ ૧.૧૫૧.૦૬
યો વાં યજ્ઞૈઃ શશમાનો હ દાશતિ કવિર્હોતા યજતિ મન્મસાધનઃ ।
ઉપાહ તં ગચ્છથો વીથો અધ્વરમચ્છા ગિરઃ સુમતિં ગન્તમસ્મયૂ ॥ ૧.૧૫૧.૦૭
યુવાં યજ્ઞૈઃ પ્રથમા ગોભિરઞ્જત ઋતાવાના મનસો ન પ્રયુક્તિષુ ।
ભરન્તિ વાં મન્મના સંયતા ગિરોઽદૃપ્યતા મનસા રેવદાશાથે ॥ ૧.૧૫૧.૦૮
રેવદ્વયો દધાથે રેવદાશાથે નરા માયાભિરિતઊતિ માહિનમ્ ।
ન વાં દ્યાવોઽહભિર્નોત સિન્ધવો ન દેવત્વં પણયો નાનશુર્મઘમ્ ॥ ૧.૧૫૧.૦૯

યુવં વસ્ત્રાણિ પીવસા વસાથે યુવોરચ્છિદ્રા મન્તવો હ સર્ગાઃ ।
અવાતિરતમનૃતાનિ વિશ્વ ઋતેન મિત્રાવરુણા સચેથે ॥ ૧.૧૫૨.૦૧

એતચ્ચન ત્વો વિ ચિકેતદેષાં સત્યો મન્ત્રઃ કવિશસ્ત ઋઘાવાન્ ।
ત્રિરશ્રિં હન્તિ ચતુરશ્રિરુગ્રો દેવનિદો હ પ્રથમા અજૂર્યન્ ॥ ૧.૧૫૨.૦૨
અપાદેતિ પ્રથમા પદ્વતીનાં કસ્તદ્વાં મિત્રાવરુણા ચિકેત ।
ગર્ભો ભારં ભરત્યા ચિદસ્ય ઋતં પિપર્ત્યનૃતં નિ તારીત્ ॥ ૧.૧૫૨.૦૩
પ્રયન્તમિત્પરિ જારં કનીનાં પશ્યામસિ નોપનિપદ્યમાનમ્ ।
અનવપૃગ્ણા વિતતા વસાનં પ્રિયં મિત્રસ્ય વરુણસ્ય ધામ ॥ ૧.૧૫૨.૦૪
અનશ્વો જાતો અનભીશુરર્વા કનિક્રદત્પતયદૂર્ધ્વસાનુઃ ।
અચિત્તં બ્રહ્મ જુજુષુર્યુવાનઃ પ્ર મિત્રે ધામ વરુણે ગૃણન્તઃ ॥ ૧.૧૫૨.૦૫
આ ધેનવો મામતેયમવન્તીર્બ્રહ્મપ્રિયં પીપયન્ત્સસ્મિન્નૂધન્ ।
પિત્વો ભિક્ષેત વયુનાનિ વિદ્વાનાસાવિવાસન્નદિતિમુરુષ્યેત્ ॥ ૧.૧૫૨.૦૬
આ વાં મિત્રાવરુણા હવ્યજુષ્ટિં નમસા દેવાવવસા વવૃત્યામ્ ।
અસ્માકં બ્રહ્મ પૃતનાસુ સહ્યા અસ્માકં વૃષ્ટિર્દિવ્યા સુપારા ॥ ૧.૧૫૨.૦૭
યજામહે વાં મહઃ સજોષા હવ્યેભિર્મિત્રાવરુણા નમોભિઃ ।
ઘૃતૈર્ઘૃતસ્નૂ અધ યદ્વામસ્મે અધ્વર્યવો ન ધીતિભિર્ભરન્તિ ॥ ૧.૧૫૩.૦૧
પ્રસ્તુતિર્વાં ધામ ન પ્રયુક્તિરયામિ મિત્રાવરુણા સુવૃક્તિઃ ।
અનક્તિ યદ્વાં વિદથેષુ હોતા સુમ્નં વાં સૂરિર્વૃષણાવિયક્ષન્ ॥ ૧.૧૫૩.૦૨
પીપાય ધેનુરદિતિરૃતાય જનાય મિત્રાવરુણા હવિર્દે ।
હિનોતિ યદ્વાં વિદથે સપર્યન્ત્સ રાતહવ્યો માનુષો ન હોતા ॥ ૧.૧૫૩.૦૩
ઉત વાં વિક્ષુ મદ્યાસ્વન્ધો ગાવ આપશ્ચ પીપયન્ત દેવીઃ ।
ઉતો નો અસ્ય પૂર્વ્યઃ પતિર્દન્વીતં પાતં પયસ ઉસ્રિયાયાઃ ॥ ૧.૧૫૩.૦૪
વિષ્ણોર્નુ કં વીર્યાણિ પ્ર વોચં યઃ પાર્થિવાનિ વિમમે રજાંસિ ।
યો અસ્કભાયદુત્તરં સધસ્થં વિચક્રમાણસ્ત્રેધોરુગાયઃ ॥ ૧.૧૫૪.૦૧
પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૨
પ્ર વિષ્ણવે શૂષમેતુ મન્મ ગિરિક્ષિત ઉરુગાયાય વૃષ્ણે ।
ય ઇદં દીર્ઘં પ્રયતં સધસ્થમેકો વિમમે ત્રિભિરિત્પદેભિઃ ॥ ૧.૧૫૪.૦૩
યસ્ય ત્રી પૂર્ણા મધુના પદાન્યક્ષીયમાણા સ્વધયા મદન્તિ ।

ય ઉ ત્રિધાતુ પૃથિવીમુત દ્યામેકો દાધાર ભુવનાનિ વિશ્વા ॥ ૧.૧૫૪.૦૪
તદસ્ય પ્રિયમભિ પાથો અશ્યાં નરો યત્ર દેવયવો મદન્તિ ।
ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ ॥ ૧.૧૫૪.૦૫
તા વાં વાસ્તૂન્યુશ્મસિ ગમધ્યૈ યત્ર ગાવો ભૂરિશૃઙ્ગા અયાસઃ ।
અત્રાહ તદુરુગાયસ્ય વૃષ્ણઃ પરમં પદમવ ભાતિ ભૂરિ ॥ ૧.૧૫૪.૦૬
પ્ર વઃ પાન્તમન્ધસો ધિયાયતે મહે શૂરાય વિષ્ણવે ચાર્ચત ।
યા સાનુનિ પર્વતાનામદાભ્યા મહસ્તસ્થતુરર્વતેવ સાધુના ॥ ૧.૧૫૫.૦૧
ત્વેષમિત્થા સમરણં શિમીવતોરિન્દ્રાવિષ્ણૂ સુતપા વામુરુષ્યતિ ।
યા મર્ત્યાય પ્રતિધીયમાનમિત્કૃશાનોરસ્તુરસનામુરુષ્યથઃ ॥ ૧.૧૫૫.૦૨
તા ઈં વર્ધન્તિ મહ્યસ્ય પૌંસ્યં નિ માતરા નયતિ રેતસે ભુજે ।
દધાતિ પુત્રોઽવરં પરં પિતુર્નામ તૃતીયમધિ રોચને દિવઃ ॥ ૧.૧૫૫.૦૩
તત્તદિદસ્ય પૌંસ્યં ગૃણીમસીનસ્ય ત્રાતુરવૃકસ્ય મીળ્હુષઃ ।
યઃ પાર્થિવાનિ ત્રિભિરિદ્વિગામભિરુરુ ક્રમિષ્ટોરુગાયાય જીવસે ॥ ૧.૧૫૫.૦૪
દ્વે ઇદસ્ય ક્રમણે સ્વર્દૃશોઽભિખ્યાય મર્ત્યો ભુરણ્યતિ ।
તૃતીયમસ્ય નકિરા દધર્ષતિ વયશ્ચન પતયન્તઃ પતત્રિણઃ ॥ ૧.૧૫૫.૦૫
ચતુર્ભિઃ સાકં નવતિં ચ નામભિશ્ચક્રં ન વૃત્તં વ્યતીઁરવીવિપત્ ।
બૃહચ્છરીરો વિમિમાન ઋક્વભિર્યુવાકુમારઃ પ્રત્યેત્યાહવમ્ ॥ ૧.૧૫૫.૦૬
ભવા મિત્રો ન શેવ્યો ઘૃતાસુતિર્વિભૂતદ્યુમ્ન એવયા ઉ સપ્રથાઃ ।
અધા તે વિષ્ણો વિદુષા ચિદર્ધ્યઃ સ્તોમો યજ્ઞશ્ચ રાધ્યો હવિષ્મતા ॥ ૧.૧૫૬.૦૧
યઃ પૂર્વ્યાય વેધસે નવીયસે સુમજ્જાનયે વિષ્ણવે દદાશતિ ।
યો જાતમસ્ય મહતો મહિ બ્રવત્સેદુ શ્રવોભિર્યુજ્યં ચિદભ્યસત્ ॥ ૧.૧૫૬.૦૨
તમુ સ્તોતારઃ પૂર્વ્યં યથા વિદ ઋતસ્ય ગર્ભં જનુષા પિપર્તન ।
આસ્ય જાનન્તો નામ ચિદ્વિવક્તન મહસ્તે વિષ્ણો સુમતિં ભજામહે ॥ ૧.૧૫૬.૦૩
તમસ્ય રાજા વરુણસ્તમશ્વિના ક્રતું સચન્ત મારુતસ્ય વેધસઃ ।
દાધાર દક્ષમુત્તમમહર્વિદં વ્રજં ચ વિષ્ણુઃ સખિવાઁ અપોર્ણુતે ॥ ૧.૧૫૬.૦૪
આ યો વિવાય સચથાય દૈવ્ય ઇન્દ્રાય વિષ્ણુઃ સુકૃતે સુકૃત્તરઃ ।
વેધા અજિન્વત્ત્રિષધસ્થ આર્યમૃતસ્ય ભાગે યજમાનમાભજત્ ॥ ૧.૧૫૬.૦૫

અબોધ્યગ્નિર્જ્મ ઉદેતિ સૂર્યો વ્યુ૧ષાશ્ચન્દ્રા મહ્યાવો અર્ચિષા ।
આયુક્ષાતામશ્વિના યાતવે રથં પ્રાસાવીદ્દેવઃ સવિતા જગત્પૃથક્ ॥ ૧.૧૫૭.૦૧

યદ્યુઞ્જાથે વૃષણમશ્વિના રથં ઘૃતેન નો મધુના ક્ષત્રમુક્ષતમ્ ।
અસ્માકં બ્રહ્મ પૃતનાસુ જિન્વતં વયં ધના શૂરસાતા ભજેમહિ ॥ ૧.૧૫૭.૦૨

અર્વાઙ્ત્રિચક્રો મધુવાહનો રથો જીરાશ્વો અશ્વિનોર્યાતુ સુષ્ટુતઃ ।
ત્રિવન્ધુરો મઘવા વિશ્વસૌભગઃ શં ન આ વક્ષદ્દ્વિપદે ચતુષ્પદે ॥ ૧.૧૫૭.૦૩

આ ન ઊર્જં વહતમશ્વિના યુવં મધુમત્યા નઃ કશયા મિમિક્ષતમ્ ।
પ્રાયુસ્તારિષ્ટં ની રપાંસિ મૃક્ષતં સેધતં દ્વેષો ભવતં સચાભુવા ॥ ૧.૧૫૭.૦૪

યુવં હ ગર્ભં જગતીષુ ધત્થો યુવં વિશ્વેષુ ભુવનેષ્વન્તઃ ।
યુવમગ્નિં ચ વૃષણાવપશ્ચ વનસ્પતી◌ઁરશ્વિનાવૈરયેથામ્ ॥ ૧.૧૫૭.૦૫

યુવં હ સ્થો ભિષજા ભેષજેભિરથો હ સ્થો રથ્યા૩ રાથ્યેભિઃ ।
અથો હ ક્ષત્રમધિ ધત્થ ઉગ્રા યો વાં હવિષ્માન્મનસા દદાશ ॥ ૧.૧૫૭.૦૬

વસૂ રુદ્રા પુરુમન્તૂ વૃધન્તા દશસ્યતં નો વૃષણાવભિષ્ટૌ ।
દસ્રા હ યદ્રેક્ણ ઔચથ્યો વાં પ્ર યત્સસ્રાથે અકવાભિરૂતી ॥ ૧.૧૫૮.૦૧

કો વાં દાશત્સુમતયે ચિદસ્યૈ વસૂ યદ્ધેથે નમસા પદે ગોઃ ।
જિગૃતમસ્મે રેવતીઃ પુરંધીઃ કામપ્રેણેવ મનસા ચરન્તા ॥ ૧.૧૫૮.૦૨

યુક્તો હ યદ્વાં તૌગ્ર્યાય પેરુર્વિ મધ્યે અર્ણસો ધાયિ પજ્રઃ ।
ઉપ વામવઃ શરણં ગમેયં શૂરો નાજ્મ પતયદ્ભિરેવૈઃ ॥ ૧.૧૫૮.૦૩

ઉપસ્તુતિરૌચથ્યમુરુષ્યેન્મા મામિમે પતત્રિણી વિ દુગ્ધામ્ ।
મા મામેધો દશતયશ્ચિતો ધાક્પ્ર યદ્વાં બદ્ધસ્ત્મનિ ખાદતિ ક્ષામ્ ॥ ૧.૧૫૮.૦૪

ન મા ગરન્નદ્યો માતૃતમા દાસા યદીં સુસમુબ્ધમવાધુઃ ।
શિરો યદસ્ય ત્રૈતનો વિતક્ષત્સ્વયં દાસ ઉરો અંસાવપિ ગ્ધ ॥ ૧.૧૫૮.૦૫

દીર્ઘતમા મામતેયો જુજુર્વાન્દશમે યુગે ।
અપામર્થં યતીનાં બ્રહ્મા ભવતિ સારથિઃ ॥ ૧.૧૫૮.૦૬

પ્ર દ્યાવા યજ્ઞૈઃ પૃથિવી ઋતાવૃધા મહી સ્તુષે વિદથેષુ પ્રચેતસા ।
દેવેભિર્યે દેવપુત્રે સુદંસસેત્થા ધિયા વાર્યાણિ પ્રભૂષતઃ ॥ ૧.૧૫૯.૦૧

ઉત મન્યે પિતુરદ્રુહો મનો માતુર્મહિ સ્વતવસ્તદ્ધવીમભિઃ ।

સુરેતસા પિતરા ભૂમ ચક્રતુરુરુ પ્રજાયા અમૃતં વરીમભિઃ ॥ ૧.૧૫૯.૦૨
તે સૂનવઃ સ્વપસઃ સુદંસસો મહી જજ્ઞુર્માતરા પૂર્વચિત્તયે ।
સ્થાતુશ્ચ સત્યં જગતશ્ચ ધર્મણિ પુત્રસ્ય પાથઃ પદમદ્વયાવિનઃ ॥ ૧.૧૫૯.૦૩
તે માયિનો મમિરે સુપ્રચેતસો જામી સયોની મિથુના સમોકસા ।
નવ્યંનવ્યં તન્તુમા તન્વતે દિવિ સમુદ્રે અન્તઃ કવયઃ સુદીતયઃ ॥ ૧.૧૫૯.૦૪
તદ્રાધો અદ્ય સવિતુર્વરેણ્યં વયં દેવસ્ય પ્રસવે મનામહે ।
અસ્મભ્યં દ્યાવાપૃથિવી સુચેતુના રયિં ધત્તં વસુમન્તં શતગ્વિનમ્ ॥ ૧.૧૫૯.૦૫

તે હિ દ્યાવાપૃથિવી વિશ્વશમ્ભુવ ઋતાવરી રજસો ધારયત્કવી ।
સુજન્મની ધિષણે અન્તરીયતે દેવો દેવી ધર્મણા સૂર્યઃ શુચિઃ ॥ ૧.૧૬૦.૦૧
ઉરુવ્યચસા મહિની અસશ્ચતા પિતા માતા ચ ભુવનાનિ રક્ષતઃ ।
સુધૃષ્ટમે વપુષ્યેઉ ન રોદસી પિતા યત્સીમભિ રૂપૈરવાસયત્ ॥ ૧.૧૬૦.૦૨
સ વહ્નિઃ પુત્રઃ પિત્રોઃ પવિત્રવાન્પુનાતિ ધીરો ભુવનાનિ માયયા ।
ધેનું ચ પૃશ્નિં વૃષભં સુરેતસં વિશ્વાહા શુક્રં પયો અસ્ય દુક્ષત ॥ ૧.૧૬૦.૦૩
અયં દેવાનામપસામપસ્તમો યો જજાન રોદસી વિશ્વશમ્ભુવા ।
વિ યો મમે રજસી સુક્રતૂયયાજરેભિઃ સ્કમ્ભનેભિઃ સમાનૃચે ॥ ૧.૧૬૦.૦૪
તે નો ગૃણાને મહિની મહિ શ્રવઃ ક્ષત્રં દ્યાવાપૃથિવી ધાસથો બૃહત્ ।
યેનાભિ કૃષ્ટીસ્તતનામ વિશ્વહા પનાય્યમોજો અસ્મે સમિન્વતમ્ ॥ ૧.૧૬૦.૦૫

કિમુ શ્રેષ્ઠઃ કિં યવિષ્ઠો ન આજગન્કિમીયતે દૂત્યં૧ કદ્યદૂચિમ ।
ન નિન્દિમ ચમસં યો મહાકુલોઽગ્ને ભ્રાતર્દ્રુણ ઇદ્ભૂતિમૂદિમ ॥ ૧.૧૬૧.૦૧
એકં ચમસં ચતુરઃ કૃણોતન તદ્વો દેવા અબ્રુવન્તદ્વ આગમમ્ ।
સૌધન્વના યદ્યેવા કરિષ્યથ સાકં દેવૈર્યજ્ઞિયાસો ભવિષ્યથ ॥ ૧.૧૬૧.૦૨
અગ્નિં દૂતં પ્રતિ યદબ્રવીતનાશ્વઃ કર્ત્વો રથ ઉતેહ કર્ત્વઃ ।
ધેનુઃ કર્ત્વા યુવશા કર્ત્વા દ્વા તાનિ ભ્રાતરનુ વઃ કૃત્વ્યેમસિ ॥ ૧.૧૬૧.૦૩
ચકૃવાંસ ઋભવસ્તદપૃચ્છત ક્વેદભૂદ્યઃ સ્ય દૂતો ન આજગન્ ।
યદાવાખ્યચ્ચમસાઞ્ચતુરઃ કૃતાનાદિત્ત્વષ્ટા ગ્નાસ્વન્તર્ન્યાનજે ॥ ૧.૧૬૧.૦૪
હનામૈનાઁ ઇતિ ત્વષ્ટા યદબ્રવીચ્ચમસં યે દેવપાનમનિન્દિષુઃ ।
અન્યા નામાનિ કૃણ્વતે સુતે સચાઁ અન્યૈરેનાન્કન્યાઉ નામભિઃ સ્પરત્ ॥ ૧.૧૬૧.૦૫

ઇન્દ્રો હરી યુયુજે અશ્વિના રથં બૃહસ્પતિર્વિશ્વરૂપામુપાજત ।
ઋભુર્વિભ્વા વાજો દેવાઁ અગચ્છત સ્વપસો યજ્ઞિયં ભાગમૈતન ॥ ૧.૧૬૧.૦૬
નિશ્ચર્મણો ગામરિણીત ધીતિભિર્યા જરન્તા યુવશા તાકૃણોતન ।
સૌધન્વના અશ્વાદશ્વમતક્ષત યુક્ત્વા રથમુપ દેવાઁ અયાતન ॥ ૧.૧૬૧.૦૭
ઇદમુદકં પિબતેત્યબ્રવીતનેદં વા ઘા પિબતા મુઞ્જનેજનમ્ ।
સૌધન્વના યદિ તન્નેવ હર્યથ તૃતીયે ઘા સવને માદયાધ્વૈ ॥ ૧.૧૬૧.૦૮
આપો ભૂયિષ્ઠા ઇત્યેકો અબ્રવીદગ્નિર્ભૂયિષ્ઠ ઇત્યન્યો અબ્રવીત્ ।
વધર્યન્તીં બહુભ્યઃ પ્રૈકો અબ્રવીદૃતા વદન્તશ્ચમસાઁ અપિંશત ॥ ૧.૧૬૧.૦૯
શ્રોણામેક ઉદકં ગામવાજતિ માંસમેકઃ પિંશતિ સૂનયાભૃતમ્ ।
આ નિમ્રુચઃ શકૃદેકો અપાભરત્કિં સ્વિત્પુત્રેભ્યઃ પિતરા ઉપાવતુઃ ॥ ૧.૧૬૧.૧૦
ઉદ્વત્સ્વસ્મા અકૃણોતના તૃણં નિવત્સ્વપઃ સ્વપસ્યયા નરઃ ।
અગોહ્યસ્ય યદસસ્તના ગૃહે તદદ્યેદમૃભવો નાનુ ગચ્છથ ॥ ૧.૧૬૧.૧૧
સમ્મીલ્ય યદ્ભુવના પર્યસર્પત ક્વ સ્વિત્તાત્યા પિતરા વ આસતુઃ ।
અશપત યઃ કરસ્નં વ આદદે યઃ પ્રાબ્રવીત્પ્રો તસ્મા અબ્રવીતન ॥ ૧.૧૬૧.૧૨
સુષુપ્વાંસ ઋભવસ્તદપૃચ્છતાગોહ્ય ક ઇદં નો અબૂબુધત્ ।
શ્વાનં બસ્તો બોધયિતારમબ્રવીત્સંવત્સર ઇદમદ્યા વ્યખ્યત ॥ ૧.૧૬૧.૧૩
દિવા યાન્તિ મરુતો ભૂમ્યાગ્નિરયં વાતો અન્તરિક્ષેણ યાતિ ।
અદ્ભિર્યાતિ વરુણઃ સમુદ્રૈર્યુષ્માઁ ઇચ્છન્તઃ શવસો નપાતઃ ॥ ૧.૧૬૧.૧૪
મા નો મિત્રો વરુણો અર્યમાયુરિન્દ્ર ઋભુક્ષા મરુતઃ પરિ ખ્યન્ ।
યદ્વાજિનો દેવજાતસ્ય સપ્તેઃ પ્રવક્ષ્યામો વિદથે વીર્યાણિ ॥ ૧.૧૬૨.૦૧
યન્નિર્ણિજા રેક્ણસા પ્રાવૃતસ્ય રાતિં ગૃભીતાં મુખતો નયન્તિ ।
સુપ્રાઙજો મેમ્યદ્વિશ્વરૂપ ઇન્દ્રાપૂષ્ણોઃ પ્રિયમપ્યેતિ પાથઃ ॥ ૧.૧૬૨.૦૨
એષ ચ્છાગઃ પુરો અશ્વેન વાજિના પૂષ્ણો ભાગો નીયતે વિશ્વદેવ્યઃ ।
અભિપ્રિયં યત્પુરોળાશમર્વતા ત્વષ્ટેદેનં સૌશ્રવસાય જિન્વતિ ॥ ૧.૧૬૨.૦૩
યદ્ધવિષ્યમૃતુશો દેવયાનં ત્રિર્માનુષાઃ પર્યશ્વં નયન્તિ ।
અત્રા પૂષ્ણઃ પ્રથમો ભાગ એતિ યજ્ઞં દેવેભ્યઃ પ્રતિવેદયન્નજઃ ॥ ૧.૧૬૨.૦૪
હોતાધ્વર્યુરાવયા અગ્નિમિન્ધો ગ્રાવગ્રાભ ઉત શંસ્તા સુવિપ્રઃ ।

તેન યજ્ઞેન સ્વરંકૃતેન સ્વિષ્ટેન વક્ષણા આ પૃણધ્વમ્ ॥ ૧.૧૬૨.૦૫
યૂપવ્રસ્કા ઉત યે યૂપવાહાશ્ચષાલં યે અશ્વયૂપાય તક્ષતિ ।
યે ચાર્વતે પચનં સમ્ભરન્ત્યુતો તેષામભિગૂર્તિર્ન ઇન્વતુ ॥ ૧.૧૬૨.૦૬
ઉપ પ્રાગાત્સુમન્મેऽધાયિ મન્મ દેવાનામાશા ઉપ વીતપૃષ્ઠઃ ।
અન્વેનં વિપ્રા ઋષયો મદન્તિ દેવાનાં પુષ્ટે ચકૃમા સુબન્ધુમ્ ॥ ૧.૧૬૨.૦૭
યદ્વાજિનો દામ સંદાનમર્વતો યા શીર્ષણ્યા રશના રજ્જુરસ્ય ।
યદ્વા ઘાસ્ય પ્રભૃતમાસ્યે તૃણં સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥ ૧.૧૬૨.૦૮
યદશ્વસ્ય ક્રવિષો મક્ષિકાશ યદ્વા સ્વરૌ સ્વધિતૌ રિપ્તમસ્તિ ।
યદ્ધસ્તયોઃ શમિતુર્યન્નખેષુ સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥ ૧.૧૬૨.૦૯
યદૂવધ્યમુદરસ્યાપવાતિ ય આમસ્ય ક્રવિષો ગન્ધો અસ્તિ ।
સુકૃતા તચ્છમિતારઃ કૃણ્વન્તૂત મેધં શ઼ૃતપાકં પચન્તુ ॥ ૧.૧૬૨.૧૦
યત્તે ગાત્રાદગ્નિના પચ્યમાનાદભિ શૂલં નિહતસ્યાવધાવતિ ।
મા તદ્ભૂમ્યામા શ્રિષન્મા તૃણેષુ દેવેભ્યસ્તદુશદ્ભ્યો રાતમસ્તુ ॥ ૧.૧૬૨.૧૧
યે વાજિનં પરિપશ્યન્તિ પક્વં ય ઈમાહુઃ સુરભિર્નિર્હરેતિ ।
યે ચાર્વતો માંસભિક્ષામુપાસત ઉતો તેષામભિગૂર્તિર્ન ઇન્વતુ ॥ ૧.૧૬૨.૧૨
યન્નીક્ષણં માઁસ્પચન્યા ઉખાયા યા પાત્રાણિ યૂષ્ણ આસેચનાનિ ।
ઊષ્મણ્યાપિધાના ચરૂણામઙ્કાઃ સૂનાઃ પરિ ભૂષન્ત્યશ્વમ્ ॥ ૧.૧૬૨.૧૩
નિક્રમણં નિષદનં વિવર્તનં યચ્ચ પડ્બીશમર્વતઃ ।
યચ્ચ પપૌ યચ્ચ ઘાસિં જઘાસ સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥ ૧.૧૬૨.૧૪
મા ત્વાગ્નિર્ધ્વનયીદ્ધૂમગન્ધિર્મોખા ભ્રાજન્ત્યભિ વિક્ત જઘ્રિઃ ।
ઇષ્ટં વીતમભિગૂર્તં વષટ્કૃતં તં દેવાસઃ પ્રતિ ગૃભ્ણન્ત્યશ્વમ્ ॥ ૧.૧૬૨.૧૫
યદશ્વાય વાસ ઉપસ્તૃણન્ત્યધીવાસં યા હિરણ્યાન્યસ્મૈ ।
સંદાનમર્વન્તં પડ્બીશં પ્રિયા દેવેષ્વા યામયન્તિ ॥ ૧.૧૬૨.૧૬
યત્તે સાદે મહસા શૂકૃતસ્ય પાર્ષ્ણ્યા વા કશયા વા તુતોદ ।
સ્રુચેવ તા હવિષો અધ્વરેષુ સર્વા તા તે બ્રહ્મણા સૂદયામિ ॥ ૧.૧૬૨.૧૭
ચતુસ્ત્રિંશદ્વાજિનો દેવબન્ધોર્વઙ્ક્રીરશ્વસ્ય સ્વધિતિઃ સમેતિ ।
અચ્છિદ્રા ગાત્રા વયુના કૃણોત પરુષ્પરુરનુઘુષ્યા વિ શસ્ત ॥ ૧.૧૬૨.૧૮

એકસ્ત્વષ્ટુરશ્વસ્યા વિશસ્તા દ્વા યન્તારા ભવતસ્તથ ઋતુઃ ।
યા તે ગાત્રાણામૃતુથા કૃણોમિ તાતા પિણ્ડાનાં પ્ર જુહોમ્યગ્નૌ ॥ ૧.૧૬૨.૧૯
મા ત્વા તપત્પ્રિય આત્માપિયન્તં મા સ્વધિતિસ્તન્વ૧ આ તિષ્ઠિપત્તે ।
મા તે ગૃધ્નુરવિશસ્તાતિહાય છિદ્રા ગાત્રાણ્યસિના મિથૂ કઃ ॥ ૧.૧૬૨.૨૦
ન વા ઉ એતન્મ્રિયસે ન રિષ્યસિ દેવાઁ ઇદેષિ પથિભિઃ સુગેભિઃ ।
હરી તે યુઞ્જા પૃષતી અભૂતામુપાસ્થાદ્વાજી ધુરિ રાસભસ્ય ॥ ૧.૧૬૨.૨૧
સુગવ્યં નો વાજી સ્વશ્વ્યં પુંસઃ પુત્રાઁ ઉત વિશ્વાપુષં રયિમ્ ।
અનાગાસ્ત્વં નો અદિતિઃ કૃણોતુ ક્ષત્રં નો અશ્વો વનતાં હવિષ્માન્ ॥ ૧.૧૬૨.૨૨

યદક્રન્દઃ પ્રથમં જાયમાન ઉદ્યન્સમુદ્રાદુત વા પુરીષાત્ ।
શ્યેનસ્ય પક્ષા હરિણસ્ય બાહૂ ઉપસ્તુત્યં મહિ જાતં તે અર્વન્ ॥ ૧.૧૬૩.૦૧
યમેન દત્તં ત્રિત એનમાયુનગિન્દ્ર એણં પ્રથમો અધ્યતિષ્ઠત્ ।
ગન્ધર્વો અસ્ય રશનામગૃભ્ણાત્સૂરાદશ્વં વસવો નિરતષ્ટ ॥ ૧.૧૬૩.૦૨
અસિ યમો અસ્યાદિત્યો અર્વન્નસિ ત્રિતો ગુહ્યેન વ્રતેન ।
અસિ સોમેન સમયા વિપૃક્ત આહુસ્તે ત્રીણિ દિવિ બન્ધનાનિ ॥ ૧.૧૬૩.૦૩
ત્રીણિ ત આહુર્દિવિ બન્ધનાનિ ત્રીણ્યપ્સુ ત્રીણ્યન્તઃ સમુદ્રે ।
ઉતેવ મે વરુણશ્છન્ત્સ્યર્વન્યત્રા ત આહુઃ પરમં જનિત્રમ્ ॥ ૧.૧૬૩.૦૪
ઇમા તે વાજિન્નવમાર્જનાનીમા શફાનાં સનિતુર્નિધાના ।
અત્રા તે ભદ્રા રશના અપશ્યમૃતસ્ય યા અભિરક્ષન્તિ ગોપાઃ ॥ ૧.૧૬૩.૦૫
આત્માનં તે મનસારાદજાનામવો દિવા પતયન્તં પતંગમ્ ।
શિરો અપશ્યં પથિભિઃ સુગેભિરરેણુભિર્જેહમાનં પતત્રિ ॥ ૧.૧૬૩.૦૬
અત્રા તે રૂપમુત્તમમપશ્યં જિગીષમાણમિષ આ પદે ગોઃ ।
યદા તે મર્તો અનુ ભોગમાનળાદિદ્ગ્રસિષ્ઠ ઓષધીરજીગઃ ॥ ૧.૧૬૩.૦૭
અનુ ત્વા રથો અનુ મર્યો અર્વન્નનુ ગાવોઽનુ ભગઃ કનીનામ્ ।
અનુ વ્રાતાસસ્તવ સખ્યમીયુરનુ દેવા મમિરે વીર્યં તે ॥ ૧.૧૬૩.૦૮
હિરણ્યશૃઙ્ગોઽયો અસ્ય પાદા મનોજવા અવર ઇન્દ્ર આસીત્ ।
દેવા ઇદસ્ય હવિરદ્યમાયન્યો અર્વન્તં પ્રથમો અધ્યતિષ્ઠત્ ॥ ૧.૧૬૩.૦૯
ઈર્માન્તાસઃ સિલિકમધ્યમાસઃ સં શૂરણાસો દિવ્યાસો અત્યાઃ ।

હંસા ઇવ શ્રેણિશો યતન્તે યદાક્ષિષુર્દિવ્યમજ્મમશ્વાઃ ॥ ૧.૧૬૩.૧૦
તવ શરીરં પતયિષ્ણ્વર્વન્તવ ચિત્તં વાત ઇવ ધ્રજીમાન્ ।
તવ શ઼ૃઙ્ગાણિ વિષ્ઠિતા પુરુત્રારણ્યેષુ જર્ભુરાણા ચરન્તિ ॥ ૧.૧૬૩.૧૧
ઉપ પ્રાગાચ્છસનં વાજ્યર્વા દેવદ્રીચા મનસા દીધ્યાનઃ ।
અજઃ પુરો નીયતે નાભિરસ્યાનુ પશ્ચાત્કવયો યન્તિ રેભાઃ ॥ ૧.૧૬૩.૧૨
ઉપ પ્રાગાત્પરમં યત્સધસ્થમર્વાઁ અચ્છા પિતરં માતરં ચ ।
અદ્યા દેવાઞ્જુષ્ટતમો હિ ગમ્યા અથા શાસ્તે દાશુષે વાર્યાણિ ॥ ૧.૧૬૩.૧૩
અસ્ય વામસ્ય પલિતસ્ય હોતુસ્તસ્ય ભ્રાતા મધ્યમો અસ્ત્યશ્નઃ ।
તૃતીયો ભ્રાતા ઘૃતપૃષ્ઠો અસ્યાત્રાપશ્યં વિશ્પતિં સપ્તપુત્રમ્ ॥ ૧.૧૬૪.૦૧
સપ્ત યુઞ્જન્તિ રથમેકચક્રમેકો અશ્વો વહતિ સપ્તનામા ।
ત્રિનાભિ ચક્રમજરમનર્વં યત્રેમા વિશ્વા ભુવનાધિ તસ્થુઃ ॥ ૧.૧૬૪.૦૨
ઇમં રથમધિ યે સપ્ત તસ્થુઃ સપ્તચક્રં સપ્ત વહન્ત્યશ્વાઃ ।
સપ્ત સ્વસારો અભિ સં નવન્તે યત્ર ગવાં નિહિતા સપ્ત નામ ॥ ૧.૧૬૪.૦૩
કો દદર્શ પ્રથમં જાયમાનમસ્થન્વન્તં યદનસ્થા બિભર્તિ ।
ભૂમ્યા અસુરસૃગાત્મા ક્વ સ્વિત્કો વિદ્વાંસમુપ ગાત્પ્રષ્ટુમેતત્ ॥ ૧.૧૬૪.૦૪
પાકઃ પૃચ્છામિ મનસાવિજાનન્દેવાનામેના નિહિતા પદાનિ ।
વત્સે બષ્કયેઽધિ સપ્ત તન્તૂન્વિ તત્નિરે કવય ઓતવા ઉ ॥ ૧.૧૬૪.૦૫
અચિકિત્વાઞ્ચિકિતુષશ્ચિદત્ર કવીન્પૃચ્છામિ વિદ્મને ન વિદ્વાન્ ।
વિ યસ્તસ્તમ્ભ ષળિમા રજાંસ્યજસ્ય રૂપે કિમપિ સ્વિદેકમ્ ॥ ૧.૧૬૪.૦૬
ઇહ બ્રવીતુ ય ઈમઙ્ગ વેદાસ્ય વામસ્ય નિહિતં પદં વેઃ ।
શીર્ષ્ણઃ ક્ષીરં દુહ્રતે ગાવો અસ્ય વવ્રિં વસાના ઉદકં પદાપુઃ ॥ ૧.૧૬૪.૦૭
માતા પિતરમૃત આ બભાજ ધીત્યગ્રે મનસા સં હિ જગ્મે ।
સા બીભત્સુર્ગર્ભરસા નિવિદ્ધા નમસ્વન્ત ઇદુપવાકમીયુઃ ॥ ૧.૧૬૪.૦૮
યુક્તા માતાસીદ્ધુરિ દક્ષિણાયા અતિષ્ઠદ્ગર્ભો વૃજનીષ્વન્તઃ ।
અમીમેદ્વત્સો અનુ ગામપશ્યદ્વિશ્વરૂપ્યં ત્રિષુ યોજનેષુ ॥ ૧.૧૬૪.૦૯
તિસ્રો માતૄસ્ત્રીન્પિતૄન્બિભ્રદેક ઊર્ધ્વસ્તસ્થૌ નેમવ ગ્લાપયન્તિ ।
મન્ત્રયન્તે દિવો અમુષ્ય પૃષ્ઠે વિશ્વવિદં વાચમવિશ્વમિન્વામ્ ॥ ૧.૧૬૪.૧૦

દ્વાદશારં નહિ તજ્જરાય વર્વર્તિ ચક્રં પરિ દ્યામૃતસ્ય ।
આ પુત્રા અગ્ને મિથુનાસો અત્ર સપ્ત શતાનિ વિંશતિશ્ચ તસ્થુઃ ॥ ૧.૧૬૪.૧૧
પઞ્ચપાદં પિતરં દ્વાદશાકૃતિં દિવ આહુઃ પરે અર્ધે પુરીષિણમ્ ।
અથેમે અન્ય ઉપરે વિચક્ષણં સપ્તચક્રે ષળર આહુરર્પિતમ્ ॥ ૧.૧૬૪.૧૨
પઞ્ચારે ચક્રે પરિવર્તમાને તસ્મિન્ના તસ્થુર્ભુવનાનિ વિશ્વા ।
તસ્ય નાક્ષસ્તપ્યતે ભૂરિભારઃ સનાદેવ ન શીર્યતે સનાભિઃ ॥ ૧.૧૬૪.૧૩
સનેમિ ચક્રમજરં વિ વાવૃત ઉત્તાનાયાં દશ યુક્તા વહન્તિ ।
સૂર્યસ્ય ચક્ષૂ રજસૈત્યાવૃતં તસ્મિન્નાર્પિતા ભુવનાનિ વિશ્વા ॥ ૧.૧૬૪.૧૪
સાકંજાનાં સપ્તથમાહુરેકજં ષળિદ્યમા ઋષયો દેવજા ઇતિ ।
તેષામિષ્ટાનિ વિહિતાનિ ધામશઃ સ્થાત્રે રેજન્તે વિકૃતાનિ રૂપશઃ ॥ ૧.૧૬૪.૧૫
સ્ત્રિયઃ સતીસ્તાઁ ઉ મે પુંસ આહુઃ પશ્યદક્ષણ્વાન્ન વિ ચેતદન્ધઃ ।
કવિર્યઃ પુત્રઃ સ ઈમા ચિકેત યસ્તા વિજાનાત્સ પિતુષ્પિતાસત્ ॥ ૧.૧૬૪.૧૬
અવઃ પરેણ પર એનાવરેણ પદા વત્સં બિભ્રતી ગૌરુદસ્થાત્ ।
સા કદ્રીચી કં સ્વિદર્ધં પરાગાત્ક્વ સ્વિત્સૂતે નહિ યૂથે અન્તઃ ॥ ૧.૧૬૪.૧૭
અવઃ પરેણ પિતરં યો અસ્યાનુવેદ પર એનાવરેણ ।
કવીયમાનઃ ક ઇહ પ્ર વોચદ્દેવં મનઃ કુતો અધિ પ્રજાતમ્ ॥ ૧.૧૬૪.૧૮
યે અર્વાઞ્ચસ્તાઁ ઉ પરાચ આહુર્યે પરાઞ્ચસ્તાઁ ઉ અર્વાચ આહુઃ ।
ઇન્દ્રશ્ચ યા ચક્રથુઃ સોમ તાનિ ધુરા ન યુક્તા રજસો વહન્તિ ॥ ૧.૧૬૪.૧૯
દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિ ષસ્વજાતે ।
તયોરન્યઃ પિપ્પલં સ્વાદ્વત્ત્યનશ્નન્નન્યો અભિ ચાકશીતિ ॥ ૧.૧૬૪.૨૦
યત્રા સુપર્ણા અમૃતસ્ય ભાગમનિમેષં વિદથાભિસ્વરન્તિ ।
ઇનો વિશ્વસ્ય ભુવનસ્ય ગોપાઃ સ મા ધીરઃ પાકમત્રા વિવેશ ॥ ૧.૧૬૪.૨૧
યસ્મિન્વૃક્ષે મધ્વદઃ સુપર્ણા નિવિશન્તે સુવતે ચાધિ વિશ્વે ।
તસ્યેદાહુઃ પિપ્પલં સ્વાદ્વગ્રે તન્નોન્નશદ્યઃ પિતરં ન વેદ ॥ ૧.૧૬૪.૨૨
યદ્ગાયત્રે અધિ ગાયત્રમાહિતં ત્રૈષ્ટુભાદ્વા ત્રૈષ્ટુભં નિરતક્ષત ।
યદ્વા જગજ્જગત્યાહિતં પદં ય ઇત્તદ્વિદુસ્તે અમૃતત્વમાનશુઃ ॥ ૧.૧૬૪.૨૩
ગાયત્રેણ પ્રતિ મિમીતે અર્કમર્કેણ સામ ત્રૈષ્ટુભેન વાકમ્ ।

વાકેન વાકં દ્વિપદા ચતુષ્પદાક્ષરેણ મિમતે સપ્ત વાણીઃ ॥ ૧.૧૬૪.૨૪
જગતા સિન્ધું દિવ્યસ્તભાયદ્રથંતરે સૂર્યં પર્યપશ્યત્ ।
ગાયત્રસ્ય સમિધસ્તિસ્ર આહુસ્તતો મહ્ના પ્ર રિરિચે મહિત્વા ॥ ૧.૧૬૪.૨૫
ઉપ હ્વયે સુદુઘાં ધેનુમેતાં સુહસ્તો ગોધુગુત દોહદેનામ્ ।
શ્રેષ્ઠં સવં સવિતા સાવિષન્નોઽભીદ્ધો ઘર્મસ્તદુ ષુ પ્ર વોચમ્ ॥ ૧.૧૬૪.૨૬
હિઙ્કૃણ્વતી વસુપત્ની વસૂનાં વત્સમિચ્છન્તી મનસાભ્યાગાત્ ।
દુહામશ્વિભ્યાં પયો અઘ્ન્યેયં સા વર્ધતાં મહતે સૌભગાય ॥ ૧.૧૬૪.૨૭
ગૌરમીમેદનુ વત્સં મિષન્તં મૂર્ધાનં હિઙ્ઙકૃણોન્માતવા ઉ ।
સૃક્વાણં ઘર્મમભિ વાવશાના મિમાતિ માયું પયતે પયોભિઃ ॥ ૧.૧૬૪.૨૮
અયં સ શિઙ્ક્તે યેન ગૌરભીવૃતા મિમાતિ માયું ધ્વસનાવધિ શ્રિતા ।
સા ચિત્તિભિર્નિ હિ ચકાર મર્ત્યં વિદ્યુદ્ભવન્તી પ્રતિ વવ્રિમૌહત ॥ ૧.૧૬૪.૨૯
અનચ્છયે તુરગાતુ જીવમેજદ્ધ્રુવં મધ્ય આ પસ્ત્યાનામ્ ।
જીવો મૃતસ્ય ચરતિ સ્વધાભિરમર્ત્યો મર્ત્યેના સયોનિઃ ॥ ૧.૧૬૪.૩૦
અપશ્યં ગોપામનિપદ્યમાનમા ચ પરા ચ પથિભિશ્ચરન્તમ્ ।
સ સધ્રીચીઃ સ વિષૂચીર્વસાન આ વરીવર્તિ ભુવનેષ્વન્તઃ ॥ ૧.૧૬૪.૩૧
ય ઈં ચકાર ન સો અસ્ય વેદ ય ઈં દદર્શ હિરુગિન્નુ તસ્માત્ ।
સ માતુર્યોના પરિવીતો અન્તર્બહુપ્રજા નિરૃતિમા વિવેશ ॥ ૧.૧૬૪.૩૨
દ્યૌર્મે પિતા જનિતા નાભિરત્ર બન્ધુર્મે માતા પૃથિવી મહીયમ્ ।
ઉત્તાનયોશ્ચમ્વોરુર્યોનિરન્તરત્રા પિતા દુહિતુર્ગર્ભમાધાત્ ॥ ૧.૧૬૪.૩૩
પૃચ્છામિ ત્વા પરમન્તં પૃથિવ્યાઃ પૃચ્છામિ યત્ર ભુવનસ્ય નાભિઃ ।
પૃચ્છામિ ત્વા વૃષ્ણો અશ્વસ્ય રેતઃ પૃચ્છામિ વાચઃ પરમં વ્યોમ ॥ ૧.૧૬૪.૩૪
ઇયં વેદિઃ પરો અન્તઃ પૃથિવ્યા અયં યજ્ઞો ભુવનસ્ય નાભિઃ ।
અયં સોમો વૃષ્ણો અશ્વસ્ય રેતો બ્રહ્માયં વાચઃ પરમં વ્યોમ ॥ ૧.૧૬૪.૩૫
સપ્તાર્ધગર્ભા ભુવનસ્ય રેતો વિષ્ણોસ્તિષ્ઠન્તિ પ્રદિશા વિધર્મણિ ।
તે ધીતિભિર્મનસા તે વિપશ્ચિતઃ પરિભુવઃ પરિ ભવન્તિ વિશ્વતઃ ॥ ૧.૧૬૪.૩૬
ન વિ જાનામિ યદિવેદમસ્મિ નિણ્યઃ સંનદ્ધો મનસા ચરામિ ।
યદા માગન્પ્રથમજા ઋતસ્યાદિદ્વાચો અશ્નુવે ભાગમસ્યાઃ ॥ ૧.૧૬૪.૩૭

અપાઙ્પ્રાઙેતિ સ્વધયા ગૃભીતોઽમર્ત્યો મર્ત્યેના સયોનિઃ ।
તા શશ્વન્તા વિષૂચીના વિયન્તા ન્ય૧ન્યં ચિક્યુર્ન નિ ચિક્યુરન્યમ્ ॥ ૧.૧૬૪.૩૮
ઋચો અક્ષરે પરમે વ્યોમન્યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ ૧.૧૬૪.૩૯
સૂયવસાદ્ભગવતી હિ ભૂયા અથો વયં ભગવન્તઃ સ્યામ ।
અદ્ધિ તૃણમઘ્ન્યે વિશ્વદાનીં પિબ શુદ્ધમુદકમાચરન્તી ॥ ૧.૧૬૪.૪૦
ગૌરીર્મિમાય સલિલાનિ તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી સહસ્રાક્ષરા પરમે વ્યોમન્ ॥ ૧.૧૬૪.૪૧
તસ્યાઃ સમુદ્રા અધિ વિ ક્ષરન્તિ તેન જીવન્તિ પ્રદિશશ્ચતસ્રઃ ।
તતઃ ક્ષરત્યક્ષરં તદ્વિશ્વમુપ જીવતિ ॥ ૧.૧૬૪.૪૨
શકમયં ધૂમમારાદપશ્યં વિષૂવતા પર એનાવરેણ ।
ઉક્ષાણં પૃશ્નિમપચન્ત વીરાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ॥ ૧.૧૬૪.૪૩
ત્રયઃ કેશિન ઋતુથા વિ ચક્ષતે સંવત્સરે વપત એક એષામ્ ।
વિશ્વમેકો અભિ ચષ્ટે શચીભિર્ધ્રાજિરેકસ્ય દદૃશે ન રૂપમ્ ॥ ૧.૧૬૪.૪૪
ચત્વારિ વાક્પરિમિતા પદાનિ તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ ।
ગુહા ત્રીણિ નિહિતા નેઙ્ગયન્તિ તુરીયં વાચો મનુષ્યા વદન્તિ ॥ ૧.૧૬૪.૪૫
ઇન્દ્રં મિત્રં વરુણમગ્નિમાહુરથો દિવ્યઃ સ સુપર્ણો ગરુત્માન્ ।
એકં સદ્વિપ્રા બહુધા વદન્ત્યગ્નિં યમં માતરિશ્વાનમાહુઃ ॥ ૧.૧૬૪.૪૬
કૃષ્ણં નિયાનં હરયઃ સુપર્ણા અપો વસાના દિવમુત્પતન્તિ ।
ત આવવૃત્રન્સદનાદૃતસ્યાદિદ્ઘૃતેન પૃથિવી વ્યુદ્યતે ॥ ૧.૧૬૪.૪૭
દ્વાદશ પ્રધયશ્ચક્રમેકં ત્રીણિ નભ્યાનિ ક ઉ તચ્ચિકેત ।
તસ્મિન્સાકં ત્રિશતા ન શઙ્કવોઽર્પિતાઃ ષષ્ટિર્ન ચલાચલાસઃ ॥ ૧.૧૬૪.૪૮
યસ્તે સ્તનઃ શશયો યો મયોભૂર્યેન વિશ્વા પુષ્યસિ વાર્યાણિ ।
યો રત્નધા વસુવિદ્યઃ સુદત્રઃ સરસ્વતિ તમિહ ધાતવે કઃ ॥ ૧.૧૬૪.૪૯
યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્ત યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૧.૧૬૪.૫૦
સમાનમેતદુદકમુચ્ચૈત્યવ ચાહભિઃ ।

ભૂમિં પર્જન્યા જિન્વન્તિ દિવં જિન્વન્ત્યગ્નયઃ ॥ ૧.૧૬૪.૫૧

દિવ્યં સુપર્ણં વાયસં બૃહન્તમપાં ગર્ભં દર્શતમોષધીનામ્ ।

અભીપતો વૃષ્ટિભિસ્તર્પયન્તં સરસ્વન્તમવસે જોહવીમિ ॥ ૧.૧૬૪.૫૨

કયા શુભા સવયસઃ સનીળાઃ સમાન્યા મરુતઃ સં મિમિક્ષુઃ ।

કયા મતી કુત એતાસ એતેઽર્ચન્તિ શુષ્મં વૃષણો વસૂયા ॥ ૧.૧૬૫.૦૧

કસ્ય બ્રહ્માણિ જુજુષુર્યુવાનઃ કો અધ્વરે મરુત આ વવર્ત ।

શ્યેનાઁ ઇવ ધ્રજતો અન્તરિક્ષે કેન મહા મનસા રીરમામ ॥ ૧.૧૬૫.૦૨

કુતસ્ત્વમિન્દ્ર માહિનઃ સન્નેકો યાસિ સત્પતે કિં ત ઇત્થા ।

સં પૃચ્છસે સમરાણઃ શુભાનૈર્વોચેસ્તન્નો હરિવો યત્તે અસ્મે ॥ ૧.૧૬૫.૦૩

બ્રહ્માણિ મે મતયઃ શં સુતાસઃ શુષ્મ ઇયર્તિ પ્રભૃતો મે અદ્રિઃ ।

આ શાસતે પ્રતિ હર્યન્ત્યુક્થેમા હરી વહતસ્તા નો અચ્છ ॥ ૧.૧૬૫.૦૪

અતો વયમન્તમેભિર્યુજાનાઃ સ્વક્ષત્રેભિસ્તન્વ૧ઃ શુમ્ભમાનાઃ ।

મહોભિરેતાઁ ઉપ યુજ્મહે ન્વિન્દ્ર સ્વધામનુ હિ નો બભૂથ ॥ ૧.૧૬૫.૦૫

ક્વ૧ સ્યા વો મરુતઃ સ્વધાસીદ્યન્મામેકં સમધત્તાહિહત્યે ।

અહં હ્યુ૧ગ્રસ્તવિષસ્તુવિષ્માન્વિશ્વસ્ય શત્રોરનમં વધસ્નૈઃ ॥ ૧.૧૬૫.૦૬

ભૂરિ ચકર્થ યુજ્યેભિરસ્મે સમાનેભિર્વૃષભ પૌંસ્યેભિઃ ।

ભૂરીણિ હિ કૃણવામા શવિષ્ઠેન્દ્ર ક્રત્વા મરુતો યદ્વશામ ॥ ૧.૧૬૫.૦૭

વધીં વૃત્રં મરુત ઇન્દ્રિયેણ સ્વેન ભામેન તવિષો બભૂવાન્ ।

અહમેતા મનવે વિશ્વશ્ચન્દ્રાઃ સુગા અપશ્ચકર વજ્રબાહુઃ ॥ ૧.૧૬૫.૦૮

અનુત્તમા તે મઘવન્નકિર્નુ ન ત્વાવાઁ અસ્તિ દેવતા વિદાનઃ ।

ન જાયમાનો નશતે ન જાતો યાનિ કરિષ્યા કૃણુહિ પ્રવૃદ્ધ ॥ ૧.૧૬૫.૦૯

એકસ્ય ચિન્મે વિભ્વ૧સ્ત્વોજો યા નુ દધૃષ્વાન્કૃણવૈ મનીષા ।

અહં હ્યુ૧ગ્રો મરુતો વિદાનો યાનિ ચ્યવમિન્દ્ર ઇદીશ એષામ્ ॥ ૧.૧૬૫.૧૦

અમન્દન્મા મરુતઃ સ્તોમો અત્ર યન્મે નરઃ શ્રુત્યં બ્રહ્મ ચક્ર ।

ઇન્દ્રાય વૃષ્ણે સુમખાય મહ્યં સખ્યે સખાયસ્તન્વે તનૂભિઃ ॥ ૧.૧૬૫.૧૧

એવેદેતે પ્રતિ મા રોચમાના અનેદ્યઃ શ્રવ એષો દધાનાઃ ।

સંચક્ષ્યા મરુતશ્ચન્દ્રવર્ણા અચ્છાન્ત મે છદયાથા ચ નૂનમ્ ॥ ૧.૧૬૫.૧૨

કો ન્વત્ર મરુતો મામહે વઃ પ્ર યાતન સખીઁરચ્છા સખાયઃ ।
મન્માનિ ચિત્રા અપિવાતયન્ત એષાં ભૂત નવેદા મ ઋતાનામ્ ॥ ૧.૧૬૫.૧૩
આ યદ્દુવસ્યાદ્દુવસે ન કારુરસ્માઞ્ચક્રે માન્યસ્ય મેધા ।
ઓ ષુ વર્ત્ત મરુતો વિપ્રમચ્છેમા બ્રહ્માણિ જરિતા વો અર્ચત્ ॥ ૧.૧૬૫.૧૪
એષ વઃ સ્તોમો મરુત ઇયં ગીર્માન્દાર્યસ્ય માન્યસ્ય કારોઃ ।
એષા યાસીષ્ટ તન્વે વયાં વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૬૫.૧૫

તન્નુ વોચામ રભસાય જન્મને પૂર્વં મહિત્વં વૃષભસ્ય કેતવે ।
ઐધેવ યામન્મરુતસ્તુવિષ્વણો યુધેવ શક્રાસ્તવિષાણિ કર્તન ॥ ૧.૧૬૬.૦૧
નિત્યં ન સૂનું મધુ બિભ્રત ઉપ ક્રીળન્તિ ક્રીળા વિદથેષુ ઘૃષ્વયઃ ।
નક્ષન્તિ રુદ્રા અવસા નમસ્વિનં ન મર્ધન્તિ સ્વતવસો હવિષ્કૃતમ્ ॥ ૧.૧૬૬.૦૨
યસ્મા ઊમાસો અમૃતા અરાસત રાયસ્પોષં ચ હવિષા દદાશુષે ।
ઉક્ષન્ત્યસ્મૈ મરુતો હિતા ઇવ પુરૂ રજાંસિ પયસા મયોભુવઃ ॥ ૧.૧૬૬.૦૩
આ યે રજાંસિ તવિષીભિરવ્યત પ્ર વ એવાસઃ સ્વયતાસો અધ્રજન્ ।
ભયન્તે વિશ્વા ભુવનાનિ હર્મ્યા ચિત્રો વો યામઃ પ્રયતાસ્વૃષ્ટિષુ ॥ ૧.૧૬૬.૦૪
યત્ત્વેષયામા નદયન્ત પર્વતાન્દિવો વા પૃષ્ઠં નર્યા અચુચ્યવુઃ ।
વિશ્વો વો અજ્મન્ભયતે વનસ્પતી રથીયન્તીવ પ્ર જિહીત ઓષધિઃ ॥ ૧.૧૬૬.૦૫
યૂયં ન ઉગ્રા મરુતઃ સુચેતુનારિષ્ટગ્રામાઃ સુમતિં પિપર્તન ।
યત્રા વો દિદ્યુદ્રદતિ ક્રિવિર્દતી રિણાતિ પશ્વઃ સુધિતેવ બર્હણા ॥ ૧.૧૬૬.૦૬
પ્ર સ્કમ્ભદેષ્ણા અનવભ્રરાધસોઽલાતૃણાસો વિદથેષુ સુષ્ટુતાઃ ।
અર્ચન્ત્યર્કં મદિરસ્ય પીતયે વિદુર્વીરસ્ય પ્રથમાનિ પૌંસ્યા ॥ ૧.૧૬૬.૦૭
શતભુજિભિસ્તમભિહ્રુતેરઘાત્પૂર્ભી રક્ષતા મરુતો યમાવત ।
જનં યમુગ્રાસ્તવસો વિરપ્શિનઃ પાથના શંસાત્તનયસ્ય પુષ્ટિષુ ॥ ૧.૧૬૬.૦૮
વિશ્વાનિ ભદ્રા મરુતો રથેષુ વો મિથસ્પૃધ્યેવ તવિષાણ્યાહિતા ।
અંસેષ્વા વઃ પ્રપથેષુ ખાદયોઽક્ષો વશ્ચક્રા સમયા વિ વાવૃતે ॥ ૧.૧૬૬.૦૯
ભૂરીણિ ભદ્રા નર્યેષુ બાહુષુ વક્ષસ્સુ રુક્મા રભસાસો અઞ્જયઃ ।
અંસેષ્વેતાઃ પવિષુ ક્ષુરા અધિ વયો ન પક્ષાન્વ્યનુ શ્રિયો ધિરે ॥ ૧.૧૬૬.૧૦
મહાન્તો મહ્ના વિભ્વોઽ વિભૂતયો દૂરેદૃશો યે દિવ્યા ઇવ સ્તૃભિઃ ।

મન્દ્રાઃ સુજિહ્વાઃ સ્વરિતાર આસભિઃ સમ્મિશ્લા ઇન્દ્રે મરુતઃ પરિષ્ટુભઃ ॥ ૧.૧૬૬.૧૧
તદ્વઃ સુજાતા મરુતો મહિત્વનં દીર્ઘં વો દાત્રમદિતેરિવ વ્રતમ્ ।
ઇન્દ્રશ્ચન ત્યજસા વિ હ્રુણાતિ તજ્જનાય યસ્મૈ સુકૃતે અરાધ્વમ્ ॥ ૧.૧૬૬.૧૨
તદ્વો જામિત્વં મરુતઃ પરે યુગે પુરૂ યચ્છંસમમૃતાસ આવત ।
અયા ધિયા મનવે શ્રુષ્ટિમાવ્યા સાકં નરો દંસનૈરા ચિકિત્રિરે ॥ ૧.૧૬૬.૧૩
યેન દીર્ઘં મરુતઃ શૂશવામ યુષ્માકેન પરીણસા તુરાસઃ ।
આ યત્તતનન્વૃજને જનાસ એભિર્યજ્ઞેભિસ્તદભીષ્ટિમશ્યામ્ ॥ ૧.૧૬૬.૧૪
એષ વઃ સ્તોમો મરુત ઇયં ગીર્માન્દાર્યસ્ય માન્યસ્ય કારોઃ ।
એષા યાસીષ્ટ તન્વે વયાં વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૬૬.૧૫

સહસ્રં ત ઇન્દ્રોતયો નઃ સહસ્રમિષો હરિવો ગૂર્તતમાઃ ।
સહસ્રં રાયો માદયધ્યૈ સહસ્રિણ ઉપ નો યન્તુ વાજાઃ ॥ ૧.૧૬૭.૦૧
આ નોડવોભિર્મરુતો યાન્ત્વચ્છા જ્યેષ્ઠેભિર્વા બૃહદ્દિવૈઃ સુમાયાઃ ।
અધ યદેષાં નિયુતઃ પરમાઃ સમુદ્રસ્ય ચિદ્ધનયન્ત પારે ॥ ૧.૧૬૭.૦૨
મિમ્યક્ષ યેષુ સુધિતા ઘૃતાચી હિરણ્યનિર્ણિગુપરા ન ઋષ્ટિઃ ।
ગુહા ચરન્તી મનુષો ન યોષા સભાવતી વિદથ્યેવ સં વાક્ ॥ ૧.૧૬૭.૦૩
પરા શુભ્રા અયાસો યવ્યા સાધારણ્યેવ મરુતો મિમિક્ષુઃ ।
ન રોદસી અપ નુદન્ત ઘોરા જુષન્ત વૃધં સખ્યાય દેવાઃ ॥ ૧.૧૬૭.૦૪
જોષદ્યદીમસુર્યા સચધ્યૈ વિષિતસ્તુકા રોદસી નૃમણાઃ ।
આ સૂર્યેવ વિધતો રથં ગાત્ત્વેષપ્રતીકા નભસો નેત્યા ॥ ૧.૧૬૭.૦૫
આસ્થાપયન્ત યુવતિં યુવાનઃ શુભે નિમિશ્લાં વિદથેષુ પજ્રામ્ ।
અર્કો યદ્વો મરુતો હવિષ્માન્ગાયદ્ગાથં સુતસોમો દુવસ્યન્ ॥ ૧.૧૬૭.૦૬
પ્ર તં વિવક્મિ વક્મ્યો ય એષાં મરુતાં મહિમા સત્યો અસ્તિ ।
સચા યદીં વૃષમણા અહંયુઃ સ્થિરા ચિજ્જનીર્વહતે સુભાગાઃ ॥ ૧.૧૬૭.૦૭
પાન્તિ મિત્રાવરુણાવવદ્યાચ્ચયત ઈમર્યમો અપ્રશસ્તાન્ ।
ઉત ચ્યવન્તે અચ્યુતા ધ્રુવાણિ વાવૃધ ઈં મરુતો દાતિવારઃ ॥ ૧.૧૬૭.૦૮
નહી નુ વો મરુતો અન્ત્યસ્મે આરાત્તાચ્ચિચ્છવસો અન્તમાપુઃ ।
તે ધૃષ્ણુના શવસા શૂશુવાંસોડર્ણો ન દ્વેષો ધૃષતા પરિ ષ્ઠુઃ ॥ ૧.૧૬૭.૦૯

વયમદ્યેન્દ્રસ્ય પ્રેષ્ઠા વયં શ્વો વોચેમહિ સમર્યે ।
વયં પુરા મહિ ચ નો અનુ દ્યૂન્તન્ન ઋભુક્ષા નરામનુ ષ્યાત્ ॥ ૧.૧૬૭.૧૦
એષ વઃ સ્તોમો મરુત ઇયં ગીર્માન્દાર્યસ્ય માન્યસ્ય કારોઃ ।
એષા યાસીષ્ટ તન્વે વયાં વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૬૭.૧૧

યજ્ઞાયજ્ઞા વઃ સમના તુતુર્વણિર્ધિયંધિયં વો દેવયા ઉ દધિધ્વે ।
આ વોઽર્વાચઃ સુવિતાય રોદસ્યોર્મહે વવૃત્યામવસે સુવૃક્તિભિઃ ॥ ૧.૧૬૮.૦૧
વવ્રાસો ન યે સ્વજાઃ સ્વતવસ ઇષં સ્વરભિજાયન્ત ધૂતયઃ ।
સહસ્રિયાસો અપાં નોર્મય આસા ગાવો વન્દ્યાસો નોક્ષણઃ ॥ ૧.૧૬૮.૦૨
સોમાસો ન યે સુતાસ્તૃપ્તાંશવો હૃત્સુ પીતાસો દુવસો નાસતે ।
ઐષામંસેષુ રમ્ભિણીવ રારભે હસ્તેષુ ખાદિશ્ચ કૃતિશ્ચ સં દધે ॥ ૧.૧૬૮.૦૩
અવ સ્વયુક્તા દિવ આ વૃથા યયુરમર્ત્યાઃ કશયા ચોદત ત્મના ।
અરેણવસ્તુવિજાતા અચુચ્યવુર્દૃળ્હાનિ ચિન્મરુતો ભ્રાજદૃષ્ટયઃ ॥ ૧.૧૬૮.૦૪
કો વોઽન્તર્મરુત ઋષ્ટિવિદ્યુતો રેજતિ ત્મના હન્વેવ જિહ્વયા ।
ધન્વચ્યુત ઇષાં ન યામનિ પુરુપ્રૈષા અહન્યોઉ નૈતશઃ ॥ ૧.૧૬૮.૦૫
ક્વ સ્વિદસ્ય રજસો મહસ્પરં ક્વાવરં મરુતો યસ્મિન્નાયય ।
યચ્ચ્યાવયથ વિથુરેવ સંહિતં વ્યદ્રિણા પતથ ત્વેષમર્ણવમ્ ॥ ૧.૧૬૮.૦૬
સાતિર્ન વોઽમવતી સ્વર્વતી ત્વેષા વિપાકા મરુતઃ પિપિષ્વતી ।
ભદ્રા વો રાતિઃ પૃણતો ન દક્ષિણા પૃથુજ્રયી અસુર્યેવ જઞ્જતી ॥ ૧.૧૬૮.૦૭
પ્રતિ ષ્ટોભન્તિ સિન્ધવઃ પવિભ્યો યદભ્રિયાં વાચમુદીરયન્તિ ।
અવ સ્મયન્ત વિદ્યુતઃ પૃથિવ્યાં યદી ઘૃતં મરુતઃ પ્રુષ્ણુવન્તિ ॥ ૧.૧૬૮.૦૮
અસૂત પૃશ્નિર્મહતે રણાય ત્વેષમયાસાં મરુતામનીકમ્ ।
તે સપ્સરાસોઽજનયન્તાભ્વમાદિત્સ્વધામિષિરાં પર્યપશ્યન્ ॥ ૧.૧૬૮.૦૯
એષ વઃ સ્તોમો મરુત ઇયં ગીર્માન્દાર્યસ્ય માન્યસ્ય કારોઃ ।
એષા યાસીષ્ટ તન્વે વયાં વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૬૮.૧૦

મહશ્ચિત્ત્વમિન્દ્ર યત એતાન્મહશ્ચિદસિ ત્યજસો વરૂતા ।
સ નો વેધો મરુતાં ચિકિત્વાન્સુમ્ના વનુષ્વ તવ હિ પ્રેષ્ઠા ॥ ૧.૧૬૯.૦૧
અયુજ્રન્ત ઇન્દ્ર વિશ્વકૃષ્ટીર્વિદાનાસો નિષ્ષિધો મર્ત્યત્રા ।

મરુતાં પૃત્સુતિર્હાસમાના સ્વર્મીળ્હસ્ય પ્રધનસ્ય સાતૌ ॥ ૧.૧૬૯.૦૨
અમ્યક્સા ત ઇન્દ્ર ઋષ્ટિરસ્મે સનેમ્યભ્વં મરુતો જુનન્તિ ।
અગ્નિશ્ચિદ્ધિ ષ્માતસે શુશુક્વાનાપો ન દ્વીપં દધતિ પ્રયાંસિ ॥ ૧.૧૬૯.૦૩
ત્વં તૂ ન ઇન્દ્ર તં રયિં દા ઓજિષ્ઠયા દક્ષિણયેવ રાતિમ્ ।
સ્તુતશ્ચ યાસ્તે ચકનન્ત વાયોઃ સ્તનં ન મધ્વઃ પીપયન્ત વાજૈઃ ॥ ૧.૧૬૯.૦૪
ત્વે રાય ઇન્દ્ર તોશતમાઃ પ્રણેતારઃ કસ્ય ચિદૃતાયોઃ ।
તે ષુ ણો મરુતો મૃળયન્તુ યે સ્મા પુરા ગાતૂયન્તીવ દેવાઃ ॥ ૧.૧૬૯.૦૫
પ્રતિ પ્ર યાહીન્દ્ર મીળ્હુષો નૄન્મહઃ પાર્થિવે સદને યતસ્વ ।
અધ યદેષાં પૃથુબુધ્નાસ એતાસ્તીર્થે નાર્યઃ પૌંસ્યાનિ તસ્થુઃ ॥ ૧.૧૬૯.૦૬
પ્રતિ ઘોરાણામેતાનામયાસાં મરુતાં શ઼ૃણ્વ આયતામુપબ્દિઃ ।
યે મર્ત્યં પૃતનાયન્તમૂમૈરૃણાવાનં ન પતયન્ત સર્ગૈઃ ॥ ૧.૧૬૯.૦૭
ત્વં માનેભ્ય ઇન્દ્ર વિશ્વજન્યા રદા મરુદ્ભિઃ શુરુધો ગોઅગ્રાઃ ।
સ્તવાનેભિઃ સ્તવસે દેવ દેવૈર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૬૯.૦૮

ન નૂનમસ્તિ નો શ્વઃ કસ્તદ્વેદ યદદ્ભુતમ્ ।
અન્યસ્ય ચિત્તમભિ સંચરેણ્યમુતાધીતં વિ નશ્યતિ ॥ ૧.૧૭૦.૦૧
કિં ન ઇન્દ્ર જિઘાંસસિ ભ્રાતરો મરુતસ્તવ ।
તેભિઃ કલ્પસ્વ સાધુયા મા નઃ સમરણે વધીઃ ॥ ૧.૧૭૦.૦૨
કિં નો ભ્રાતરગસ્ત્ય સખા સન્નતિ મન્યસે ।
વિદ્મા હિ તે યથા મનોઽસ્મભ્યમિન્ન દિત્સસિ ॥ ૧.૧૭૦.૦૩
અરં કૃણ્વન્તુ વેદિં સમગ્નિમિન્ધતાં પુરઃ ।
તત્રામૃતસ્ય ચેતનં યજ્ઞં તે તનવાવહૈ ॥ ૧.૧૭૦.૦૪
ત્વમીશિષે વસુપતે વસૂનાં ત્વં મિત્રાણાં મિત્રપતે ધેષ્ઠઃ ।
ઇન્દ્ર ત્વં મરુદ્ભિઃ સં વદસ્વાધ પ્રાશાન ઋતુથા હવીંષિ ॥ ૧.૧૭૦.૦૫
પ્રતિ વ એના નમસાહમેમિ સૂક્તેન ભિક્ષે સુમતિં તુરાણામ્ ।
રરાણતા મરુતો વેદ્યાભિર્નિ હેળો ધત્ત વિ મુચધ્વમશ્વાન્ ॥ ૧.૧૭૧.૦૧
એષ વઃ સ્તોમો મરુતો નમસ્વાન્હૃદા તષ્ટો મનસા ધાયિ દેવાઃ ।
ઉપેમા યાત મનસા જુષાણા યૂયં હિ ષ્ઠા નમસ ઇદ્વૃધાસઃ ॥ ૧.૧૭૧.૦૨

સ્તુતાસો નો મરુતો મૃળયન્તૂત સ્તુતો મઘવા શમ્ભવિષ્ઠઃ ।
ઊર્ધ્વા નઃ સન્તુ કોમ્યા વનાન્યહાનિ વિશ્વા મરુતો જિગીષા ॥ ૧.૧૭૧.૦૩
અસ્માદહં તવિષાદીષમાણ ઇન્દ્રાદ્ભિયા મરુતો રેજમાનઃ ।
યુષ્મભ્યં હવ્યા નિશિતાન્યાસન્તાન્યારે ચકૃમા મૃળતા નઃ ॥ ૧.૧૭૧.૦૪
યેન માનાસશ્ચિતયન્ત ઉસ્રા વ્યુષ્ટિષુ શવસા શશ્વતીનામ્ ।
સ નો મરુદ્ભિર્વૃષભ શ્રવો ધા ઉગ્ર ઉગ્રેભિઃ સ્થવિરઃ સહોદાઃ ॥ ૧.૧૭૧.૦૫
ત્વં પાહીન્દ્ર સહીયસો નૄન્ભવા મરુદ્ભિરવયાતહેળાઃ ।
સુપ્રકેતેભિઃ સાસહિર્દધાનો વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૧.૦૬

ચિત્રો વોઽસ્તુ યામશ્ચિત્ર ઊતી સુદાનવઃ ।
મરુતો અહિભાનવઃ ॥ ૧.૧૭૨.૦૧
આરે સા વઃ સુદાનવો મરુત ઋઞ્જતી શરુઃ ।
આરે અશ્મા યમસ્યથ ॥ ૧.૧૭૨.૦૨
તૃણસ્કન્દસ્ય નુ વિશઃ પરિ વૃઙ્ક્ત સુદાનવઃ ।
ઊર્ધ્વાન્નઃ કર્ત જીવસે ॥ ૧.૧૭૨.૦૩

ગાયત્સામ નભન્યં૧ યથા વેરર્ચામ તદ્વાવૃધાનં સ્વર્વત્ ।
ગાવો ધેનવો બર્હિષ્યદબ્ધા આ યત્સદ્માનં દિવ્યં વિવાસાન્ ॥ ૧.૧૭૩.૦૧
અર્ચદ્વૃષા વૃષભિઃ સ્વેદુહવ્યૈર્મૃગો નાશ્નો અતિ યજ્જુગુર્યાત્ ।
પ્ર મન્દયુર્મનાં ગૂર્ત હોતા ભરતે મર્યો મિથુના યજત્રઃ ॥ ૧.૧૭૩.૦૨
નક્ષદ્ધોતા પરિ સદ્મ મિતા યન્ભરદ્ગર્ભમા શરદઃ પૃથિવ્યાઃ ।
ક્રન્દદશ્વો નયમાનો રુવદ્ગૌરન્તર્દૂતો ન રોદસી ચરદ્વાક્ ॥ ૧.૧૭૩.૦૩
તા કર્માષતરાસ્મૈ પ્ર ચ્યૌત્નાનિ દેવયન્તો ભરન્તે ।
જુજોષદિન્દ્રો દસ્મવર્ચા નાસત્યેવ સુગ્મ્યો રથેષ્ઠાઃ ॥ ૧.૧૭૩.૦૪
તમુ ષ્ટુહીન્દ્રં યો હ સત્વા યઃ શૂરો મઘવા યો રથેષ્ઠાઃ ।
પ્રતીચશ્ચિદ્યોધીયાન્વૃષણ્વાન્વવવ્રુષશ્ચિત્તમસો વિહન્તા ॥ ૧.૧૭૩.૦૫
પ્ર યદિત્થા મહિના નૃભ્યો અસ્ત્યરં રોદસી કક્ષ્યે૩ નાસ્મૈ ।
સં વિવ્ય ઇન્દ્રો વૃજનં ન ભૂમા ભર્તિ સ્વધાવાઁ ઓપશમિવ દ્યામ્ ॥ ૧.૧૭૩.૦૬
સમત્સુ ત્વા શૂર સતામુરાણં પ્રપથિન્તમં પરિતંસયધ્યૈ ।

સજોષસ ઇન્દ્રં મદે ક્ષોણીઃ સૂરિં ચિદ્યે અનુમદન્તિ વાજૈઃ ॥ ૧.૧૭૩.૦૭
એવા હિ તે શં સવના સમુદ્ર આપો યત્ત આસુ મદન્તિ દેવીઃ ।
વિશ્વા તે અનુ જોષ્યા ભૂદ્ગૌઃ સૂરીઁશ્ચિદ્યદિ ધિષા વેષિ જનાન્ ॥ ૧.૧૭૩.૦૮
અસામ યથા સુષખાય એન સ્વભિષ્ટયો નરાં ન શંસૈઃ ।
અસદ્યથા ન ઇન્દ્રો વન્દનેષ્ઠાસ્તુરો ન કર્મ નયમાન ઉક્થા ॥ ૧.૧૭૩.૦૯
વિષ્પર્ધસો નરાં ન શંસૈરસ્માકાસદિન્દ્રો વજ્રહસ્તઃ ।
મિત્રાયુવો ન પૂર્પતિં સુશિષ્ટૌ મધ્યાયુવ ઉપ શિક્ષન્તિ યજ્ઞૈઃ ॥ ૧.૧૭૩.૧૦
યજ્ઞો હિ ષ્મેન્દ્રં કશ્ચિદૃન્ધઞ્જુહુરાણશ્ચિન્મનસા પરિયન્ ।
તીર્થે નાચ્છા તાતૃષાણમોકો દીર્ઘો ન સિધ્રમા કૃણોત્યધ્વા ॥ ૧.૧૭૩.૧૧
મો ષૂ ણ ઇન્દ્રાત્ર પૃત્સુ દેવૈરસ્તિ હિ ષ્મા તે શુષ્મિન્નવયાઃ ।
મહશ્ચિદ્યસ્ય મીળ્હુષો યવ્યા હવિષ્મતો મરુતો વન્દતે ગીઃ ॥ ૧.૧૭૩.૧૨
એષ સ્તોમ ઇન્દ્ર તુભ્યમસ્મે એતેન ગાતું હરિવો વિદો નઃ ।
આ નો વવૃત્યાઃ સુવિતાય દેવ વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૩.૧૩

ત્વં રાજેન્દ્ર યે ચ દેવા રક્ષા નૄન્પાહ્યસુર ત્વમસ્માન્ ।
ત્વં સત્પતિર્મઘવા નસ્તરુત્રસ્ત્વં સત્યો વસવાનઃ સહોદાઃ ॥ ૧.૧૭૪.૦૧
દનો વિશ ઇન્દ્ર મૃધ્રવાચઃ સપ્ત યત્પુરઃ શર્મ શારદીર્દર્ત્ ।
ઋણોરપો અનવદ્યાર્ણા યૂને વૃત્રં પુરુકુત્સાય રન્ધીઃ ॥ ૧.૧૭૪.૦૨
અજા વૃત ઇન્દ્ર શૂરપત્નીર્દ્યાં ચ યેભિઃ પુરુહૂત નૂનમ્ ।
રક્ષો અગ્નિમશુષં તૂર્વયાણં સિંહો ન દમે અપાંસિ વસ્તોઃ ॥ ૧.૧૭૪.૦૩
શેષન્નુ ત ઇન્દ્ર સસ્મિન્યોનૌ પ્રશસ્તયે પવીરવસ્ય મહ્ના ।
સૃજદર્ણાંસ્યવ યદ્યુધા ગાસ્તિષ્ઠદ્ધરી ધૃષતા મૃષ્ટ વાજાન્ ॥ ૧.૧૭૪.૦૪
વહ કુત્સમિન્દ્ર યસ્મિઞ્ચાકન્સ્યૂમન્યૂ ઋજ્રા વાતસ્યાશ્વા ।
પ્ર સૂરશ્ચક્રં વૃહતાદભીકેऽભિ સ્પૃધો યાસિષદ્વજ્રબાહુઃ ॥ ૧.૧૭૪.૦૫
જઘન્વાઁ ઇન્દ્ર મિત્રેરૂઞ્ચોદપ્રવૃદ્ધો હરિવો અદાશૂન્ ।
પ્ર યે પશ્યન્નર્યમણં સચાયોસ્ત્વયા શૂર્તા વહમાના અપત્યમ્ ॥ ૧.૧૭૪.૦૬
રપત્કવિરિન્દ્રાર્કસાતૌ ક્ષાં દાસાયોપબર્હણીં કઃ ।
કરત્તિસ્રો મઘવા દાનુચિત્રા નિ દુર્યોણે કુયવાચં મૃધિ શ્રેત્ ॥ ૧.૧૭૪.૦૭

સના તા ત ઇન્દ્ર નવ્યા આગુઃ સહો નભોઽવિરણાય પૂર્વીઃ ।
ભિનત્પુરો ન ભિદો અદેવીર્નનમો વધરદેવસ્ય પીયોઃ ॥ ૧.૧૭૪.૦૮
ત્વં ધુનિરિન્દ્ર ધુનિમતીરૃણોરપઃ સીરા ન સ્રવન્તીઃ ।
પ્ર યત્સમુદ્રમતિ શૂર પર્ષિ પારયા તુર્વશં યદું સ્વસ્તિ ॥ ૧.૧૭૪.૦૯
ત્વમસ્માકમિન્દ્ર વિશ્વધ સ્યા અવૃકતમો નરાં નૃપાતા ।
સ નો વિશ્વાસાં સ્પૃધાં સહોદા વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૪.૧૦

મત્સ્યપાયિ તે મહઃ પાત્રસ્યેવ હરિવો મત્સરો મદઃ ।
વૃષા તે વૃષ્ણ ઇન્દુર્વાજી સહસ્રસાતમઃ ॥ ૧.૧૭૫.૦૧
આ નસ્તે ગન્તુ મત્સરો વૃષા મદો વરેણ્યઃ ।
સહાવાઁ ઇન્દ્ર સાનસિઃ પૃતનાષાળમર્ત્યઃ ॥ ૧.૧૭૫.૦૨
ત્વં હિ શૂરઃ સનિતા ચોદયો મનુષો રથમ્ ।
સહાવાન્દસ્યુમવ્રતમોષઃ પાત્રં ન શોચિષા ॥ ૧.૧૭૫.૦૩
મુષાય સૂર્યં કવે ચક્રમીશાન ઓજસા ।
વહ શુષ્ણાય વધં કુત્સં વાતસ્યાશ્વૈઃ ॥ ૧.૧૭૫.૦૪
શુષ્મિન્તમો હિ તે મદો દ્યુમ્નિન્તમ ઉત ક્રતુઃ ।
વૃત્રઘ્ના વરિવોવિદા મંસીષ્ઠા અશ્વસાતમઃ ॥ ૧.૧૭૫.૦૫
યથા પૂર્વેભ્યો જરિતૃભ્ય ઇન્દ્ર મય ઇવાપો ન તૃષ્યતે બભૂથ ।
તામનુ ત્વા નિવિદં જોહવીમિ વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૫.૦૬

મત્સિ નો વસ્યઇષ્ટય ઇન્દ્રમિન્દો વૃષા વિશ ।
ઋઘાયમાણ ઇન્વસિ શત્રુમન્તિ ન વિન્દસિ ॥ ૧.૧૭૬.૦૧
તસ્મિન્ના વેશયા ગિરો ય એકશ્ચર્ષણીનામ્ ।
અનુ સ્વધા યમુપ્યતે યવં ન ચર્કૃષદ્વૃષા ॥ ૧.૧૭૬.૦૨
યસ્ય વિશ્વાનિ હસ્તયોઃ પઞ્ચ ક્ષિતીનાં વસુ ।
સ્પાશયસ્વ યો અસ્મધ્રુગ્દિવ્યેવાશનિર્જહિ ॥ ૧.૧૭૬.૦૩
અસુન્વન્તં સમં જહિ દૂણાશં યો ન તે મયઃ ।
અસ્મભ્યમસ્ય વેદનં દદ્ધિ સૂરિશ્ચિદોહતે ॥ ૧.૧૭૬.૦૪
આવો યસ્ય દ્વિબર્હસોઽર્કેષુ સાનુષગસત્ ।

આજાવિન્દ્રસ્યેન્દો પ્રાવો વાજેષુ વાજિનમ્ ॥ ૧.૧૭૬.૦૫
યથા પૂર્વેભ્યો જરિતૃભ્ય ઇન્દ્ર મય ઇવાપો ન તૃષ્યતે બભૂથ ।
તામનુ ત્વા નિવિદં જોહવીમિ વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૬.૦૬
આ ચર્ષણિપ્રા વૃષભો જનાનાં રાજા કૃષ્ટીનાં પુરુહૂત ઇન્દ્રઃ ।
સ્તુતઃ શ્રવસ્યન્નવસોપ મદ્રિગ્યુક્ત્વા હરી વૃષણા યાહ્યર્વાઙ્ ॥ ૧.૧૭૭.૦૧
યે તે વૃષણો વૃષભાસ ઇન્દ્ર બ્રહ્મયુજો વૃષરથાસો અત્યાઃ ।
તાઁ આ તિષ્ઠ તેભિરા યાહ્યર્વાઙ્હવામહે ત્વા સુત ઇન્દ્ર સોમે ॥ ૧.૧૭૭.૦૨
આ તિષ્ઠ રથં વૃષણં વૃષા તે સુતઃ સોમઃ પરિષિક્તા મધૂનિ ।
યુક્ત્વા વૃષભ્યાં વૃષભ ક્ષિતીનાં હરિભ્યાં યાહિ પ્રવતોપ મદ્રિક્ ॥ ૧.૧૭૭.૦૩
અયં યજ્ઞો દેવયા અયં મિયેધ ઇમા બ્રહ્માણ્યયમિન્દ્ર સોમઃ ।
સ્તીર્ણં બર્હિરા તુ શક્ર પ્ર યાહિ પિબા નિષદ્ય વિ મુચા હરી ઇહ ॥ ૧.૧૭૭.૦૪
ઓ સુષ્ટુત ઇન્દ્ર યાહ્યર્વાઙુપ બ્રહ્માણિ માન્યસ્ય કારોઃ ।
વિદ્યામ વસ્તોરવસા ગૃણન્તો વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૭.૦૫
યદ્ધ સ્યા ત ઇન્દ્ર શ્રુષ્ટિરસ્તિ યયા બભૂથ જરિતૃભ્ય ઊતી ।
મા નઃ કામં મહયન્તમા ધગ્વિશ્વા તે અશ્યાં પર્યાપ આયોઃ ॥ ૧.૧૭૮.૦૧
ન ઘા રાજેન્દ્ર આ દભન્નો યા નુ સ્વસારા કૃણવન્ત યોનૌ ।
આપશ્ચિદસ્મૈ સુતુકા અવેષન્ગમન્ન ઇન્દ્રઃ સખ્યા વયશ્ચ ॥ ૧.૧૭૮.૦૨
જેતા નૃભિરિન્દ્રઃ પૃત્સુ શૂરઃ શ્રોતા હવં નાધમાનસ્ય કારોઃ ।
પ્રભર્તા રથં દાશુષ ઉપાક ઉદ્યન્તા ગિરો યદિ ચ ત્મના ભૂત્ ॥ ૧.૧૭૮.૦૩
એવા નૃભિરિન્દ્રઃ સુશ્રવસ્યા પ્રખાદઃ પૃક્ષો અભિ મિત્રિણો ભૂત્ ।
સમર્ય ઇષઃ સ્તવતે વિવાચિ સત્રાકરો યજમાનસ્ય શંસઃ ॥ ૧.૧૭૮.૦૪
ત્વયા વયં મઘવન્નિન્દ્ર શત્રૂનભિ ષ્યામ મહતો મન્યમાનાન્ ।
ત્વં ત્રાતા ત્વમુ નો વૃધે ભૂર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૭૮.૦૫
પૂર્વીરહં શરદઃ શશ્રમાણા દોષા વસ્તોરુષસો જરયન્તીઃ ।
મિનાતિ શ્રિયં જરિમા તનૂનામપ્યૂ નુ પત્નીર્વૃષણો જગમ્યુઃ ॥ ૧.૧૭૯.૦૧
યે ચિદ્ધિ પૂર્વ ઋતસાપ આસન્સાકં દેવેભિરવદન્નૃતાનિ ।
તે ચિદવાસુર્નહ્યન્તમાપુઃ સમૂ નુ પત્નીર્વૃષભિર્જગમ્યુઃ ॥ ૧.૧૭૯.૦૨

ન મૃષા શ્રાન્તં યદવન્તિ દેવા વિશ્વા ઇત્સ્પૃધો અભ્યશ્નવાવ ।
જયાવેદત્ર શતનીથમાજિં યત્સમ્યઞ્ચા મિથુનાવભ્યજાવ ॥ ૧.૧૭૯.૦૩
નદસ્ય મા રુધતઃ કામ આગન્નિત આજાતો અમુતઃ કુતશ્ચિત્ ।
લોપામુદ્રા વૃષણં ની રિણાતિ ધીરમધીરા ધયતિ શ્વસન્તમ્ ॥ ૧.૧૭૯.૦૪
ઇમં નુ સોમમન્તિતો હૃત્સુ પીતમુપ બ્રુવે ।
યત્સીમાગશ્ચકૃમા તત્સુ મૃળતુ પુલુકામો હિ મર્ત્યઃ ॥ ૧.૧૭૯.૦૫
અગસ્ત્યઃ ખનમાનઃ ખનિત્રૈઃ પ્રજામપત્યં બલમિચ્છમાનઃ ।
ઉભૌ વર્ણાવૃષિરુગ્રઃ પુપોષ સત્યા દેવેષ્વાશિષો જગામ ॥ ૧.૧૭૯.૦૬
યુવો રજાંસિ સુયમાસો અશ્વા રથો યદ્વાં પર્યર્ણાંસિ દીયત્ ।
હિરણ્યયા વાં પવયઃ પ્રુષાયન્મધ્વઃ પિબન્તા ઉષસઃ સચેથે ॥ ૧.૧૮૦.૦૧
યુવમત્યસ્યાવ નક્ષથો યદ્વિપત્મનો નર્યસ્ય પ્રયજ્યોઃ ।
સ્વસા યદ્વાં વિશ્વગૂર્તી ભરાતિ વાજાયેટ્ટે મધુપાવિષે ચ ॥ ૧.૧૮૦.૦૨
યુવં પય ઉસ્રિયાયામધત્તં પક્વમામાયામવ પૂર્વ્યં ગોઃ ।
અન્તર્યદ્વનિનો વામૃતપ્સૂ હ્વારો ન શુચિર્યજતે હવિષ્માન્ ॥ ૧.૧૮૦.૦૩
યુવં હ ઘર્મં મધુમન્તમત્રયેઽપો ન ક્ષોદોઽવૃણીતમેષે ।
તદ્વાં નરાવશ્વિના પશ્વઇષ્ટી રથ્યેવ ચક્રા પ્રતિ યન્તિ મધ્વઃ ॥ ૧.૧૮૦.૦૪
આ વાં દાનાય વવૃતીય દસ્રા ગોરોહેણ તૌગ્ર્યો ન જિવ્રિઃ ।
અપઃ ક્ષોણી સચતે માહિના વાં જૂર્ણો વામક્ષુરંહસો યજત્રા ॥ ૧.૧૮૦.૦૫
નિ યદ્યુવેથે નિયુતઃ સુદાનૂ ઉપ સ્વધાભિઃ સૃજથઃ પુરંધિમ્ ।
પ્રેષદ્વેષદ્વાતો ન સૂરિરા મહે દદે સુવ્રતો ન વાજમ્ ॥ ૧.૧૮૦.૦૬
વયં ચિદ્ધિ વાં જરિતારઃ સત્યા વિપન્યામહે વિ પણિર્હિતાવાન્ ।
અધા ચિદ્ધિ ષ્માશ્વિનાવનિન્દ્યા પાથો હિ ષ્મા વૃષણાવન્તિદેવમ્ ॥ ૧.૧૮૦.૦૭
યુવાં ચિદ્ધિ ષ્માશ્વિનાવનુ દ્યૂન્વિરુદ્રસ્ય પ્રસ્રવણસ્ય સાતૌ ।
અગસ્ત્યો નરાં નૃષુ પ્રશસ્તઃ કારાધુનીવ ચિતયત્સહસ્રૈઃ ॥ ૧.૧૮૦.૦૮
પ્ર યદ્વહેથે મહિના રથસ્ય પ્ર સ્યન્દ્રા યાથો મનુષો ન હોતા ।
ધત્તં સૂરિભ્ય ઉત વા સ્વશ્વ્યં નાસત્યા રયિષાચઃ સ્યામ ॥ ૧.૧૮૦.૦૯
તં વાં રથં વયમદ્યા હુવેમ સ્તોમૈરશ્વિના સુવિતાય નવ્યમ્ ।

અરિષ્ટનેમિં પરિ ધામિયાનં વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૦.૧૦

કદુ પ્રેષ્ટાવિષાં રયીણામધ્વર્યન્તા યદુન્નિનીથો અપામ્ ।
અયં વાં યજ્ઞો અકૃત પ્રશસ્તિં વસુધિતી અવિતારા જનાનામ્ ॥ ૧.૧૮૧.૦૧
આ વામશ્વાસઃ શુચયઃ પયસ્પા વાતરંહસો દિવ્યાસો અત્યાઃ ।
મનોજુવો વૃષણો વીતપૃષ્ઠા એહ સ્વરાજો અશ્વિના વહન્તુ ॥ ૧.૧૮૧.૦૨
આ વાં રથોऽવનિર્ન પ્રવત્વાન્સૃપ્રવન્ધુરઃ સુવિતાય ગમ્યાઃ ।
વૃષ્ણઃ સ્થાતારા મનસો જવીયાનહમ્પૂર્વો યજતો ધિષ્ણ્યા યઃ ॥ ૧.૧૮૧.૦૩
ઇહેહ જાતા સમવાવશીતામરેપસા તન્વા નામભિઃ સ્વૈઃ ।
જિષ્ણુર્વામન્યઃ સુમખસ્ય સૂરિર્દિવો અન્યઃ સુભગઃ પુત્ર ઊહે ॥ ૧.૧૮૧.૦૪
પ્ર વાં નિચેરુઃ કકુહો વશાઁ અનુ પિશઙ્ગરૂપઃ સદનાનિ ગમ્યાઃ ।
હરી અન્યસ્ય પીપયન્ત વાજૈર્મથ્રા રજાંસ્યશ્વિના વિ ઘોષૈઃ ॥ ૧.૧૮૧.૦૫
પ્ર વાં શરદ્વાન્વૃષભો ન નિષ્ષાટ્ પૂર્વીરિષશ્ચરતિ મધ્વ ઇષ્ણન્ ।
એવૈરન્યસ્ય પીપયન્ત વાજૈર્વેષન્તીરૂર્ધ્વા નદ્યો ન આગુઃ ॥ ૧.૧૮૧.૦૬
અસર્જિ વાં સ્થવિરા વેધસા ગીર્બાળ્હે અશ્વિના ત્રેધા ક્ષરન્તી ।
ઉપસ્તુતાવવતં નાધમાનં યામન્નયામઞ્છૃણુતં હવં મે ॥ ૧.૧૮૧.૦૭
ઉત સ્યા વાં રુશતો વપ્સસો ગીસ્ત્રિબર્હિષિ સદસિ પિન્વતે નૄન્ ।
વૃષા વાં મેઘો વૃષણા પીપાય ગોર્ન સેકે મનુષો દશસ્યન્ ॥ ૧.૧૮૧.૦૮
યુવાં પૂષેવાશ્વિના પુરંધિરગ્નિમુષાં ન જરતે હવિષ્માન્ ।
હુવે યદ્વાં વરિવસ્યા ગૃણાનો વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૧.૦૯

અભૂદિદં વયુનમો ષુ ભૂષતા રથો વૃષણ્વાન્મદતા મનીષિણઃ ।
ધિયંજિન્વા ધિષ્ણ્યા વિશ્પલાવસૂ દિવો નપાતા સુકૃતે શુચિવ્રતા ॥ ૧.૧૮૨.૦૧
ઇન્દ્રતમા હિ ધિષ્ણ્યા મરુત્તમા દસ્રા દંસિષ્ઠા રથ્યા રથીતમા ।
પૂર્ણં રથં વહેથે મધ્વ આચિતં તેન દાશ્વાંસમુપ યાથો અશ્વિના ॥ ૧.૧૮૨.૦૨
કિમત્ર દસ્રા કૃણુથઃ કિમાસાથે જનો યઃ કશ્ચિદહવિર્મહીયતે ।
અતિ ક્રમિષ્ટં જુરતં પણેરસું જ્યોતિર્વિપ્રાય કૃણુતં વચસ્યવે ॥ ૧.૧૮૨.૦૩
જમ્ભયતમભિતો રાયતઃ શુનો હતં મૃધો વિદથુસ્તાન્યશ્વિના ।
વાચંવાચં જરિતૂ રત્નિનીં કૃતમુભા શંસં નાસત્યાવતં મમ ॥ ૧.૧૮૨.૦૪

યુવમેતં ચક્રથુઃ સિન્ધુષુ પ્લવમાત્મન્વન્તં પક્ષિણં તૌગ્ર્યાય કમ્ ।
યેન દેવત્રા મનસા નિરૂહથુઃ સુપપ્તની પેતથુઃ ક્ષોદસો મહઃ ॥ ૧.૧૮૨.૦૫

અવવિદ્ધં તૌગ્ર્યમપ્સ્વ૧ન્તરનારમ્ભણે તમસિ પ્રવિદ્ધમ્ ।
ચતસ્રો નાવો જઠલસ્ય જુષ્ટા ઉદશ્વિભ્યામિષિતાઃ પારયન્તિ ॥ ૧.૧૮૨.૦૬

કઃ સ્વિદ્વૃક્ષો નિષ્ઠિતો મધ્યે અર્ણસો યં તૌગ્ર્યો નાધિતઃ પર્યષસ્વજત્ ।
પર્ણા મૃગસ્ય પતરોરિવારભ ઉદશ્વિના ઊહથુઃ શ્રોમતાય કમ્ ॥ ૧.૧૮૨.૦૭

તદ્વાં નરા નાસત્યાવનુ ષ્યાદ્યદ્વાં માનાસ ઉચથમવોચન્ ।
અસ્માદદ્ય સદસઃ સોમ્યાદા વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૨.૦૮

તં યુઞ્જાથાં મનસો યો જવીયાન્ત્રિવન્ધુરો વૃષણા યસ્ત્રિચક્રઃ ।
યેનોપયાથઃ સુકૃતો દુરોણં ત્રિધાતુના પતથો વિર્ન પર્ણૈઃ ॥ ૧.૧૮૩.૦૧

સુવૃદ્રથો વર્તતે યન્નભિ ક્ષાં યત્તિષ્ઠથઃ ક્રતુમન્તાનુ પૃક્ષે ।
વપુર્વપુષ્યા સચતામિયં ગીર્દિવો દુહિત્રોષસા સચેથે ॥ ૧.૧૮૩.૦૨

આ તિષ્ઠતં સુવૃતં યો રથો વામનુ વ્રતાનિ વર્તતે હવિષ્માન્ ।
યેન નરા નાસત્યેષયધ્યૈ વર્તિર્યાથસ્તનયાય ત્મને ચ ॥ ૧.૧૮૩.૦૩

મા વાં વૃકો મા વૃકીરા દધર્ષીન્મા પરિ વર્ક્તમુત માતિ ધક્તમ્ ।
અયં વાં ભાગો નિહિત ઇયં ગીર્દસ્રાવિમે વાં નિધયો મધૂનામ્ ॥ ૧.૧૮૩.૦૪

યુવાં ગોતમઃ પુરુમીળ્હો અત્રિર્દસ્રા હવતેઽવસે હવિષ્માન્ ।
દિશં ન દિષ્ટામૃજૂયેવ યન્તા મે હવં નાસત્યોપ યાતમ્ ॥ ૧.૧૮૩.૦૫

અતારિષ્મ તમસસ્પારમસ્ય પ્રતિ વાં સ્તોમો અશ્વિનાવધાયિ ।
એહ યાતં પથિભિર્દેવયાનૈર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૩.૦૬

તા વામદ્ય તાવપરં હુવેમોચ્છન્ત્યામુષસિ વહ્નિરુક્થૈઃ ।
નાસત્યા કુહ ચિત્સન્તાવર્યો દિવો નપાતા સુદાસ્તરાય ॥ ૧.૧૮૪.૦૧

અસ્મે ઊ ષુ વૃષણા માદયેથામુત્પણીઁર્હતમૂર્મ્યા મદન્તા ।
શ્રુતં મે અચ્છોક્તિભિર્મતીનામેષ્ટા નરા નિચેતારા ચ કર્ણૈઃ ॥ ૧.૧૮૪.૦૨

શ્રિયે પૂષન્નિષુકૃતેવ દેવા નાસત્યા વહતું સૂર્યાયાઃ ।
વચ્યન્તે વાં કકુહા અપ્સુ જાતા યુગા જૂર્ણેવ વરુણસ્ય ભૂરેઃ ॥ ૧.૧૮૪.૦૩

અસ્મે સા વાં માધ્વી રાતિરસ્તુ સ્તોમં હિનોતં માન્યસ્ય કારોઃ ।

અનુ યદ્વાં શ્રવસ્યા સુદાનૂ સુવીર્યાય ચર્ષણયો મદન્તિ ॥ ૧.૧૮૪.૦૪
એષ વાં સ્તોમો અશ્વિનાવકારિ માનેભિર્મઘવાના સુવૃક્તિ ।
યાતં વર્તિસ્તનયાય ત્મને ચાગસ્ત્યે નાસત્યા મદન્તા ॥ ૧.૧૮૪.૦૫
અતારિષ્મ તમસસ્પારમસ્ય પ્રતિ વાં સ્તોમો અશ્વિનાવધાયિ ।
એહ યાતં પથિભિર્દેવયાનૈર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૪.૦૬
કતરા પૂર્વા કતરાપરાયોઃ કથા જાતે કવયઃ કો વિ વેદ ।
વિશ્વં ત્મના બિભૃતો યદ્ધ નામ વિ વર્તેતે અહની ચક્રિયેવ ॥ ૧.૧૮૫.૦૧
ભૂરિં દ્વે અચરન્તી ચરન્તં પદ્વન્તં ગર્ભમપદી દધાતે ।
નિત્યં ન સૂનું પિત્રોરુપસ્થે દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૨
અનેહો દાત્રમદિતેરનર્વં હુવે સ્વર્વદવધં નમસ્વત્ ।
તદ્રોદસી જનયતં જરિત્રે દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૩
અતપ્યમાને અવસાવન્તી અનુ ષ્યામ રોદસી દેવપુત્રે ।
ઉભે દેવાનામુભયેભિરહ્નાં દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૪
સંગચ્છમાને યુવતી સમન્તે સ્વસારા જામી પિત્રોરુપસ્થે ।
અભિજિઘ્રન્તી ભુવનસ્ય નાભિં દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૫
ઉર્વી સદ્મની બૃહતી ઋતેન હુવે દેવાનામવસા જનિત્રી ।
દધાતે યે અમૃતં સુપ્રતીકે દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૬
ઉર્વી પૃથ્વી બહુલે દૂરેઅન્તે ઉપ બ્રુવે નમસા યજ્ઞે અસ્મિન્ ।
દધાતે યે સુભગે સુપ્રતૂર્તી દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૭
દેવાન્વા યચ્ચકૃમા કચ્ચિદાગઃ સખાયં વા સદમિજ્જાસ્પતિં વા ।
ઇયં ધીર્ભૂયા અવયાનમેષાં દ્યાવા રક્ષતં પૃથિવી નો અભ્વાત્ ॥ ૧.૧૮૫.૦૮
ઉભા શંસા નર્યા મામવિષ્ટામુભે મામૂતી અવસા સચેતામ્ ।
ભૂરિ ચિદર્યઃ સુદાસ્તરાયેષા મદન્ત ઇષયેમ દેવાઃ ॥ ૧.૧૮૫.૦૯
ઋતં દિવે તદવોચં પૃથિવ્યા અભિશ્રાવાય પ્રથમં સુમેધાઃ ।
પાતામવદ્યાદ્દુરિતાદભીકે પિતા માતા ચ રક્ષતામવોભિઃ ॥ ૧.૧૮૫.૧૦
ઇદં દ્યાવાપૃથિવી સત્યમસ્તુ પિતર્માતર્યદિહોપબ્રુવે વામ્ ।
ભૂતં દેવાનામવમે અવોભિર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૫.૧૧

આ ન ઇળાભિર્વિદથે સુશસ્તિ વિશ્વાનરઃ સવિતા દેવ એતુ ।
અપિ યથા યુવાનો મત્સથા નો વિશ્વં જગદભિપિત્વે મનીષા ॥ ૧.૧૮૬.૦૧
આ નો વિશ્વ આસ્ક્રા ગમન્તુ દેવા મિત્રો અર્યમા વરુણઃ સજોષાઃ ।
ભુવન્યથા નો વિશ્વે વૃધાસઃ કરન્સુષાહા વિથુરં ન શવઃ ॥ ૧.૧૮૬.૦૨
પ્રેષ્ઠં વો અતિથિં ગૃણીષેઽગ્નિં શસ્તિભિસ્તુર્વણિઃ સજોષાઃ ।
અસદ્યથા નો વરુણઃ સુકીર્તિરિષશ્ચ પર્ષદરિગૂર્તઃ સૂરિઃ ॥ ૧.૧૮૬.૦૩
ઉપ વ એષે નમસા જિગીષોષાસાનક્તા સુદુઘેવ ધેનુઃ ।
સમાને અહન્વિમિમાનો અર્કં વિષુરૂપે પયસિ સસ્મિન્નૂધન્ ॥ ૧.૧૮૬.૦૪
ઉત નોઽહિર્બુધ્ન્યોઽ મયસ્કઃ શિશું ન પિપ્યુષીવ વેતિ સિન્ધુઃ ।
યેન નપાતમપાં જુનામ મનોજુવો વૃષણો યં વહન્તિ ॥ ૧.૧૮૬.૦૫
ઉત ન ઈં ત્વષ્ટા ગન્ત્વચ્છા સ્મત્સૂરિભિરભિપિત્વે સજોષાઃ ।
આ વૃત્રહેન્દ્રશ્ચર્ષણિપ્રાસ્તુવિષ્ટમો નરાં ન ઇહ ગમ્યાઃ ॥ ૧.૧૮૬.૦૬
ઉત ન ઈં મતયોઽશ્વયોગાઃ શિશું ન ગાવસ્તરુણં રિહન્તિ ।
તમીં ગિરો જનયો ન પત્નીઃ સુરભિષ્ટમં નરાં નસન્ત ॥ ૧.૧૮૬.૦૭
ઉત ન ઈં મરુતો વૃદ્ધસેનાઃ સ્મદ્રોદસી સમનસઃ સદન્તુ ।
પૃષદશ્વાસોઽવનયો ન રથા રિશાદસો મિત્રયુજો ન દેવાઃ ॥ ૧.૧૮૬.૦૮
પ્ર નુ યદેષાં મહિના ચિકિત્રે પ્ર યુઞ્જતે પ્રયુજસ્તે સુવૃક્તિ ।
અધ યદેષાં સુદિને ન શરુર્વિશ્વમેરિણં પ્રુષાયન્ત સેનાઃ ॥ ૧.૧૮૬.૦૯
પ્રો અશ્વિનાવવસે કૃણુધ્વં પ્ર પૂષણં સ્વતવસો હિ સન્તિ ।
અદ્વેષો વિષ્ણુર્વાત ઋભુક્ષા અચ્છા સુમ્નાય વવૃતીય દેવાન્ ॥ ૧.૧૮૬.૧૦
ઇયં સા વો અસ્મે દીધિતિર્યજત્રા અપિપ્રાણી ચ સદની ચ ભૂયાઃ ।
નિ યા દેવેષુ યતતે વસૂયુર્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૬.૧૧

પિતું નુ સ્તોષં મહો ધર્માણં તવિષીમ્ ।
યસ્ય ત્રિતો વ્યોજસા વૃત્રં વિપર્વમર્દયત્ ॥ ૧.૧૮૭.૦૧
સ્વાદો પિતો મધો પિતો વયં ત્વા વવૃમહે ।
અસ્માકમવિતા ભવ ॥ ૧.૧૮૭.૦૨
ઉપ નઃ પિતવા ચર શિવઃ શિવાભિરૂતિભિઃ ।

મયોભુરદ્વિષેણ્યઃ સખા સુશેવો અદ્વયાઃ ॥ ૧.૧૮૭.૦૩

તવ ત્યે પિતો રસા રજાંસ્યનુ વિષ્ઠિતાઃ ।

દિવિ વાતા ઇવ શ્રિતાઃ ॥ ૧.૧૮૭.૦૪

તવ ત્યે પિતો દદતસ્તવ સ્વાદિષ્ઠ તે પિતો ।

પ્ર સ્વાદ્માનો રસાનાં તુવિગ્રીવા ઇવેરતે ॥ ૧.૧૮૭.૦૫

ત્વે પિતો મહાનાં દેવાનાં મનો હિતમ્ ।

અકારિ ચારુ કેતુના તવાહિમવસાવધીત્ ॥ ૧.૧૮૭.૦૬

યદદો પિતો અજગન્વિવસ્વ પર્વતાનામ્ ।

અત્રા ચિન્નો મધો પિતોઽરં ભક્ષાય ગમ્યાઃ ॥ ૧.૧૮૭.૦૭

યદપામોષધીનાં પરિંશમારિશામહે ।

વાતાપે પીવ ઇદ્ભવ ॥ ૧.૧૮૭.૦૮

યત્તે સોમ ગવાશિરો યવાશિરો ભજામહે ।

વાતાપે પીવ ઇદ્ભવ ॥ ૧.૧૮૭.૦૯

કરમ્ભ ઓષધે ભવ પીવો વૃક્ક ઉદારથિઃ ।

વાતાપે પીવ ઇદ્ભવ ॥ ૧.૧૮૭.૧૦

તં ત્વા વયં પિતો વચોભિર્ગાવો ન હવ્યા સુષૂદિમ ।

દેવેભ્યસ્ત્વા સધમાદમસ્મભ્યં ત્વા સધમાદમ્ ॥ ૧.૧૮૭.૧૧

સમિદ્ધો અદ્ય રાજસિ દેવો દેવૈઃ સહસ્રજિત્ ।

દૂતો હવ્યા કવિર્વહ ॥ ૧.૧૮૮.૦૧

તનૂનપાદૃતં યતે મધ્વા યજ્ઞઃ સમજ્યતે ।

દધત્સહસ્રિણીરિષઃ ॥ ૧.૧૮૮.૦૨

આજુહ્વાનો ન ઈડ્યો દેવાઁ આ વક્ષિ યજ્ઞિયાન્ ।

અગ્ને સહસ્રસા અસિ ॥ ૧.૧૮૮.૦૩

પ્રાચીનં બર્હિરોજસા સહસ્રવીરમસ્તૃણન્ ।

યત્રાદિત્યા વિરાજથ ॥ ૧.૧૮૮.૦૪

વિરાટ્ સમ્રાડ્વિભ્વીઃ પ્રભ્વીર્બહ્વીશ્ચ ભૂયસીશ્ચ યાઃ ।

દુરો ઘૃતાન્યક્ષરન્ ॥ ૧.૧૮૮.૦૫

સુરુક્મે હિ સુપેશસાધિ શ્રિયા વિરાજતઃ ।
ઉષાસાવેહ સીદતામ્ ॥ ૧.૧૮૮.૦૬
પ્રથમા હિ સુવાચસા હોતારા દૈવ્યા કવી ।
યજ્ઞં નો યક્ષતામિમમ્ ॥ ૧.૧૮૮.૦૭
ભારતીળે સરસ્વતિ યા વઃ સર્વા ઉપબ્રુવે ।
તા નશ્ચોદયત શ્રિયે ॥ ૧.૧૮૮.૦૮
ત્વષ્ટા રૂપાણિ હિ પ્રભુઃ પશૂન્વિશ્વાન્સમાનજે ।
તેષાં નઃ સ્ફાતિમા યજ ॥ ૧.૧૮૮.૦૯
ઉપ ત્મન્યા વનસ્પતે પાથો દેવેભ્યઃ સૃજ ।
અગ્નિર્હવ્યાનિ સિષ્વદત્ ॥ ૧.૧૮૮.૧૦
પુરોગા અગ્નિર્દેવાનાં ગાયત્રેણ સમજ્યતે ।
સ્વાહાકૃતીષુ રોચતે ॥ ૧.૧૮૮.૧૧
અગ્ને નય સુપથા રાયે અસ્માન્વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્ ।
યુયોધ્યસ્મજ્જુહુરાણમેનો ભૂયિષ્ઠાં તે નમઉક્તિં વિધેમ ॥ ૧.૧૮૯.૦૧
અગ્ને ત્વં પારયા નવ્યો અસ્માન્સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા ।
પૂશ્ચ પૃથ્વી બહુલા ન ઉર્વી ભવા તોકાય તનયાય શં યોઃ ॥ ૧.૧૮૯.૦૨
અગ્ને ત્વમસ્મદ્યુયોધ્યમીવા અનગ્નિત્રા અભ્યમન્ત કૃષ્ટીઃ ।
પુનરસ્મભ્યં સુવિતાય દેવ ક્ષાં વિશ્વેભિરમૃતેભિર્યજત્ર ॥ ૧.૧૮૯.૦૩
પાહિ નો અગ્ને પાયુભિરજસ્રૈરુત પ્રિયે સદન આ શુશુક્વાન્ ।
મા તે ભયં જરિતારં યવિષ્ઠ નૂનં વિદન્માપરં સહસ્વઃ ॥ ૧.૧૮૯.૦૪
મા નો અગ્નેઽવ સૃજો અઘાયાવિષ્યવે રિપવે દુચ્છુનાયૈ ।
મા દત્વતે દશતે માદતે નો મા રીષતે સહસાવન્પરા દાઃ ॥ ૧.૧૮૯.૦૫
વિ ઘ ત્વાવાઁ ઋતજાત યંસદ્ગૃણાનો અગ્ને તન્વે૩ વરૂથમ્ ।
વિશ્વાદ્રિરિક્ષોરુત વા નિનિત્સોરભિહ્રુતામસિ હિ દેવ વિષ્પટ્ ॥ ૧.૧૮૯.૦૬
ત્વં તાઁ અગ્ન ઉભયાન્વિ વિદ્વાન્વેષિ પ્રપિત્વે મનુષો યજત્ર ।
અભિપિત્વે મનવે શાસ્યો ભૂર્મર્મૃજેન્ય ઉશિગ્ભિર્નાક્રઃ ॥ ૧.૧૮૯.૦૭
અવોચામ નિવચનાન્યસ્મિન્માનસ્ય સૂનુઃ સહસાને અગ્નૌ ।

વયં સહસ્રમૃષિભિઃ સનેમ વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૮૯.૦૮

અનર્વાણં વૃષભં મન્દ્રજિહ્વં બૃહસ્પતિં વર્ધયા નવ્યમર્કૈઃ ।
ગાથાન્યઃ સુરુચો યસ્ય દેવા આશૃણ્વન્તિ નવમાનસ્ય મર્તાઃ ॥ ૧.૧૯૦.૦૧
તમૃત્વિયા ઉપ વાચઃ સચન્તે સર્ગો ન યો દેવયતામસર્જિ ।
બૃહસ્પતિઃ સ હ્યઞ્જો વરાંસિ વિભ્વાભવત્સમૃતે માતરિશ્વા ॥ ૧.૧૯૦.૦૨
ઉપસ્તુતિં નમસ ઉદ્યતિં ચ શ્લોકં યંસત્સવિતેવ પ્ર બાહૂ ।
અસ્ય ક્રત્વાહન્યોઽ યો અસ્તિ મૃગો ન ભીમો અરક્ષસસ્તુવિષ્માન્ ॥ ૧.૧૯૦.૦૩
અસ્ય શ્લોકો દિવીયતે પૃથિવ્યામત્યો ન યંસદ્યક્ષભૃદ્વિચેતાઃ ।
મૃગાણાં ન હેતયો યન્તિ ચેમા બૃહસ્પતેરહિમાયાઁ અભિ દ્યૂન્ ॥ ૧.૧૯૦.૦૪
યે ત્વા દેવોસ્રિકં મન્યમાનાઃ પાપા ભદ્રમુપજીવન્તિ પજ્રાઃ ।
ન દૂઢ્યેઽ અનુ દદાસિ વામં બૃહસ્પતે ચયસ ઇત્પિયારુમ્ ॥ ૧.૧૯૦.૦૫
સુપ્રૈતુઃ સૂયવસો ન પન્થા દુર્નિયન્તુઃ પરિપ્રીતો ન મિત્રઃ ।
અનર્વાણો અભિ યે ચક્ષતે નોઽપીવૃતા અપોર્ણુવન્તો અસ્થુઃ ॥ ૧.૧૯૦.૦૬
સં યં સ્તુભોઽવનયો ન યન્તિ સમુદ્રં ન સ્રવતો રોધચક્રાઃ ।
સ વિદ્વાઁ ઉભયં ચષ્ટે અન્તર્બૃહસ્પતિસ્તર આપશ્ચ ગૃધ્રઃ ॥ ૧.૧૯૦.૦૭
એવા મહસ્તુવિજાતસ્તુવિષ્માન્બૃહસ્પતિર્વૃષભો ધાયિ દેવઃ ।
સ નઃ સ્તુતો વીરવદ્ધાતુ ગોમદ્વિદ્યામેષં વૃજનં જીરદાનુમ્ ॥ ૧.૧૯૦.૦૮

કઙ્કતો ન કઙ્કતોઽથો સતીનકઙ્કતઃ ।
દ્વાવિતિ પ્લુષી ઇતિ ન્યઽદૃષ્ટા અલિપ્સત ॥ ૧.૧૯૧.૦૧
અદૃષ્ટાન્હન્ત્યાયત્યથો હન્તિ પરાયતી ।
અથો અવઘ્નતી હન્ત્યથો પિનષ્ટિ પિંષતી ॥ ૧.૧૯૧.૦૨
શરાસઃ કુશરાસો દર્ભાસઃ સૈર્યા ઉત ।
મૌઞ્જા અદૃષ્ટા વૈરિણાઃ સર્વે સાકં ન્યલિપ્સત ॥ ૧.૧૯૧.૦૩
નિ ગાવો ગોષ્ઠે અસદન્નિ મૃગાસો અવિક્ષત ।
નિ કેતવો જનાનાં ન્યઽદૃષ્ટા અલિપ્સત ॥ ૧.૧૯૧.૦૪
એત ઉ ત્યે પ્રત્યદૃશ્રન્પ્રદોષં તસ્કરા ઇવ ।
અદૃષ્ટા વિશ્વદૃષ્ટાઃ પ્રતિબુદ્ધા અભૂતન ॥ ૧.૧૯૧.૦૫

દ્યૌર્વઃ પિતા પૃથિવી માતા સોમો ભ્રાતાદિતિઃ સ્વસા ।
અદૃષ્ટા વિશ્વદૃષ્ટાસ્તિષ્ઠતેલયતા સુ કમ્ ॥ ૧.૧૯૧.૦૬
યે અંસ્યા યે અઙ્ગ્યાઃ સૂચીકા યે પ્રકઙ્કતાઃ ।
અદૃષ્ટાઃ કિં ચનેહ વઃ સર્વે સાકં નિ જસ્યત ॥ ૧.૧૯૧.૦૭
ઉત્પુરસ્તાત્સૂર્ય એતિ વિશ્વદૃષ્ટો અદૃષ્ટહા ।
અદૃષ્ટાન્સર્વાઞ્જમ્ભયન્સર્વાશ્ચ યાતુધાન્યઃ ॥ ૧.૧૯૧.૦૮
ઉદપપ્તદસૌ સૂર્યઃ પુરુ વિશ્વાનિ જૂર્વન્ ।
આદિત્યઃ પર્વતેભ્યો વિશ્વદૃષ્ટો અદૃષ્ટહા ॥ ૧.૧૯૧.૦૯
સૂર્યે વિષમા સજામિ દૃતિં સુરાવતો ગૃહે ।
સો ચિન્નુ ન મરાતિ નો વયં મરામારે અસ્ય યોજનં હરિષ્ઠા મધુ ત્વા મધુલા ચકાર ॥ ૧.૧૯૧.૧૦
ઇયત્તિકા શકુન્તિકા સકા જઘાસ તે વિષમ્ ।
સો ચિન્નુ ન મરાતિ નો વયં મરામારે અસ્ય યોજનં હરિષ્ઠા મધુ ત્વા મધુલા ચકાર ॥ ૧.૧૯૧.૧૧
ત્રિઃ સપ્ત વિષ્પુલિઙ્ગકા વિષસ્ય પુષ્યમક્ષન્ ।
તાશ્ચિન્નુ ન મરન્તિ નો વયં મરામારે અસ્ય યોજનં હરિષ્ઠા મધુ ત્વા મધુલા ચકાર ॥ ૧.૧૯૧.૧૨
નવાનાં નવતીનાં વિષસ્ય રોપુષીણામ્ ।
સર્વાસામગ્રભં નામારે અસ્ય યોજનં હરિષ્ઠા મધુ ત્વા મધુલા ચકાર ॥ ૧.૧૯૧.૧૩
ત્રિઃ સપ્ત મયૂર્યઃ સપ્ત સ્વસારો અગ્રુવઃ ।
તાસ્તે વિષં વિ જભ્રિર ઉદકં કુમ્ભિનીરિવ ॥ ૧.૧૯૧.૧૪
ઇયત્તકઃ કુષુમ્ભકસ્તકં ભિનદ્મ્યશ્મના ।
તતો વિષં પ્ર વાવૃતે પરાચીરનુ સંવતઃ ॥ ૧.૧૯૧.૧૫
કુષુમ્ભકસ્તદબ્રવીદ્ગિરેઃ પ્રવર્તમાનકઃ ।
વૃશ્ચિકસ્યારસં વિષમરસં વૃશ્ચિક તે વિષમ્ ॥ ૧.૧૯૧.૧૬

Last updated July 2, 2013

Special mention :

Initial processing and help by Avinash and Shashi Sathaye,

Avinash Chopde, Shree Devi Kumar, Sunder Hattangadi, John Gardner.

Reprocessed from Original in final form by Detlef Eichler with additional corrections.

See Detlef's site http://www.detlef108.de/Rigvedatm for other details and formats.

Description/comments :

1. The text is shown with accents (Anudattas,dependent Svaritas, and independent Svaritas including Kampas).
2. Words are connected (a̖gnimIĹ̖e).
3. Ch is doubled as in gachChati according to the rules of Rigveda-Pratishakhya.
4. At the end of a word m is replaced by Anusvara M if the initial letter of the following word is a labial stop consonant (p, ph, b, bh, m).
5. Visarga H before sh, Sh or s followed by a voiceless consonant is restored as shown in the printed Rigveda-Samhitas.

Source :

The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda (http://www.people.fasarvard.edu/ witzel/onlineRVtm).

1. In this text accented vowels have Udatta (acute) or 'independent Svarita' (grave) markers. Kampas are not shown.
2. Words are separated (agním ILe).
3. Ch is not doubled as in gaChati.
4. At the end of a word we find m before a following labial stop consonant (p, ph, b, bh, m).
5. Visarga H before sh, Sh or s followed by a voiceless consonant is dropped according to a rule of Rigveda-Pratishakhya.

Transliterated by :

1. Source: Aufrecht/van Nooten/Holland (Samhita)
2. Final transliteration: Detlef Eichler

Special Instructions :

Hiatus between a and u(i) is shown in the ITRANS text as au(i).

If you search for 'i' ('u') you will find 5 (8) Hiatus occurences.

Hiatus ae, A, aU, Aa, ea, and oa are shown as a/e, a/A, a/U, A/a, e/a and o/a (without / the Itranslator is not converting to Devanagari correctly).The Itranslator ignores the / character.

*Rigveda Mandala 1*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*